यू.जी.सी. संरक्षणसूचीबद्ध ( UGC Care-Listed )
ISSN : 7552-2779

स्वतन्त्रतायाः अमृतमहोत्सवः

# श्रीवैष्णवी

## वार्षिकी शोधपत्रिका

अंक-2

केन्द्रीयसंस्कृतविश्वविद्यालयः
( संसदः अधिनियमेन स्थापितः )
श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः - 181122 ( जम्मू एवं काश्मीर )
ई मेल : director-jammu@csu.co.in वेबसाईट : www.csu-jammu.edu.in
2021-22

UGC Care Listed ISSN : 7552-2779

# श्रीवैष्णवी

## ( वार्षिकी शोधपत्रिका )

[ अङ्कः 2 ]

संरक्षकः

**प्रो. श्रीनिवासवरखेडी**

कुलपतिः

प्रधानसम्पादकः

**प्रो. मदनमोहनझाः**

निदेशकः

प्रबन्धसम्पादकः

**प्रो. सतीशकुमारकपूरः**

सम्पादकाः

**डॉ. तेजनाथपौडेलः**

**डॉ. सुमनचन्द्रपन्तः 'सुमन्तः'**

**डॉ. योगेन्द्रदीक्षितः**

सहसम्पादकौ

**डॉ. नीतूशर्मा**

**डॉ. संजयकुमारमिश्रः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

( संसदः अधिनियमेन स्थापितः )

श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः - 181122

2021-22

प्रकाशकः
निदेशकः
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
(भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः)
श्रीरणवीरपरिसरः, कोट-भलवाल, जम्मूः-181122 (जम्मू एवं काश्मीर)
दूरभाषः 0191-2623090
ई मेल : director-jammu@csu.co.in
वेबसाईट : www.csu-jammu.edu.in

---

**समीक्षा समितिः**

प्रो. विश्वमूर्तिशास्त्री
प्रो. प्रियतमचन्द्रशास्त्री
प्रो. आर.पी. पाठकः
प्रो. के. भारतभूषणः
प्रो. महानन्दझाः
श्रीशरत् चन्द्रशर्मा

**परामर्शदात्री समितिः**

प्रो. मनोजकुमारमिश्रः
डॉ. प्रभातकुमारमहापात्रः
डॉ. कैलाशचन्द्रदाशः
डॉ. घनश्याममिश्रः

---

© सर्वाधिकारः जम्मूस्थकेन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणवीरपरिसराधीनः

प्रकाशनवर्षम् : अप्रैल 2022

प्रथमसंस्करणम् : 500 (पञ्चशतम्)

ISSN : 7552-2779

मूल्यम् : ₹ 150.00

मुद्रकः
**डी.वी. प्रिंटर्स**
97-यू.बी., जवाहर नगर, दिल्ली-110007

प्रो. श्रीनिवास वरखेड़ी
कुलपतिः
केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्,
भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)

Prof. Shrinivasa Varakhedi
Vice-Chancellor
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)

आज़ादी का अमृत महोत्सव

के.सं.वि./कुलपति/101/2022-23/२१४ दिनांकः- 01.09.2022

# शुभाशंसा

**चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।**
**मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ।।**

अमन्दानन्दसन्दोहस्यावसरोऽयं यच्छ्रीवैष्णवीचरणारविन्दयोर्विराजमानेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य जम्मूस्थितेन श्रीरणवीरपरिसरेण विविधशास्त्र-शोधपत्रान्वितायाः **"श्रीवैष्णवी"** इत्यभिधेयाया वार्षिकशोधपत्रिकायाः प्रकाशनं सोत्साहपरिश्रमं विधीयते। शोधपत्रिकेयं विविधज्ञानामृतपिपासूनां मनोमोदाय स्यादिति शुभाशंसया परिसरनिदेशकसहितमखिलमपि सम्पादक-मण्डलमभिनन्दामि।

( प्रो. श्रीनिवासवरखेडी )
कुलपतिः

56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली - 110058
56-57, Institutional Area, Janakpuri, New Delhi - 110058 (INDIA)
**Ph. No.: (O)** 011-28523949, **EPABX** : 28524993, 28521994, 28524995
**EMAIL** : vicechancellorcsu@gmail.com / vc@csu.co.in, **WEBSITE** : www.sanskrit.nic.in

प्रो. रणजित कुमार बर्मन
कुलसचिव (प्र.)
केन्द्रीय संस्कृत विश्वविद्यालय
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान,
शिक्षा मन्त्रालय, भारत सरकार के अधीन)

Prof. Ranjit Kumar Barman
Registrar (I/c)
Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Under Ministry of Education, Govt. of India)

आज़ादी का
अमृत महोत्सव

॥ श्रीः॥

**येषां न विद्या न तपो न दानं**
**ज्ञानं न शीलं न गुणो न धर्मः ।**
**ते मर्त्यलोके भुवि भारभूता**
**मनुष्यरूपेण मृगाश्चरन्ति ॥**

महान् प्रमोदभरितोऽयं विषयो वर्तते यन्मातुर्वैष्णवीदेव्याः चरणसंनिधौ स्थितेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणवीराख्यपरिसरेण विविधविषयसमलङ्कृता श्रीवैष्णवीति शोधपत्रिका प्राकाश्यमानीयत इति।

वेददर्शनव्याकरणसाहित्यधर्मशास्त्रादिविविधविषयाणामनेकज्ञानविज्ञानानां चिन्तनमननादिसारस्वतकार्यैः समन्वितेयं शोधपत्रिका नूनमेव शास्त्रज्ञानपरम्परां संवर्ध्य ज्ञानपिपासूनां पाठकानां छात्राणां शास्त्ररोचिष्णुजनानां कृते महते उपकाराय भविष्यतीति विश्वसिमि। आशासे यद् भाव्यध्येतॄणां कृतेऽपीयं श्रीवैष्णवी मार्गदर्शनाय भविष्यतीति।

भवदीयः
R.K. Barman.
**प्रो. रणजित कुमार बर्मन**
कुलसचिवः (प्र.)

56-57, सांस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058
56-57, Institutional Area, Janakpuri, New Delhi - 110058 (INDIA)
**Ph. No.: (O)** 011-28520979, **EPABX** : 28524993, 28521994, 28524995
**EMAIL** : registrar@csu.co.in / pa2registrar@csu.co.in **WEBSITE** : www.sanskrit.nic.in

प्रो. मदनमोहनझा:
निदेशक:
केन्द्रीयसंस्कृतविश्वविद्यालय:
श्रीरणवीरपरिसर:,
कोट-भलवाल:, जम्मू: -181122
संसद: अधिनियमेन स्थापित:
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालय:)
भारतसर्वकारशिक्षामन्त्रालयाधीन:

Prof. Madan Mohan Jha
Director
CENTRAL SANSKRIT UNIVERSITY
Shri Ranbir Campus,
Kot-Bhalwal, Jammu-181122
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan,
Deemed to be University)
Under Ministry of Education, Govt. of India

क्रमांक/No. CSU/पत्रिका/2022-23/1223

दिनांक/Date 1-09-2022

# शुभाशंसा

श्रीवैष्णव्या समलङ्कृतायामस्यां भूमौ प्राचीनकालादेव संस्कृतशास्त्राणां ज्ञानधारा प्रवहमाणा वर्तते, तत आरभ्य नैके विद्वान्सो नैकान् विचारान् प्रस्तूय भूमिमिमां समलञ्चक्रुः। साम्प्रतिकः समाजोऽपि शास्त्रे प्रतिपादितान् तान् विचारान् जानीयादिति कारणात् प्रतिवर्षमिवास्मिन् वर्षेऽपि **"श्रीवैष्णवी"** इत्याख्या वार्षिकी शोधपत्रिका प्रकाश्यते । अस्यां पत्रिकायां भारतस्य मूर्धन्यानामनेकशास्त्रे कृतभूरिपरिश्रमाणां मनीषिणां विविधशास्त्रसमन्विताः शोधपरकाः विचाराः प्रकाशयिष्यन्ते। एते विचाराः शोधच्छात्राणां सामाजिकानां च लाभाय भविष्यन्तीत्याशास्महे, तदर्थं पत्रिकायाः सम्पादकमण्डलसदस्येभ्यो भूरिशो धन्यवादवचांसि समर्प्यन्ते।

(प्रो. मदनमोहनझाः)
परिसरनिदेशकः

मो. 9004904059, 6005450539. e-mail. mmjha44@gmail.com, rsksjmu@gmail.com

# श्रीवैष्णवी

## सम्पादकीयम्

॥ श्रीः ॥

**अन्तःस्थं बहिरुन्नमय्य विशदं ज्योतिः श्रियां युञ्जती**
**वाचां चैव चतुष्टयीमधिपदं भावात्मिकां बिभ्रती ।**
**बोधं शोधमयं सुखं विदधती शोधं च बोधात्मकं**
**स्वाध्यायाध्यवसायिनो दिशि दिशि श्रीवैष्णवी पातु वः ॥**

**"संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः"** देवानामियमिति दैवी, देववाणीति । देववाणीति संस्कृतस्य परिचायकमात्रं सञ्ज्ञामात्रं वा पदं नावबोद्धव्यं प्रत्युत तस्यान्तःस्वरूपरहस्यात्मकराजप्रासादस्य मुख्यद्वारभूतमद्वितीयमनुपमं च पदं वेदितव्यम् । यथा देवानां महिमा ह्यनुभवमात्रगम्यो भवति तथैव संस्कृतस्य महिमाप्यनुभवमात्रगोचरो विद्यते । स्वानुभवैकगम्यो हि विषयो वचनविन्यासैः कियदिव कियानिव च प्रकाशयितुं शक्यत इत्यत्र संस्कृतप्रसादामृतमधिहृदयमधिजग्मुषो विदुषो विहाय कोऽन्यः खलु प्रामाण्यपदवीमधिष्ठातुं शक्नुयात्?

श्रीवैष्णवीचरणधूलिपवित्रधाम्नि जम्मूनगरे विराजमानेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणवीरपरिसरेण **"श्रीवैष्णवी"** इतिनाम्नी वार्षिकी शोधपत्रिका प्रतिवर्षं प्रकाश्यते । कोरोनामहासङ्कटकालवशाद् यद्यपि विलम्बितं परं पुनरपि सकलजगतामधिष्ठात्र्याः श्रीवैष्णव्या एव दृगनुग्रहादैषमोऽप्येतस्याः शोधपत्रिकायाः प्रवृत्तं प्रकाशनमाचार्याणां प्राध्यापकानां शोधार्थिनां विद्यार्थिनां च शोधलेखैः स्वरूपसौष्ठवं बिभर्त्ति । विषयविभाजनमप्येतस्यां बृहत्परिधि-वैविध्यमधितिष्ठति । तथा ह्येकत्र वेदनिरुक्तोपनिषदध्यात्मपुराणव्याकरणज्योतिषन्यायदर्शनमीमांसादर्शनवेदान्तदर्शन-योगदर्शनकाश्मीरशैवदर्शनादिनिबन्धनाः प्राच्यविद्यावगाहिनो विषया अपरत्र च शिक्षाशास्त्रराजनीतिविज्ञानसङ्गणकविज्ञान-लोकसंस्कृतिक्रीडाविज्ञानशारीरिकशिक्षापर्यावरणविज्ञानादिनिबन्धनास्तावदाधुनिकविद्यासमुल्लासिनो विषया अपि श्रीवैष्णवीक्रोडे क्रीडन्ति । विषयानुक्रमणीनिर्माणक्षणेषु तर्हि सर्वमपीदं वैविध्यमनुध्यायैव भाषाविभागप्रामुख्यमेव तावत् पुरस्कृतम् ।

अपि च, विश्वविद्यालयानुदानायोगस्य संरक्षणसूच्यामपि (UGC Care List) स्वकीयसुगन्धं समन्ताद्विकिरन्ती श्रीवैष्णवी विविधविद्याजुषां सहृदयविदुषां हृदयेषु खल्वितोऽपि हर्षश्रियः समुल्लासयतितराम् ।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयकुलपतीनां प्रो. श्रीनिवासवरखेड़ीमहोदयानां कुलसचिवानां प्रो. रणजित-कुमारबर्मनमहोदयानां श्रीरणवीरपरिसरनिदेशकानां प्रो.मदनमोहनझावर्याणां च शुभाशंसावचोभिर्निर्विघ्नसम्पन्नता-प्रतिभूतिसुवासितायां संशोधनादिपरिश्रमशीकरमुक्तोन्मुक्तकान्तिसंवादकसम्पादकमण्डलसदस्यानामुत्साहैरुल्लासितायां शोधपत्रिकायामस्यामुपनिबद्धानि सर्वाण्यपि शोधपत्राणि चिन्तकानां वैचारिकान्दोलनसौन्दर्यमुद्गिरन्ति प्रतिभान्ति । क्वचिदेव केवलं भाषायाः सुपरिनिष्ठितस्वरूपाभावः परिशीलनसौख्यविघातमुपजनयतीति सम्पादनकर्म्मणो नैष्ठुर्यमप्यास्वादयद्भिरस्माभिर्नेतोऽतिरिच्य किञ्चिद्वक्तुं युक्तम् । समेभ्यो मङ्गलकामनापुरस्सरं तावदेतावन्मात्रमेवोद्गरीतुमलम्-

**उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।**
**उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥** ऋग्वेदः-१०.७१.४ ॥

सम्पादकमण्डली व्यतिकरेऽस्मिन् सविशेषमभिनन्दनीया ।

**( प्रो. सतीश कुमार कपूरः )**
**साहित्यविभागाध्यक्षः**

# विषयानुक्रमणिका


शुभाशंसनम् - प्रो. श्रीनिवासवरखेडी, कुलपति: *iii*

शुभाशंसनम् - प्रो. रणजितकुमारबर्मन्, कुलसचिव: *iv*

शुभाशंसनम् - प्रो. मदनमोहनझा:, निदेशक: *v*

सम्पादकीयम् - प्रो. सतीशकुमारकपूर:, प्रबन्धसम्पादक: *vi*

**संस्कृत खण्ड**

| | लेख | नाम | पृ.सं. |
|---|---|---|---|
| 1. | बृहत्सहितायां भूकम्पविश्लेषणम् | प्रो. प्रभातकुमारमहापात्र: | 1 |
| 2. | रोगविचारे अनिद्रारोगस्य कारणं प्रतिकारश्च | डॉ. रामदासशर्मा | 9 |
| 3. | मध्यमग्रहसाधनसमीक्षा | डॉ. निगमपाण्डेय: | 13 |
| 4. | आढकीशस्योत्पादने कृषिपाराशरग्रन्थकृषि-विज्ञानसम्मतयो: प्रायोगिकाध्ययनम् | डॉ. नवीनतिवारी | 22 |
| 5. | वेदवाण्यां चत्वार: पुरुषार्था: द्वे विद्ये च | डॉ. धनेशकुमारपाण्डेय: | 31 |
| 6. | श्रीकृष्णमिश्रयतिप्रणीतप्रबोधचन्द्रोदयनाटके शान्तरसविमर्श: | डॉ. सुमनचन्द्रपन्त: 'सुमन्त' | 35 |
| 7. | भारतीयशास्त्रेषु पञ्चकोषानुगुणं बालविकास: | डॉ. चक्रधरमेहेर: | 48 |
| 8. | प्रथमं छन्दसामङ्गम् | डॉ. विजयकुमारपयासी | 53 |
| 9. | मीमांसानये वेदस्यापौरुषेयत्वम् | डॉ. पवनकुमारपाण्डेय: | 62 |
| 10. | मानवजीवने खेचराणां प्रभाव: | आशीषकुमार: | 68 |
| 11. | श्रीमालिनीविजयोत्तरतन्त्रस्य सप्तदशेऽधिकारे योगय सन्दर्भे प्राणायामविवेचनम् | अभिषेककुमार-उपाध्याय: | 73 |
| 12. | शङ्कराचार्याभिमतं समाधिस्वरूपविवेचनम् | मानसी | 79 |
| 13. | मञ्जूषानुसारेण अपभ्रशानां शक्तत्वविचार: | अभिजित् घोष: | 89 |
| 14. | उपसर्गार्थचन्द्रिकादिशा अवापसृष्टधाधातोरर्थनिर्णय: | सुखदेवसाहू | 95 |

| | | | |
|---|---|---|---|
| 15. | कारकद्वितीयाविभक्त्यर्थविमर्श: | पङ्कजराउल: | 102 |
| 16. | काश्मीरस्थकाव्यशास्त्रीयाचार्याणां सिद्धान्तेषु नवाचार: | श्रीरमेशचन्द्रनैलवाल: | 109 |
| 17. | संस्कृते बालसाहित्यम् | डॉ. कुलदीपसिंह: | 119 |

**हिन्दी खण्ड**

| | | | |
|---|---|---|---|
| 18. | संस्कृत और फारसी की आन्तर्भाषिक पृष्ठभूमि और हिन्दी - उर्दू | प्रो. मनोज कुमार मिश्र | 127 |
| 19. | धर्मशास्त्रवर्णित अष्टविवाहविचार | डॉ. दीपक कुमार शर्मा | 136 |
| 20. | दादा भाई नौरोजी का सामाजिक दृष्टिकोण : विश्लेषणात्मक अध्ययनम् | डॉ. अरविन्द सिंह गौर | 143 |
| 21. | निवासयोग्य भूमि चयन | डॉ. रतनकुमार पाण्डेय | 152 |
| 22. | आचार्य विनोबा जी के चिन्तन में शैक्षिक सन्दर्भ | डॉ. नितिन कुमार जैन | 159 |
| 23. | प्राचीन भारत में लोकधर्म और महिलाएं | डॉ. चंचल गर्ग | 170 |
| 24. | स्वास्थ्यप्राप्ति व रखरखाव में योग की भूमिका | डॉ. सीमाशर्मा (कौशिक)<br>डॉ. नीलम वत्स<br>डॉ. प्रमोद चन्द्र शर्मा | 178 |
| 25. | गौतमीयन्याय एवं बौद्धन्याय के वैचारिक संघर्ष का ऐतिहासिक विश्लेषण | डॉ. यशवन्त कुमार त्रिवेदी | 185 |
| 26. | संत साहित्य व नीतिशास्त्र | सोनिया | 194 |
| 27. | डॉ. निरञ्जनमिश्रप्रणीत गङ्गावदानम् महाकाव्य में पर्यावरणचिन्तन | सुनील अमोली | 200 |
| 28. | योगद्वारा चिन्ताग्रस्त छात्रों की समस्याओं का समाधान | डॉ. संतोष गोडरा | 207 |

**आंग्ल खण्ड**

| | | | |
|---|---|---|---|
| 29. | Role of Media in Indian Politics | Dr. Yogendra Dixit | 215 |
| 30. | Defining Diplomacy through Kautilya's Arthashastra | Dr. Kumar Sambhav Pareek,<br>Dr. Saleem Ahmad | 220 |

| | | | |
|---|---|---|---|
| 31. | Sports As a Tool For Global Unity and Peace | Dr. Rajender Lal<br>Dr. Anju Luthra | 232 |
| 32. | Cultural Considerations during Pandemic : The impact of the Cancellation of cultural Events, the impact of closed Museums, Cinemas and public Events of many kinds on our cultural lives And identities | Dr. Devendra Kumar Mishra | 240 |
| 33. | Theory Of Adoption A Historical Background with a Comparison to Modern Law | Dr. Sanu Sinha | 247 |
| 34. | Conceptual Analysis of political Marketing in India | Dr. Pankaj Gupta<br>Dr. Deep Shikha Parsahar | 257 |
| 35. | Lord Krishna : A Psychiatrist | Dr. Pankaj Ghai Kaushik | 275 |
| | **शोधपत्र-प्रस्तोता नामादि-सूची** | | **282** |


✦✦✦

 ISSN : 7552-2779

# बृहत्संहितायां भूकम्पविश्लेषणम्

**प्रो. प्रभातकुमारमहापात्रः***

अद्यतनीयः विचारणीयः विषयः **बृहत्संहितायां भूकम्पविज्ञानम्** इति। विषयोऽयं संहिताशास्त्रान्तर्गतः समायाति। सम् उपसर्गः धाधातोः क्तप्रत्यये हि आदेशे संहितः इति पदं भवति। संहितः पदे टाप्प्रत्यययोगे संहिताशब्दः निष्पद्यते। सम्यक् हितं प्रतिपाद्यं यस्याः सा संहिता। यस्मिन् ग्रन्थे सामाजिकलौकिकहितानां प्रतिपादनं वर्तते, स एव ग्रन्थः संहिता-ग्रन्थ इति उच्यते, यथा वेद-संहिता, स्मृतिसंहिता इत्यादयः। संहिता-शब्दस्यार्थो भवति संयोगः, संचयः, संग्रहादिः। संहिता-संदर्भे पाणिनिः कथयति "परः सन्निकर्षः संहिता"। तथा च वर्णानाम् अतिशयसामीप्यं संहिता इति कथ्यते। अतः वर्णानां, शब्दानां, वाक्यानां च संयोगे, संचये, संगेहे च संहिता भवितुमर्हति। यस्मात् लोकहितकारिभावनादि उत्पद्यते सा एव संहिता इति कथ्यते। ज्योतिषशास्त्रे यस्मिन् भागे समष्टिगतोपकाराः विराजन्ते, यत्र राष्ट्रियहितकारिविवेचनं च विद्यते स एव भागः संहितासत्रमित्युच्यते। ज्योतिषशास्त्रस्य संहिताभागः सर्वापेक्षया विज्ञानभित्तिकविषयाणां विवेचनं प्रकटयति। तत्र ज्योतिषान्तर्गतानां विज्ञानसम्बन्धितानां विचाराणामाधारेण प्राकृतिकतत्त्वानां शुभाशुभफलानि स्पष्टीकृत्वा राष्ट्रहिताय विभिन्नानां सिद्धान्तानां प्रतिपादनं कृतमस्ति। संहिताविषये वराहमिहिराचार्येण बृहत्संहिताग्रन्थे विस्तारेण बहुविधाः विषयाः वर्णिताः। परन्तु बृहत्संहिताग्रन्थस्य द्वात्रिंशेऽध्याये(32) भूकम्पलक्षणाध्याये वराहमिहिराचार्येण अतिसूक्ष्मतया काश्यपः, गर्गः, वशिष्ठः, पराशरादीनां विभिन्नानां प्राचीनानाम् आचार्याणां मतानि उपस्थाप्य स्वकीयाः अभिविचाराः उपस्थापिताः। अत्र (शोधपत्रेऽस्मिन्) **बृहत्संहितायां भूकम्पविज्ञानम्** इति विषये प्राचीनार्वाचीनाः पक्षा मया उपस्थापिताः।

सर्वादौ भूकम्पहेतुविषये प्राचीनाचार्याणां मतोपस्थापनावसरे कश्यपस्य वचनानि मया उपस्थाप्यते यथा-

---

* प्रोफेसर (अध्यक्षः ज्योतिषविभागः), श्रीरणवीरपरिसरः, जम्मूः।

**वारुणस्योपरि पृथ्वी सशैलवनकानना।**
**स्थिता जलजसत्वाश्च सक्षोभाश्चालयन्ति ताम्।।**[1]

पर्वत-वन-काननेन पूरिता जलस्योपरि भासमाना पृथ्वी जलजन्तूनाम् आघातेन भूपृष्ठे कम्पः उत्पद्यते।

गर्गोऽपि कथयपि-

**चत्वारः पृथिवीं नागा धारयन्ति चतुर्दिशम्।**
**वर्धमानः सुवृद्धश्चातिवृद्धश्च पृथुश्रवाः।।**

**वर्धमानो दिशं पूर्वां सुवृद्धो दक्षिणां दिशम्।**
**पश्चिमामतिवृद्धस्तु सौम्याशां तु पृथुश्रवाः।।**

**नियोगाद्ब्रह्मणो ह्येते धारयन्ति वसुन्धराम्।**
**ये श्वसन्ति यदा शान्ता स वायुः श्वसितो महान्।।**

**वेगान्महीं चालयन्ति भावाभावाय देहिनाम्।**[2]

चत्वारः नागाः यथा- वर्द्धमानः, सुवृद्धः, अतिवृद्धः, पृथुवाश्रश्च पूर्व-दक्षिण-पश्चिम-उत्तरक्रमेण चतसृषु दिक्षु ब्रह्मणो निर्देशेन पृथिवीं धारयन्ति। यदा ते श्रान्ताः क्लान्ताः दिग्गजाः विश्राम्यन्ति तदा पृथिव्यां कम्पः उत्पद्यते। प्रसङ्गेऽस्मिन् बृहत्संहिताकारः दैवज्ञप्रवरः आचार्यः वराहमिहिरः कश्यपस्य तथा च गर्गस्य वचनं समुद्धृत्य स्वमतमुस्थापयति यथा-

**क्षितिकम्पमाहुरेके बृहदन्तर्जलनिवासिसत्त्वकृतम्।**
**भूभारखिन्नदिग्गजविश्रामसमुद्भवं चान्ये।।**[3]

जलमध्ये स्थितानां वृहदाकाराणां प्राणीनां कारणात् पृथिव्यां महान् कम्पः जायते। एवञ्च पृथिव्याः भारात् श्रान्तानां क्लान्तानां दिग्गजानां कारणादपि भूकम्पः भवति।

**यदा तु बलवान्वायुरन्तरिक्षानिलाहतः।**
**पतत्याशु स निर्घातो भवेदनिलसम्भवः।।**

**तस्य योगान्निपततश्चलत्यन्याहता क्षितिः।**
**सोऽभिघातसमुत्थः स्यात् स निर्घातमहीचलः।।**

---

1. बृ.सं./मूलक्षणाध्यायः/पृ.सं.-199
2. बृ.सं./मूलक्षणाध्यायः/पृ.सं.-199
3. बृ.सं./मूलक्षणाध्यायः/पृ.सं.-197

अन्तरिक्षे वायुमध्ये यः संघर्षः भवति तेन पृथिव्यां कम्पः उत्पद्यते। भूकम्पे किं कारणमस्तीति प्रसङ्गे वृद्धगर्गस्याभिमतमपि उपस्थाप्यते यथा–

**प्रजा धर्मरता यत्र तत्र कम्पं शुभं वदेत्।**
**जनानां श्रेयसे नित्यं विसृजन्ति सुरोत्तमाः।।**

**विपरीतस्थिता यत्र जनास्तत्राशुभं तथा।**
**विसृजन्ति प्रजानां तु दुःखशोकाभिवृद्धये।।**[1]

यदा जनाः धर्मेण रताः स्युः तदा तत्र जायमानः भूकम्पः तेषां हानिकरः न स्यात्। यदा जनाः अधर्मेण रताः स्युः तदा जायमानः भूकम्पः प्रजानां कृते दुःखशोकाभिवृद्धिकरः भवति।

मतान्तरे आचार्यवराहमिहिरस्योक्तिः यथा–

**अनिलोऽनिलेन निहितः क्षितौ पतन् सस्वनं करोत्यन्ये।**
**केचित्वदृष्टकारितमिदमन्ये प्राहुराचार्याः।।**[2]

अत्र आचार्यः वराहमिहिरः वसिष्ठस्य तथा वृद्धगर्गस्य वचनानि सम्मेल्य स्वमतं प्रकटितवान्।

पराशरादिमुनीनां मतं उपस्थाप्यते यथा–

**गिरिभिः पुरा सपक्षैर्वसुधा प्रपतद्भिरुत्पतद्भिश्च।**
**आकम्पिता पितामहमहामरसदसि सव्रीडम्।।**

**भगवन्नाम ममैतत्त्वया कृतं यदचलेति तन्न तथा।**
**क्रियतेऽचलैश्चलद्भिः शक्ताहं नास्य खेदस्य।।**

**तस्याः सगद्गदगिरं किञ्चित्स्फुरिताधरं विनतमीषत्।**
**साश्रुविलोचनमाननमालोक्य पितामहः प्राहः।।**

**मन्युं हरेन्द्र धात्र्याः क्षिप कुलिशं शैलपक्षभङ्गाय।**
**शक्रः कृतमित्युक्त्वा मा भैरिति वसुमतीमाह।।**

**किन्त्वनिलदहनसुरपतिवरुणाः सदसत्फलावबोधार्थम्।**
**प्राग्द्वित्रिचतुर्भागेषु दिननिशोः कम्पयिष्यन्ति।।**[3]

---

1. बृ.सं./मूलक्षणाध्यायः/पृ.सं.–200
2. बृ.सं./मूलक्षणाध्यायः/पृ.सं.–199
3. बृ.सं./मूलक्षणाध्यायः/पृ.सं.–200

स्वपक्षे: उड्डीयमानानां पर्वतानाम् आघातेन बारम्बारं प्रकम्पिता पृथिवी ब्रह्मण: सकाशे स्वकीयं कष्टं कथितवती। ब्रह्मा आदिदेश यत् इन्द्र: पर्वतानां पक्षच्छेदनार्थं वज्रप्रहारं करोतु। इन्द्रेणापि तथैवं कृतम्। परन्तु दिवसस्य पूर्वार्द्धे वायु:, उत्तरार्द्धे अग्नि: तथा रात्रौ पूर्वार्द्धे इन्द्र:, उत्तरार्द्धे वरुण: पृथिव्या: कम्पनं विदध्यात्।

तत्रापि कथितमस्ति–

**रात्रौ दिवा च पूर्वाह्ने वायव्य: कम्प उच्यते।**
**मध्याह्ने चार्द्धरात्रे च हौताशा: कम्प उच्यते।।**
**दिवारात्रौ तृतीयेंऽशे माहेन्द्रश्चाभिगीयते।**
**चतुर्थे वर्तमानेंऽशे वारुणं निर्दिशेद् बुध:।।**[1]

अत्राऽपि पूर्वार्द्धे वायु: (वायुकोण:), उत्तरार्द्धे अग्नि: (अग्निकोण:) तथा च रात्रौ पूर्वार्द्धे इन्द्र:, (पूर्वदिक्) उत्तरार्द्धे वरुण: (पश्चिमदिक्) पृथिव्या: कम्पनं भवति।

गर्गोऽपि कथयति यथा–

**कृत्वा चतुर्धाहोरात्रं द्विधाहोऽथ द्विधा निशम्।**
**देवताश्रययोगाच्च चतुर्धा भगणं तथा।।**
**पूर्वे दिनार्द्धे वायव्य आग्नेयोऽर्द्धे तु पश्चिमे।**
**ऐन्द्र: पूर्वे च रात्र्यर्द्धे पश्चिमार्द्धे तु वारुण:।।**
**चत्वार एवमेते स्युरहोरात्रविकल्पजा:।**
**निमित्त भूता लोकानामुल्कानिर्घातभूचला।।**[2]

यदा भूकम्प: भवति तदा तस्य कारणानि अपि वराहमिहिरेण बृहत्संहिताग्रन्थे तथा च गर्गेणापि स्वीये ग्रन्थे अतिविस्ताररूपेण कथितानि। उत्तराफाल्गुनी, हस्त:, चित्रा, स्वाती, पुनर्वसु:, मृगशिरा:, अश्विनी च सप्तनक्षत्राणि वायव्यमण्डलान्तर्गतानि भवन्ति। एतेषु नक्षत्रेषु यदा भूकम्प: भवेत् तदा सप्ताहात् पूर्वं आकाश: धूमेन आवृत: भवति, भूमेरुत्थिता धूलि: पृथिवीं व्याप्नोति। अतिवेगेन वायु: वहति, वृक्षान् उत्पाटयति च। सूर्यस्य किरण: अतिक्षीण: भवति।

आग्नेयमण्डलान्तर्गतानि पुष्य:, कृतिका, विशाखा, भरणी, मघा, पूर्वभाद्रपदा, पूर्वफाल्गुन्यादीनि सप्तनक्षत्राणि सन्ति। तेषु नक्षत्रेषु भूकम्प: यदि भवेत् तदा सप्तदिवसात् पूर्वं दिग्दाहेन सह तारा तथा उल्कापातो भवेत् एवं च आकाशमण्डल: प्रज्वालितो भवति। वायु: सहायेन अग्नि: विचरणं करोति।

---

1. बृ.सं./मूलक्षणाध्याय:/पृ.सं.–200
2. बृ.सं./मूलक्षणाध्याय:/पृ.सं.–205

इन्द्रमण्डलान्तर्गतानि अभिजित्, श्रवणा, धनिष्ठा, रोहिणी, ज्येष्ठा, उत्तराषाढा, अनुराधादिसप्तनक्षत्राणि सन्ति। एतेषु नक्षत्रेषु यदि भूकम्पः स्यात् तदा सप्तदिवसेभ्यः प्रागेव, पर्वतसदृशः गम्भीरशब्दयुक्ताः विद्युद्युक्ताः, महिषशृङ्गतुल्याः, भ्रमरकुलवत् कृष्णाः सर्पसदृशकान्तियुक्ताश्च भूत्वा वर्षन्ति।

वरुणमण्डलान्तर्गतानि रेवती, पूर्वाषाढा, आर्द्रा आश्लेषा, मूला, उत्तरभाद्रपदा, शतभिषादिसप्तनक्षत्राणि सन्ति। एषु नक्षत्रेषु यदि भूकम्पः भवेत् तदा सप्ताहात् प्रागेव नीलवर्णकज्जलसदृशाः, मधुरशब्दायमानाः, विद्युद्भासिताः मेघा निरन्तरं वर्षन्ति।

उपर्युक्तानि प्राचीनाचार्याणां मतानि विहाय अपरेषां आचार्यप्रवराणां मतमपि उपस्थापयामि यथा- नारदसंहितायां महामुनिनारदः भूकम्पहेतुप्रकरणे कथयति यत्- "भूकम्पः सूर्यभात्सप्तमर्क्षे" अर्थात् सूर्यः यस्मिन्नक्षत्रे विद्यते तस्मात् चन्द्रनक्षत्रं यावत् गण्यते, यदि वर्त्तमाननक्षत्रं सूर्यनक्षत्रात् सप्तमे स्थाने स्यात् भूकम्पः भवेदिति।

तदनन्तरम् आचार्यः वराहमिहिरः उल्कादि-विभिन्नानाम् उत्पातानां फलानां नियमविषये वेला मण्डलवशात् कम्पस्य फलं निष्फलत्वम् एवञ्च विशेषफलविशषे, तथा विभिन्नेषु मण्डलेषु अङ्गस्फुरणवशात्, उपद्रवकारणात् फलानि च आलोचितवान्। आचार्यः भूकम्पलक्षणाध्यायस्य अन्तिमभागे कथयति यथा-

**चलयति पवनः शतद्वयं शतमनलो दशयोजनान्वितम्।**
**सलिलपतिरशीतिसंयुतं कुलिशधरोऽभ्यधिकं च षष्टितः॥**[1]

मण्डलानुसारं पृथिव्यां योजनात्मकं कम्पनविषये आचार्यः कथयति। यथा- वायुमण्डले भूकम्पः भवेत् चेत् पृथिव्याः कम्पनं द्विशतयोजनात्मकं भवति, अग्निमण्डले कम्पनं द्विशतयोजनात्मकं भवति, वारुणमण्डले एकशताशीतियोजनात्मकम्, एवञ्च ऐन्द्रमण्डले षष्ठ्याधिकयोजनात्मकं कम्पनं भवतीति।

भूकम्पानन्तरं यदि पुनः भूकम्पः भवति तस्य फलं किमिति आचार्यः कथयति यथा-

**त्रिचतुर्थसप्तमदिने मासे पक्षे तथा त्रिपक्षे च।**
**यदि भवति भूमिकम्पः प्रधाननृपनाशनो भवति॥**[2]

भूकम्पानन्तरं यदि पुनः तृतीये, चतुर्थे, सप्तमे, पञ्चदशे, त्रिंशत् अथवा पञ्चदशदिवसे, भूकम्पः भवति चेत् प्रधानराज्ञः नाशो भवति इति।

---

1. बृ.सं./मूलक्षणाध्यायः/पृ.सं.-205
2. बृ.सं./मूलक्षणाध्यायः/पृ.सं.-206

प्राचीनानां वचनानि उपस्थाप्य अर्वाचीनानां वैज्ञानिकानाम् अभिमतानि मया उपस्थाप्यन्ते।

भूमौ पाषाणानां घर्षणेन विघटनेन विभिन्न स्तरीयतलगतविच्छेदनेन च भूकम्पः आगच्छति। बहुवर्षेभ्यः पूर्वं भूकम्पः आगच्छतीति तत्र प्राकृतिकं वा स्वाभाविकं वा कारणं जनाः मन्यन्ते स्म। किन्तु कालान्तरे बहूनि अनुसन्धानानि विहितानि। येन ज्ञातं यत् पृथिव्याः वैवर्त्तनिकपरिवर्त्तनेन भूकम्पः भवति। भूमिगतपरिवर्त्तनेन पाषाणघर्षणेन मृत्स्खलनेन समुद्रस्य अत्युच्चतरङ्गाघातेन पृथिव्याः तले कम्पनं विस्फोटनं वा आयाति, अपि च वायुवेगोऽपि यदा वर्द्धते तदा भूकम्पः सुनामी नाम्ना अभिधीयते। 2005तमे वर्षे हिन्दमहासागरे दक्षिणभारतस्य समुद्रतटे तथा अण्डमाननिकोवार द्वीपेऽपि सुनाम्याः प्रभावः आसीत्। तस्मिन् काले वायोः प्रभावः वेगेन जातः, प्रायः 800 कि.मि. प्रतिहोरात्मकवेगेन प्रभवति स्म। अनेन स्वाभाविकरूपेण जनसामान्यस्य तथा वनसम्पत्तेः नाशः भवनानामपि दुस्थितिः अभवत्। पर्णशालासु ये जनाः वसन्ति तेषां तु सर्वाणि वस्तूनि इतस्ततः विनष्टानि जातानि। अनेन सामाजिकी क्षतिः जैविकी क्षतिः जीवानां क्षतिश्च अधिकाधिकतया द्रष्टुं शक्यते।

People believed that the breaks in the Earth's surface-faults-which appear after earthquakes, were caused *by* the earthquakes rather than the cause *of* them. It was Bunjiro Koto, a geologist in Japan studying a 60-mile long fault whose two sides shifted about 15 feet in the great japanese earthquake of 1871, who first suggested that earthquakes were caused by faults, Henry Reid, studying the great San Francisco earthquake of 1906, took the idea further. he said that an earthquake is the huge amount of evergy released when accumulated strain causes a fault to rupture. He explained that rock twisted further and further out of shape by continuing forces over the centuries eventually yields in a wrenching snap as the two sides of the fault slip to a new position to relieve the strain. This is the idea of "elastic rebound" which is now central to all studies of fault rupture.

An earthquake is a sudden movement of the earth's surface. You can find out about current earthquakes here.

Cause of Earthquakes

**The causes of earthquakes may be divided into three groups (i) surface causes, (ii) volcanic causes and (iii) tectonic causes.**

1. क्षितितलीयकारणम् 2. ज्वालामुखीयकारणम् 3. वैवर्त्तनीयकारणम्।

**(i) Surface causes:**

Great explosions, landslides, slips on steep coasts, dashing of sea waves, avalanches, railway trains, heavy trucks, some large engineering projects cause minor tremors. Some of them are man made, others are natural.

क्षितितलीयहेतुः यथा- सुदीर्घविस्फोटकानि, भूस्खलनानि, तटीये भूभागे, समुद्रीयतरङ्गानां प्रवाहः हिमस्खलनं, रेलयानानि, बृहद्वाहनानि, सुदीर्घ अभियान्त्रिकपरियोजनाः इत्यादिषु काश्चन मानवनिर्मिताः काश्चन प्राकृतिकीयसमस्याः भवन्ति।

**(ii) Volcanic causes:**

Vocanic eruptions produce earthquakes. Earthquakes may precede, accompany and frequently follow wolcanic eruptions. They are caused by sudden violent displacments of lava within or beneath the conduit of the valcano.

ज्वालामुखीहेतुः यथा- ज्वालामुखीयविस्फोटकद्वारा भूकम्पस्योपपत्तिः भवति। ज्वालामुखीयविस्फोटनात्पूर्वम् अथवा विस्फोटनसमये भूकम्पः आगच्छति। वायोः प्रवाहेण विकरालभूकम्पस्य रूपं धारयति।

**(ii) Tectonic causes:**

Structural disturbances resulting in the relative displacements of the parts of the lithosphere is the main cause of this type of earthquake. Most of the disastrous earthquakes belong to this category and occur in areas of great faults and fractures. Sudden yielding to strain produced on the rocks of accumulating stress causes displacements especially along old fault zones known as great transform faults.

Reid proposed the idea of elastic rebound hypothesis. Stresses accumulate on the two sides of the fault plane and produce strain. The rock deforms bends and when the stress crosses the elastic limit, sudden displacement of the two sides of the fault plane takes place. This results in a strong blow to the rocks Elastic rebound and produces tremors.

Earthquakes often occur on the ocean floor. This produces large sea waves known as tsunami that produces devastating effects on the sea coasts. Recently, the tsunami produced by the earthquake near the Sumatra coast affected far of places like Srilanka and South India and even African coast.

Tectonic earthquakes are classified according to their depth of origin into:

**(i) Normal-** When the depth of origin is less than 50 km.

**(ii) Intermediate-** When the depth is in between 50 to 400 km and

**(iii) Deep seated-** When the depth is more than 400 km.

वैवर्त्तनीयहेतुः यथा- बृहदाकारनिर्मितभवनद्वारा पृथिव्यां स्खलनं भवति। येन कारणेन भूकम्पः भवति। दोषपूर्णनिर्माणमथवा भवनानां भग्नतायाः कारणात् भूतलं विभक्तं भवति येन भूकम्पः आगच्छति। पृथिवीतलतः जलस्य अधोभागे 50 कि.मी. तः 400 किः मीटरं यावत् अस्य भूकम्पस्य प्रभावो भवति।

सर्वान्ते उभयोः पक्षयोः विषये यदि विचारयामः तदा प्राचीनानां पक्षाः पौराणिकी कथावदनुमीयन्ते। परन्तु प्राचीनविचाराणां तथा अर्वाचीनानां विचाराणां मध्ये बहु सामञ्जस्यं दृश्यते। एतदतिरिच्य अन्यानि कारणानि सन्तीति यदि चिन्त्यते तर्हि तत्र भवन्ति एव प्रमाणानीति। विरम्यते।

**सन्दर्भग्रन्थाः-**

1. बृहत्संहिता। प्रकाशकः-विद्याभवन संस्कृत ग्रन्थमाला।
2. भद्रबाहुसंहिता।
3. नारदसंहिता।
4. बृहत्संहिता (English Commentary)
5. गर्गसंहिता
6. Internet

✦✦✦

# ज्योतिषशास्त्रदृष्ट्या रोगविचारे अनिद्रारोगस्य कारणं प्रतिकारश्च

डॉ. रामदासशर्मा*

रोगविचारविषये प्रश्नमार्गे ग्रन्थकारः लिखति-

**निर्णीते सति जीवने खलु रुजां शान्त्यै चिकित्सां वदे-**
**दज्ञातेषु गदेषु दुष्करतरा सा चापि यस्मात्ततः।**
**कर्त्तव्यो गदतत्त्वबोध इह तद्बोधाय भेदा रुजां**
**कथ्यन्ते खलु तत्र रोगशमने कार्याः क्रियाश्चोचिताः॥**[1]

जीवनकाले पूर्वोक्तरीत्या रोगनिर्णयानन्तरं रोगोपशमनार्थं चिकित्साविषये अवश्यं वक्तव्यम्। कारणं यत् रोगस्य निदानं विना तत्र चिकित्साविषये कथनन्तु अतीव कठिनतरं कार्यम्। ततः रोगानां भेदज्ञानार्थं रोगविषयकतत्त्वानां ज्ञानं करणीयम्। रोगानां शान्तिनिमित्तं प्रकरणेऽस्मिन् आवश्यकीयं कार्यमुचितं क्रियायाः विधिरपि कथितम्।

पुनश्च ग्रहस्थितिवशात् रोगविषये प्रश्नमार्गे ग्रन्थकारेण लिख्यते यत्-

**तत्तदुक्तामया वाच्या अनिष्टस्थानगैः ग्रहैः।**
**इष्टस्थितैस्तथारोग्यं तदेवाथ निगद्यते॥**[2]

अनिष्टस्थाने स्थितग्रहस्यानुसारं रोगविषये कथनीयम्। शुभे स्थाने स्थिते ग्रहानुसारमारोग्यतामपि वक्तव्यम्। निरोगसूचकग्रहयोगविषये प्रश्नमार्गे लिखितमस्ति यत्-

**पापाः लाभतृतीयगाः सहजवैर्यन्त्याष्टमेभ्योऽन्यगाः**
**सौम्या मान्दिरपि त्रिकोणमृतिकेन्द्रेभ्योऽपरत्र स्थितः।**
**सर्वेऽमी कथयन्त्यनामयतनुं प्रष्टारमेवं स्थिताः**
**रोगग्रस्तकलेवरं च कथितेभ्योऽन्यत्र ते संस्थिताः॥**[3]

---

* सहाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः, जम्मूः

1. प्रश्नमार्ग, प्रो. शुकदेव चतुर्वेदी 1 ख, 12 अ. श्लो. सं.-1
2. भुवनदीपकम्, प्रश्न-माग-1 ख. 12 अ. श्लो.सं.-2
3. ज्योतिष और रोग, ज.एस. वासिम

यस्य जन्मकुण्डल्यां पापग्रहाः तृतीये एकादशे च स्युः, तृतीय-षष्ठ-द्वादश-अष्टमस्थानानि विहाय अन्येषु स्थानेषु शुभग्रहाः स्युः गुलिकमपि त्रिकोण-अष्टम-केन्द्रस्थानेभ्यः अन्यस्थाः स्युस्तदा जातकः स्वस्थः नीरोगी भवेत् अन्यथा रोगग्रस्तो भवेत्। बृहत्पाराशरहोराशास्त्रे षष्ठभावफलाध्याये रोगदिविषये पराशरः कथयति-

**स्वभे षष्ठाधिपः पापे देहे वाऽप्यष्टमे स्थितः।**
**तदा भवेद् व्रणो देहे भावराशिगतेऽङ्गके॥**

**तेषामपि व्रणं वाच्यमादित्येन शिरोव्रणम्।**
**इन्दुना च मुखे कण्ठे भौमेन ज्ञेन नाभिषु॥**

**गुरुणा नासिकायां च भृगुणा नयने पदे।**
**शशिना राहुणा कुक्षौ केतुना च तथा भवेत्॥**

**लग्नाधिपः कुजक्षेत्रे बुधक्षेत्रेऽपि वा स्थिते।**
**यत्र कुत्र स्थितो ज्ञेन वीक्षितो मुखरुक्प्रदः॥**[1]

पापग्रहः षष्ठेशः यदि षष्ठे, लग्ने अथवा अष्टमे स्यात् तर्हि जातकस्य षष्ठभावाश्रिताङ्गे व्रणो भवति। यदि षष्ठेशः रविः षष्ठे, लग्ने अथवा अष्टमे स्यात् तदा शिरोव्रणः, चन्द्रमा स्यात् मुखव्रणः, भौमेन कण्ठव्रणः, बुधेन नाभिगतव्रणः, गुरुणा नासिकाव्रणः, शुक्रेण नेत्रव्रणः, शनिना पादव्रणः, राहुकेतुभ्याम् उदरव्रणः, भवेत्। लग्नेशः यदि मेषे वृश्चिके वा अथवा कन्यायां मिथुने वा स्थित्वा बुधदृष्टे सति मुखव्रणः वक्तव्यः। रोगविषये मन्त्रेश्वरः फलदीपिकायां कथयति-

यदि सूर्यः रोगकारकभूत्वा स्थितो भवेत् तदा पित्तः, उष्णज्वरः, शरीरे ज्वलनं, अपस्मारः, हृद्रोगः, नेत्ररोगः, क्रोडरोगः, चर्मरोगः, अस्थिस्त्रुत्यादिरोगाः, भवेयुः एव चन्द्रमावशात् निद्रारोगः अर्थात् अधिकनिद्रा अथवा अनिद्रारोगः, आलस्यः, कफः, अतिसारः, पिटकः, शीतज्वरः, मन्दाग्निः, अरुचिरोगः, शैथिल्यतारोगः, रक्तविकारादि भवन्ति। मङ्गलग्रहात् तृष्णारोगः, वातजनितः पित्तप्रकोपः, पित्तज्वरः, नेत्ररोगः, आपेन्डिक्साइड्, अपस्मारः, मज्जारोगः, कण्डुरोगः, चर्मरोगः, देहभङ्गादि भवन्तीति।

बुधात् भ्रान्ति, विस्मरणं, व्यर्थचिन्ता, मिथ्याचिन्ता, कारणं विना भयं, नेत्ररोगः, गलरोगः, नासिकारोगः, वात-पित-कफादित्रिदोषादुत्पन्नज्वरः, चर्मरोगः, पीलियारोगः, दुःस्वप्नः, कण्डुरोगाद्युतपन्नो भवेत्। बृहस्पतेः कारणात् टाईफइड्रोगः एपिण्डिसात्रटीजरोगः, कफरोगः, कर्णरोगः, मूर्छादिरोगाः उत्पद्यन्ते।

---

1. बृहत्पाराशरहोराशास्त्रम् पराशरः

शुक्रग्रहात् रक्तहीनता, कफवायुदोषकारणात् नेत्ररोगः, मूत्ररोगः, प्रमेहः, जननेन्द्रियरोगः, मूत्राशये कष्टः, अण्डकोषवृद्धिः, क्षीणवीर्यः, सम्भोगे अक्षमता, शुष्कशरीरम्, अति संभोगकारणात् शरीरक्षीणता भवति। शनिकारणात् वातकफजनितरोगः, पादेन कष्टोत्पन्नः, अत्याधिकः श्रमवशात् दुःखं, भ्रान्तिः, कुक्षरोगः, शरीरे अधिकोष्णता, मानसिकोऽवशादः, वृक्षात् प्रस्तराद् आघातादि भवन्ति। राहुग्रहः हृद्रोगः, हृदि अधिकः तापः, कोढ़ः, दुर्मति, भ्रान्तिः, पादपीडादिकरोतीति।

संप्रति ज्योतिर्विदः जगन्नाथभसीनमहोदयस्य **'ज्योतिष और रोग'** ग्रन्थे दशमाध्याये सुदर्शनपद्धत्याः रोगविचारप्रसङ्गे ग्रन्थकारः कथयति यत् महर्षिपराशरस्य बृहत्पाराशर्या सुदर्शनचक्रस्योल्लेखः वर्तते। सुदर्शनशब्देन बोधो जायते यत् 'सु' अर्थात् सुष्ठु अथवा सुन्दरतया 'दर्शनम्' अर्थात् वास्तविकस्थितिनां स्पष्टीकरणम्। अनया पद्धत्या यानि अङ्गानि पिडितानि न केवलं जन्मलग्नात् परन्तु चन्द्रलग्नात् सूर्यलग्नात् वा अस्य विचारो भावाधिपत्यानुरोधेन करणीयः। एतेन त्रयाणां लग्नानुरोधेन यः निष्कर्ष आगच्छति तस्य सम्मिलितस्य फलेन एकः सुनिश्चितः फलादेशः जनान् आश्चर्यचकितः कारयतीति।

निद्राहीनता अनिद्रा वा रोगस्य विभिन्नानि कारणानि सन्ति। यत्र अत्यधिकं मानसिकं चिन्तनं भवति तत्र अनिद्रायाः कारणं भवति। निद्रायाः सम्बन्धः द्वादशभावेन सह वर्त्तते। कारणं यत् यत्र नेत्रस्य संबन्धः द्वादशभावेन सह वर्तते तत्र शय्यायाः विलासस्थानमपि द्वादशस्थानमेव भवति। एवञ्च निद्रा शय्यायाः सर्वाधिकं विलासस्थानमुच्यते। अतः यदि जातकः त्रि-द्वादशभावात् तथा तस्य अधिपः पृथक् भवेत् तदा सः जातकः निद्रारोगेण पीडितो भवति। अत्र पृथकताशब्दस्यार्थः ग्रन्थकारः ज्योतिर्विद् जगन्नाथभसीत् प्रतिपादयति यत् निद्रास्थानतः निद्राधिपतिः यदि पृथक् भवेत् तदा अनिद्रारोगः भवति। पुनश्च पराशरमतानुसारं सुदर्शनप्रक्रियानुसारं च लग्नानुरोधेनातिरिच्य चन्द्रलग्नं तथा सूर्यलग्नानुसारं द्वादशस्थानं तथा तस्य अधिपतिः तयोः मध्ये पृथकजानकः प्रभावः यदि



आगच्छति तदा जातकस्य निद्राहीनता रोगस्य प्राबल्यता निश्चितमनुभवामः। अत्र अस्य रोगस्योदाहरणार्थं कस्यचिद् एकस्य जातकस्य जन्मकुण्डली प्रदर्श्यते।

अत्र पश्यन्तु जन्मलग्नानुरोधेन द्वादशस्थानं प्रति दशमस्थस्य शनेः तृतीयदृष्टिः षष्ठस्थः राहु-सूर्ययोः सप्तमदृष्टिः वर्तते। पुनश्च द्वादशेशस्य बृहस्पतेरुपरि राहोः दृष्टिः तथा राहुणा सह सूर्यः वर्तते अतः बृहस्पतेरुपरि सूर्यस्य प्रभावोऽपि विद्यते। ततः बृहस्पतेरुपरि राहु-सूर्ययोः प्रभावो वर्तते।

चन्द्रलग्नानुरोधेन चन्द्रलग्नस्य द्वादशेशः सूर्यः राहुणा प्रभावितः। तस्योपरि केतोः नवमदृष्टिः वर्तते। यद्यपि द्वादशभावस्योपरि गुरोः दृष्टिः वर्तते, परन्तु गुरुः स्वयं केतोरधिष्ठितस्य राशेः स्वामी। अत्र बृहस्पतिः केतुवत् यद्यपि द्वादशभावस्योपरि गुरोः दृष्टिः वर्तते, परन्तु गुरुः स्वयं केतोरधिष्ठितस्य राशेः स्वामी। अतः बृहस्पतिः केतुवत् प्रभवति द्वादशेशेन सह पृथकताजनकः प्रभावं जनयति।

सूर्यलग्नात् यदि विचार्यते चेद् द्वादशेशस्योपरि गुरोः केन्द्रः प्रभावोऽस्ति एवञ्च तस्योपरि पृथकताजनकः पापमध्यत्वमपि अस्ति कारणं यत् एकस्मिन् भागे चतुर्थभावस्योपरि शनेः तथा राहोः दृष्टिः, अपरेस्मिन् भागे सूर्यः तथा राहोः प्रभावः षष्ठस्थानस्योपरि वर्त्तते। अतः सुदर्शनप्रक्रियायां द्वादशभावस्योपरि पृथकजनकः प्रभावकारणात् अनिद्रारोगः संपद्यते।

मानसिकी अस्थिता अनिद्रारोगस्य अन्यतमं कारणम्। कालनरस्य शिरोभागं सूचयति मेषराशि तथा च सूर्यमहाग्रहः। मनकारकः ग्रहः चन्द्रः। अतः यदि जातकस्य जन्मकुण्डल्यां मेशराशिः, रविग्रहः तथा चद्रग्रहोऽपि पापेन पीडितो भवति तदा निश्चितमुपरोक्तः ग्रहयो दशान्तर्दशायां अनिद्रारोगः करोतीति।

अनिद्रारोगस्य निराकरणार्थं लग्नात्, चन्द्रलग्नात्, सूर्यलग्नात् वा द्वादशाधिपस्य कृते उपायाः करणीयाः। मङ्गलः, चन्द्रः, सूर्यस्य चापि पूजादिकं करणीयम्। अनिद्रारोगोत्पादकाः ग्रहाणां कृते शाबरमन्त्राणां प्रयोगाः करणीयाः। ग्रहाणां देवतानां पूजनं विधिपूर्वकं करणीयम्। विशेषतः चन्द्रस्य पूजनं महादेवस्य सोमवासरे विशेषपूजनम् कर्त्तव्यम्। ग्रहसम्बन्धितं जपः, होमः, दानादिकार्यं अवश्यं कर्त्तव्यम्।

✦✦✦

# मध्यमग्रहसाधनसमीक्षा

-डॉ. निगमपाण्डेयः*

भारतीयज्योतिषशास्त्रस्य मुख्यधाराः ग्रहनक्षत्राणि वर्तन्ते। सिद्धांत-संहिता-होरारूपेण ज्योतिषस्य स्कन्धत्रयं वर्तते। त्रिषु स्कन्धेषु ग्रहर्क्षाणां प्रयोजनं वर्तते, तेषां विना ज्योतिषशास्त्रस्य कल्पनां नैव कर्तुं शक्यते। एतानि ग्रहर्क्षाणि अस्मिन् सौरमण्डले भूकेन्द्राभिप्रायेण स्व-स्वकक्षायां स्वकीयमध्यमगत्या भ्रमन्ति। ग्रहाणां मध्यमगतिस्तु समानमेव परन्तु प्रतिक्षणं विलक्षणा स्फुटा गतिः भवति। सर्वेऽपि ग्रहाः स्वकीये प्रतिमण्डले भ्रमन्तः भूपृष्ठस्थैः जनैः कक्षावृत्ते यस्मिन् प्रदेशे दृश्याः भवन्ति तत्र स्फुटग्रहस्थानम्, मध्यमग्रहस्तु ततोऽग्रे पृष्ठे वा फलतुल्यान्तरेण तिष्ठति। साधनक्रमे ग्रहाः कक्षावृत्तीया एव भवन्ति। कक्षावृत्तस्य केन्द्रं भूकेन्द्रं भवति परन्तु ग्रहभ्रमणवृत्तस्य प्रतिवृत्ताख्यस्य भूकेन्द्रापेक्षया अन्त्यफलज्या तुल्यान्तरे भवति येन स्फुटग्रहो अनुपातसिद्ध-मध्यमग्रहापेक्षया किञ्चिद् फलतुल्यमन्तरितो भवति। ग्रहस्यैकदिनात्मिका मध्यमागतिर्ज्ञानार्थं अनुपातः क्रियते। युगकुदिनैः कल्पकुदिनैः वा यदि ग्रहस्य युगभगणाः कल्पभगणाः वा लभ्यन्ते तदैकेन कुदिनेन किमिति, तदा एकस्मिन् सावनदिने तद्ग्रहस्य मध्यमा गतिः भवति।

$$\frac{\text{युगभगणाः कल्पभगणाः वा} \times 1}{\text{युगकुदिनैः कल्पकुदिनैः वा}} = \text{ग्रहस्य दैनिकी मध्यमा गतिः}$$

प्रायेषु सर्वेषु सिद्धान्तग्रन्थेषु मध्यमग्रहानयनं वर्तते तेषु ग्रन्थेषु सूर्यसिद्धान्तः, सिद्धान्तशिरोमणिः, पंचसिद्धान्तिका, ग्रहलाघवश्च वर्तते। सूर्यसिद्धान्ते अस्ति यतः-

**यथा स्वभगणाभ्यस्तो दिनराशि : कुवासरैः।**
**विभाजितो मध्यगत्या भगणादिग्रहो भवेत्।।**[1]

---

* सहायकाचार्यः, ज्योतिषविभागः
धर्म-समाज-संस्कृत-महाविद्यालयः, मुजफ्फरपुरम्

1. सूर्यसिद्धान्तः मध्यमाधिकारः श्लो. सं. 53

ततो यद्येकस्मिन् सावनदिने मध्यमग्रहगतिः तदाऽभीष्टसावनाहर्गणे किमिति फलं भगणादिको मध्यमग्रहो भवति। अस्माकं सिद्धान्तग्रन्थेषु ग्रहर्क्षणां युगे कल्पे वा भगणाः पठिताः सन्ति। तत्रैव युगे कल्पे वा सावनदिनसंख्या पठिता सन्ति तद्वशात् यदि कल्पकुदिनैः कल्पग्रहभगणाः लभ्यन्ते तदा अहर्गणेन किमिति तदा ग्रहस्य भगणादिः स्थितिः भवति।

| | | |
|---|---|---|
| कल्पग्रहभगणाः | = | अहर्गणः |
| कल्पकुदिनैः | = | भगणादिको मध्यमो ग्रहः |
| युगग्रहभगणाः | = | अहर्गणः |
| युगकुदिनैः | = | भगणादिको मध्यमो ग्रहः |

तत्र भगणादिमध्यमग्रहः ज्ञानार्थं अहर्गणस्य आवश्यकता भवति। अहर्गणेन विना मध्यमग्रहं ज्ञातुं नैव शक्यते। प्रमुखसिद्धान्तग्रन्थेषु अहर्गणस्यानयनं विद्यते। मध्यमग्रहसाधन-समीक्षणार्थं प्रमुखाणां सिद्धान्तग्रन्थानां अहर्गणस्य आवश्यकता भवती। सूर्यसिद्धान्ताग्रन्थस्य अहर्गणानयनं क्रियते। यथा-

**अत ऊर्ध्वममी युक्ता गतकालाब्दसंख्यया।**
**मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः**
**पृथक्स्थास्तेऽधिमासघ्नाः सूर्यमासविभाजिताः।**
**लब्धाधिमासकैर्युक्ता दिनीकृत्य दिनान्विताः**
**द्विष्ठास्तिथिक्षयाभ्यस्ताश्चन्द्रवासरभाजिता :**
**लब्धोनरात्रिरहिता लङ्कायामार्धरात्रिकः**
**सावनो द्युगणः सूर्याद्दिनमासाब्दपास्ततः**
**सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः**[1]

वर्तमानदिने ग्रहाणां वर्तमानस्थितिज्ञानार्थं दिनगणज्ञानमावश्यकम्। अतः कल्पदिनैः युगदिनैः वा ग्रहाणामेते कल्पभगणाः युगभगणाः वा भवन्ति तदा वर्तमानदिनसङ्ख्यायां किमिति तत्तद् ग्रहस्थितिमितिज्ञानमहर्गणानुपातापेक्ष्यं भवति। अर्थात् सृष्ट्यादितो युगान्तकालिनगतसौराब्दसंख्यया खचतुष्कयमाद्रयग्निशररन्ध्रनिशाकरा (1953720000) इत्यनया कृतान्तादभीष्टयुगस्य वर्तमानकालं यावत् संख्यां संयोज्य सृष्ट्यादितोऽभीष्टं यावत् गतसौराब्दाः ज्ञेयाः द्यगत सौरवर्षाणां मासकरणार्थं द्वादशगुणितास्तदाऽभीष्टवर्षादौ

1. सूर्यसिद्धान्तः मध्यमाधिकारः श्लो. सं. 48-30

गतसौरमासाः भवन्ति। तेषु चैत्रादिगतचन्द्रमासतुल्याः सौरमासाः योज्यन्ते तदा ते चाभीष्ट-सङ्क्रान्त्वधिकाः सौरमासाः भवन्ति। सौरचन्द्रमासयोरन्तरम् अधिमासाः भवन्ति। अतोऽभीष्ट-सौरमासानां चन्द्रमासकरणार्थं अधिमासानयनमं क्रियते। यदि पाठपठितयुगसौरमासैः युगधिमासाः लभ्यन्ते तदाऽभीष्टसौरमासैः किमिति सावयवाऽभीष्टाधिमासाः प्राप्यन्ते

अथात्

युगाधिमासाः x इष्टसौरमासाः = अभीष्टाधिमासाः

युगसौरमासाः

+ अधिशेष

युगसौरमासाः

एभिरधिमासैः साधिशेषैः यदि अभीष्टसौरमासाः युक्ता क्रियन्ते तदाऽभीष्ट-संक्रान्तिकालिकाश्चन्द्रमासाः भवन्ति। ते चन्द्रमासास्त्रिंशद्गुणिता दर्शान्ते चन्द्रदिवसाः वा तिथयः भवन्ति। एतेषु अमान्तादभीष्टदिवसपर्यन्तं या गततिथयस्ता योज्यन्ते चेत् गतासंन्नतिथ्यन्ते चन्द्रदिवसाः भवन्ति। पुनः सावनदिवसकरणार्थं चन्द्रदिवसानाम् अवमानयनम्। यदि पठितयुगचन्द्रदिवसैः पठितावमानि लभ्यन्ते तदा एभिरिष्टैः चन्द्रदिवसैः कानीति।

अर्थात्

युगावम x इष्टचन्द्रः

युगचन्द्रः = इष्टावमः

इष्टावमः + अवमशेषः

युगचन्द्रः

अत्र एभिरिष्टावमैः साधिशेषैः यदि अभिष्टसौरमासाः ऊना क्रियन्ते तदा गततिथ्यन्तकाले ते सावनदिवसाः भवेयुः इनोदयद्वयान्तरं तदर्कसावनं दिनम् अतोऽनया सावनदिनपरिभाषया सावनदिवसः सूर्योदये सिद्ध्यति।

**तिथ्यन्त सूर्योदययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषम्।**
**त्यक्तेन तेनोदयकालिकः स्थात्तिथ्यन्तकाले द्युगणोऽन्यथातः**[1]**॥**

सावनदिवसारम्भस्तु सूर्योदये भवति परन्तु सूर्यसिद्धान्तानुसारेण साधितोऽहर्गणः लङ्कायामर्धरात्रिकालिको भवति। अनेन अहर्गणेन मध्यमग्रहानयनं क्रियते सदनन्तरं स्पष्टग्रहसाधनं भवति। उपर्युक्तः साधितः अहर्गणः सिद्धान्तरित्या अस्ति। अहर्गणस्या-नयनप्रक्रिया सर्वेष्वपि सिद्धान्त-तंत्र-करण ग्रन्थेषु प्रदत्तास्ति। तत्रापि सिद्धान्ते कल्पादितो

1. सिद्धान्तशिरोमणिः गोलाध्यायः म.ग. वा. श्लो. सं 18

तन्त्रे युगादितो करणे च इष्टशकादितो अस्यानयनं कृत्वा ग्रहसाधनं भवति। मध्यम-ग्रहसाधनप्रसङ्गे करणरित्या अहर्गणसाधनं कृत्वा मध्यमग्रहसाधनं क्रियते। करणग्रन्थस्य प्रसिद्धग्रन्थः गणेशदैवज्ञकृत् ग्रहलाघवः तथा च वाराहमिहिरकृत् पञ्चसिद्धान्तिका वर्तते। तयोः ग्रन्थयोः अहर्गणसाधनं कृत्वा मध्यमग्रहसाधनसमीक्ष्यते। सर्वप्रथमं ग्रहलाघवस्य अहर्गणसाधनं क्रियते।

**द्वयब्धीन्द्रोनितशक् ईशहृत् फलं स्याच्चक्राख्यं रविहतशेषकं तु युक्तम्**
**चैत्राद्यैः पृथकमुतः सदृग्घ्नचक्राद् दिग्युक्तादमरफलाधिमासयुक्तम्॥**
**खत्रिघ्नं गततिथियुङ्निरग्रचक्राङ्गाशाढ्यं पृथगमुतोऽब्धि षट्कलब्धैः**
**ऊनाहैर्वियुतमहर्गणो भवेद्वै वारः स्योच्छरहतचक्रयुग्गणोब्जात्**[1]

संवत् 2078 शक : 1943 चैत्रशुक्लप्रतिपदा मंगलवासरः दिनांकः- 13-4-2021

1943-1442 = 501

11)501(45 चक्रम् - 45
44 शेषम् - 6
61 55
6

6 x 12 = 72.

2 x 45 + 10 = 100 + 72 = 172.

33)172(5
-165
7

72+5 = 77x30 = 2310

6)45(7
42
3

2310 + 7 = 2317

---

1. ग्रहलाघवम् मध्यमाधिकारः श्लो. सं. 4-5

64)2317(36

192

397

384

13

2317 − 36 = 2281

2281 अहर्गणे सैको क्रियते 2281+1 = 2282 वास्तविको अहर्गणः

ग्रहलाघवपद्धत्या अहर्गणेन रविसाधनं क्रियते

**स्वखनगलवहीनो द्युव्रजोऽर्कयुक्राः।**
**खतिथिहृतगणोनो लिप्तिकास्वंशकाद्याः॥**

**गगनमनुहतिरिन्दुः स्वाद्रिभूभागहीनः।**
**खमनुहृतगणोनो लिप्तिकास्वंशपूर्वः॥**[1]

उपर्युक्तश्लोकानुसारेण रविसाधनम्

अहर्गणः 2282

70)2882(32/36/00

42 x 60 − 2240

2520

0 − 2520

2282/00/00

− 32/36/00

2249/24/00 अंशादिः

150) 2282 (15/12

150

782

750

1. ग्रहलाघवम् मध्यमाधिकारश्लो. सं. 10

32x60

1920

− 1800

120

15/12 कलादि

2249/24/00

− 15/ 12

2248/8 148

30)2248(74

210

148

−120

28

74/28/8/48

12)74(6

72

2

2/28/8/48

राश्यादि रविः 2/28/8/48

ग्रहलाघवानुसारेण रवेः ध्रुवा − 0/1/49/11 अस्ति

रवेः क्षेपकः 1/19/41/0 अस्ति

नियमानुसारःचक्रगुणितः ध्रुवा

0/1/49/11

x45

0/45/2205/495

+36/ +8 / +480

81/ 2213 /15

1/21/53/15

2/28/8/48

−21/53/15

1/6/15/33

1/6/15/33

\+ 11/19/41/0 क्षेपकः

0/26/6/33 ग्रहलाघवीयमध्यमसूर्यः

**अत्र रोमकमतेन अहर्णसाधनं क्रियते।**

**सप्ताश्विवेदसंख्यं शककालमपास्य चैत्रशुक्लादौ**

**अर्द्धास्तमिते भानौ यवनपुरे सोमदिवसाद्ये**

**मासीकृते समासे द्विष्ठे सप्ताहतेऽष्टयमपक्षैः।**

**लब्धैर्युतोऽधिमासैस्त्रिंशद्घ्नस्तिथियुतो द्विष्ठः।**

**रुद्रघ्न समनुसरोलब्धोनो गुणखसप्तभिर्द्युगणः।**

**रोमकसिद्धान्तेऽयं नातिचिरे पौलिशेऽप्येव।**[1]

संवत् 2078 शक : 1943 चैत्रशुक्लप्रतिपदा मंगलवासरः दिनांकः 13 – 4 – 2021

इष्टशक : 1943

− 427

1516

1516x12 = 18192

18192x7 = 127344

228)127344(558/31    558 +1 =559

− 1140

1334

−1140

1. पंचसिद्धान्तिका करणावतार : श्लो.सं 8–10

1944
−1824
120x60
7200
− 684
360
− 228

18192 + 559 =18751

1875 x 130=562530

562530 x 11=6187830

6187830 + 514 = 6188344

703)6188344(8802
− 5624
5643
− 5624
1944 8802+1=8803
−1400
538

562530 − 8803 = 553727

रोमकसिद्धान्तीयाहर्गण: 553727

**रोमकमतेन मध्यमसूर्यसाधनम्**

**रोमकसूयौ द्युगणात् खतिथिघ्नात् पञ्चकर्तुपरिहीणात्**
**सप्ताष्टकसप्तकृतेन्द्रियोद्धतान्मध्यम: क्रमश:।[1]**

अहर्गणात् खतिथि: गुणितात् तत: पञ्चकर्तुरहितात् सप्ताष्टकसप्त कृतेन्द्रियोधृतात् यत्फलं तत् रोमकमतेन क्रमश: भगणको मध्ययो सूर्यो भवति:।

1. पंचसिद्धान्तिका रोमकसिद्धान्त: श्लो. सं. 1

अहर्गण: 553727 x 150 = 83059050

= 83059050 – 65 = 83058985

54787) 83 058985 (1516/0/12/26/19

– 83057 092

1893x12

22716x30

681480

–657444

24036x60

1442160

–1424462

17698x60

1061880

1040953

20927

1516/0/12/26/19 भगणादिको रोमकमतेन सूर्यो भवति।

0/26/6/33 राश्यादिको ग्रहलाघवमतेन सूर्यो भवति।

0/26/6/ 33

– 0/12/26/19 अन्तरं क्रियते तदा

00/13/40/ 14 00/13/40/ 14 ग्रहलाघवमतेन रोमकमतेन च अंशात्मकं अन्तरम् आयाति।

करणरित्या इष्टशाकादित: अहर्गणसाधनं भवति अतएव मध्यमसूर्यस्यानयनं करणीत्यैव कृतम् यतोहि ग्रहलाघवग्रन्थस्य मतं पञ्चसिद्धान्तिकाग्रन्थस्य रोमकमतं उभौ करणग्रन्थौ वर्तेते। अनेन प्रकारेण मध्यमग्रहसाधनं भवति।

✦✦✦

 ISSN : 7552-2779

# आढकीशस्योत्पादने कृषिपाराशरग्रन्थकृषिविज्ञान-सम्मतयोः प्रायोगिकमध्ययनम्

डॉ. नवीनतिवारी*

**प्रस्तावना-**

समग्रभूमण्डले स्थितानां भूतानामुदरपोषणाय शरीरवृद्धये बुभुक्षानिवारणाय जीवनयापनाय च अन्नस्यावश्यकता भवत्येव। अन्नेन विना जीवनस्य कल्पनापि कर्तुं न शक्यते। यथोक्तं महर्षिणा पराशरेण-

**कण्ठे कर्णे च हस्ते च सुवर्णं विद्यते यदि।**
**उपवासस्थापि स्यादन्नाभावेन देहिनाम्॥**[1]

अर्थात् मानवः स्वशरीरे नानाविधाभूषणैः भूषितस्सन् तथापि अन्नेन विना बुभुक्षितः एव भवति। अर्थात् मनुष्यः कण्ठे कर्णे हस्ते नासिकायां च सुवर्णस्याभूषणं धारयति तथापि अन्नस्य अभावेन उपवासः एव करणीयः। अन्नस्य गौरवगानम् आचार्येण वराहमिहिरेणापि बृहत्संहितायां कृतं यथा-

**अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम्।**[2]

अन्नं जगतः प्राणाः प्रावृट्कालस्य जीवनस्य मूलकारणं यथोक्तंमुपनिषदि-

**अन्नाद् भूतानि जायन्ते जातान्यन्नेन वर्धन्ते।**
**अधतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते॥**[3]

एवं प्राणिनां जन्मस्थितिलयानां कारणमन्नमेव भवति। तैत्तिरीयोपनिद्यन्नस्य ब्रह्मरूपत्वं प्रतिपादितम् अन्नं ब्रह्मेत्युद्घोषपूर्वकं सर्वेष्वपि पदार्थेषु अन्योऽन्यमन्नादभावः प्रसज्यते

---

* सहायकाचार्यः, ज्योतिषविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः, जम्मूः

1. कृषिपाराशरः प्रास्ताविकम्, श्लोकः-5
2. बृहत्संहिता, गर्भलक्षणाध्यायः, श्लोकः-1
3. तैत्तिरीयोपनिषद-ब्रह्मानन्दवल्ली, द्वितीयोऽनुवाक्

इति प्रोक्तं- **'अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्तेऽन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्ति'।**[1]

अन्नं ब्रह्मणोऽवधारणाया आधारोऽयं प्रतीयते यद् ब्रह्मवच्चीयमानमन्नं देवासुर-मनुष्याणां जीवनाधारो वर्तते। पराशरेण यथोक्तम्-

**अन्नं प्राणाः बलं चान्नम् अन्नं सर्वार्थसाधकम्।**
**देवासुरमनुष्याश्च सर्वे चान्नोपजीविनः।।**[2]

सर्वे शास्त्रकाराः अन्नमेव जीवनमिति प्रतिपादितवन्तः। परन्तु अन्नस्य उत्पादनार्थं कृषेः आवश्यकता अनुभूयते अर्थात् अन्नाय कृषिः मूलं वर्तते, यथोक्तं पराशरेण-

**अन्नं हि धान्यसञ्जातं धान्यं कृष्या बिना न च।**

अर्थात् अन्नं धान्याज्जायते, कृषिमाध्यमेन धान्यं जायते, अन्नधान्ययोः परस्परमुप-कार्योपकारकभावसम्बन्धो विद्यते।

कृषिः अन्नोत्पादनार्थं क्रियमाणं कर्मेत्युच्यते। यस्य प्रथमा क्रिया कर्षणं भवति। कृषकाः कर्षणेनैव कृष्यभूमिं समीकृत्य बीजवपनादिकं कर्तुं पारयन्ति। यद्यपि कर्षणं व्यापकेऽर्थे कर्मविशेषं कर्षणं लाङ्गलयोजनपूर्वकं कृतं अयमेव भूमेः प्रथमः संस्कारो भवति। एवं यद्यपि प्रत्यक्षरूपेण कर्षणयोग्या भूमि भवति कर्षणस्य साक्षात् प्रयोजनं भवति अन्नस्य प्राप्तिः। अतः कर्मणः फलाश्रयत्वात् त एव पदार्थाः कृषिकारणेन इति वक्तुं शक्यते।

अतः वर्तमानयुगे अत्यधिकं रसायनिकप्रयोगेण कृषिभूमेः बन्ध्यात्वं जायते। अतः प्राचीनकृषिविज्ञानदृष्ट्या कृषेः प्रायोगिकाध्ययनं शोधपत्रेऽस्मिन् प्रस्तूयते-

अत्र सर्वप्रथमं प्रायोगिककृषिकर्महेतुः न्यादर्शः प्रस्तूयते-

न्यादर्शचयनस्य आवश्यकता

1. समयस्य सदुपयोगो भवति।
2. धनस्य अधिकापव्ययो न भवति।
3. प्रदत्तानां संकलनं सम्यक् भवति।
4. विषयवस्तुनो विश्लेषणे सौविध्यमागच्छति।
5. परिणामे विश्वसनीयता वैधता च समागच्छति।

---

1. तैत्तिरीयोपनिषद-भृगुवल्ली, प्रथमोऽनुवाक्
2. कृषिपराशर प्रस्ताविकम्, श्लोकः-5

कृषिकर्मणि मध्यप्रदेशस्य रायसेनमण्डलान्तर्गतस्य सुल्तानगञ्जनामको ग्रामः स्वीकृतः। यथा-कृषिकार्यस्य प्रयोगार्थं ग्रामसुल्तानगञ्जस्य पटवारी हल्का क्रमांकस्य 33 इत्यस्य क्षेत्रक्रमाङ्कस्य 302 इत्यस्य 250डिसमिलपरिमिता भूमिः स्वीकृता। यथा-

**कृषिकार्याय भूमेः न्यादर्शः**

| कृषिप्रयोगाय भूमिपरिमाणम् | वपनार्थं बीजस्य परिमाणम् | बीजानां नामानि | बीजानां जातयः ( Variety ) | कृषिकार्यस्य पद्धतिः |
|---|---|---|---|---|
| 50 डिसमिलभूमिः (अर्धएकडपरिमितम्) | 3 किलोग्रामाः | आढकी (अरहरः) | लक्ष्मी | कृषिपाराशरोक्तपद्धतिः (वैशाखे वपनम्) |
| 50 डिसमिलभूमिः (अर्धएकडपरिमितम्) | 3 किलोग्रामाः | आढकी (अरहरः) | लक्ष्मी | कृषिपाराशरोक्तपद्धतिः (ज्येष्ठे वपनम्) |
| 50 डिसमिलभूमिः (अर्धएकडपरिमितम्) | 3 किलोग्रामाः | आढकी (अरहरः) | लक्ष्मी | कृषिपाराशरोक्तपद्धतिः (आषाढे वपनम्) |
| 50 डिसमिलभूमिः (अर्धएकडपरिमितम्) | 3 किलोग्रामाः | आढकी (अरहरः) | लक्ष्मी | कृषिपाराशरोक्तपद्धतिः (श्रावणे वपनम्) |
| 50 डिसमिलभूमिः (अर्धएकडपरिमितम्) | 3 किलोग्रामाः | आढकी (अरहरः) | लक्ष्मी | कृषिवैज्ञानिकोक्तपद्धतिः (आषाढे वपनम् जूनस्य अन्तिमसप्ताहे जुलाईमासस्य प्रथम-सप्ताहे वपनं श्रेष्ठम्) |

अस्मिन् शोधपत्रे अनुसन्धानस्य प्रयोगात्मकविधेः प्रयोगः जातः।

### कृषेः प्रयोगात्मकामध्ययनम्-

कृषिक्षेत्रे प्रायोगिकाध्ययनेन विना सार्थकनिष्कर्षस्य परिकल्पना नैव कर्तुं शक्यते। अतः प्राचीनकृषिविज्ञानस्य महत्त्वम् अभिलक्ष्य कृषिपाराशरग्रन्थे आधुनिककृषि-विज्ञाने च नैके कृषिविज्ञानसम्मताः पक्षाः विराजन्ते तेषां पक्षाणां वचनानाञ्च अत्र प्रायोगिकमध्ययनं प्रस्तूयते। ते यथा-बीजसंहर-बीजोपचार-बीजवपन-रोपणविधि-आढकी-निरस्तीकरणादीनां वर्तमानसन्दर्भे प्रायोगिकमध्ययनं कृतम्। अस्मिन् प्रायोगिकनामके ते प्रस्तूयन्ते यथा-

### बीजसंहरस्य प्रायोगिकामध्ययनम्-

माघमासस्य शुक्लपक्षस्य दशमीतिथौ तदनुसारेण 2016 तमे ख्रीष्टे फरवरीमासे 17 तमे दिनाङ्के रायसेनमण्डलान्तर्गते सुल्तानगञ्जनामकग्रामे कृषिपाराशरग्रन्थानुसारं

बीजसंहरस्य प्रयोगः कृतः विधिश्च विहितः। तच्च वचनं यथा–

**माघे वा फाल्गुने मासि सर्वबीजानि संहरेत्।**
**शोषयदातपे सम्यक् नैवाधो विनिधापयेत्॥[1]**

**बीजस्य पुटिकां कृत्वा विधान्यं तत्र शोधयेत्।**
**बीजं विधान्यसंमिश्रं फलहानिकरं परम्॥[2]**

पराशरवचनानुसारेण माघमासे आढकीबीजानाम् एकत्रीकरणं कृत्वा, सूर्यतापेन शुष्कं कृत्वा सर्वेषां बीजानां तृणकरकटादीनां शोधनं कृत्वा पृथक्–पृथक् पुटिकासु बहवा पवित्रस्थले सर्वं स्थापितम्, अयं विधिः अत्यन्तम् अल्पव्ययसाध्या वर्तते। अनेन विधिना बीजस्य संहरम् अत्यधिकशस्योत्पादने समर्थं भवति।

### बीजोपचारस्य प्रायोगिकामध्ययनम्-

फाल्गुनमासशुक्लपक्षस्य त्रयोदशीतिथौ तदनुसारेण 2016 तमे ख्रीष्टे मार्चमासस्य (एकविंशतिः) 21 तमे दिनाङ्के रायसेनमण्डलान्तर्गतसुल्तानगञ्जनामकग्रामे कृषिपाराशर–ग्रन्थानुसारं बीजसंहरस्य प्रयोगः कृतः विधिश्च विहितः। तच्च वपनं यथा–

**एकरूपं तु यद्बीजं फलं फलानि निर्भरम्।**
**एकरूपं प्रयत्नेन तस्माद्बीजं समाचरेत्॥**

अनेन श्लोकानुसारेण संहरितबीजानां स्वहस्तेन शोधनयन्त्रेण एकरूपता मया कृता, तत्पश्चात् एकरूपबीजानां सूर्यतापेन शुष्कं कृत्वा पुट्टिकासु च बद्ध्वा पवित्रस्थाने स्थापितम्। तत्र पराशरीयवचनं यथा–

**न वल्मीके न गोस्थाने न प्रसूता निकेतने।**
**न च वन्ध्यावति ग्रेहे बीजस्थापनमाचरेत्॥**

**नोच्छिष्टं स्पर्शयेद् बीजं न च नारीं रजस्वलाम्।**
**न बन्ध्या गर्भिणी चैव न च सहाः प्रसूतिका॥**

**घृतं तैलं च तक्रं च प्रदीपं लवणं तथा।**
**बीजोपरि भ्रमेणापि कृषको नैव कारयेत्॥[3]**

---

1. कृषिपाराशरः, कृषिखण्डः, श्लोकः–77
2. कृषिपाराशरः, कृषिखण्डः, श्लोकः–158
3. कृषिपाराशरः, कृषिखण्डः, श्लोकः–81–83

पराशरानुसारेण वल्मीकस्थले गोस्थाने, स्त्रीप्रसूतस्थले, बन्ध्यागृहे च बीजं नैव स्थापयेत्। शोधकर्त्रा तदनुगुणमेव बीजानि संस्थापितानि मयापि बीजस्थापनकाले पराशरोक्तवर्ज्यस्थानेषु बीजस्य स्थापनं कृतम्। अयं बीजोपचारस्य विधिः आधुनिकविधिना अल्पव्ययसाध्यः वर्तते तथा च कृषकः स्वमेव कर्तुं शक्यते। बीजस्य गुणवत्तापि कृषकेण प्रत्यक्षरूपेण द्रष्टुं शक्यते। अतः पाराशरीयविधिः समाजोपयोगी, कृषकोपयोगी च वर्तते।

**हलप्रसारणस्य प्रायोगिकामध्ययनम्-**

फाल्गुनमासस्य शुक्लपक्षे दशमीतिथौ तदनुसारेण 2016 तमे वर्षे मार्चमासे अष्टादशदिनाङ्के रायसेनमण्डान्तर्गते सुल्तानगञ्जनामग्रामे कृषिपाराशरग्रन्थोक्तविहित-कालमुहूर्त्तानुसारेण हलप्रसारणं कृतम्।

**वैशाखमासे आढकीबीजवपनस्य प्रायोगिकामध्ययनम्-**

वैशाखमासशुक्लत्रयोदशीतिथौ तदनुसारेण 2016 तमे ख्रीष्टे वर्षे मई मासे 19 दिनाङ्के रायसेनमण्डलान्तर्गते सुल्तानगञ्जनामकग्रामे राष्ट्रिय-संस्कृत-संस्थानस्य भोपाल-परिसरस्य ज्योतिषविभागस्य आचार्यहंसधरझा-आचार्यभारतभूषमिश्रमहाभागयोः सन्निधौ कृषिपाराशरग्रन्थनिहितवपनमुहूर्त्तकालादीनामनुसारेण अर्धैकड़ऽपरिमितायां भूमौ 3 किलोग्राम-परिमित-आढक्याः बीजानां वपनं मया कृतम्। तत्र पाराशरीयवचनं यथा-

**वैशाखे वपनं श्रेष्ठं ज्यैष्ठे तु मध्यमं स्मृतम्।**
**आषाढे चाधमं प्रोक्तं श्रावणे चाधमाधमम्॥**
**उत्तरात्रयमूलेन्द्रमैत्रपेत्रेन्दुधातृषु।**
**हस्तामथ रेवत्यां बीजवपनमुत्तमम्॥**[1]

आढकीबीजानां वपनकालात् चतुर्दशदिनाभ्यन्तरेषु-अङ्कुरणं सञ्जातम्। परन्तु मध्यप्रदेशस्य वैशाखमासे जलवायु-अत्यधिकः उष्णः सञ्जातः। तस्मात् अङ्कुरणेन प्राप्ताः लघु-लघु पादपाः किञ्चित् श्यामवर्णीयाः सञ्जाताः। वपनात् मासद्वयाभ्यन्तरे आढक्याः पादपेषु चतस्त्र पञ्च वा शाखाः समागताः। आढक्याः पादपाः मासद्वयाभ्यन्तरे एकहस्तपरिमितं वृद्धिं सम्प्राप्नुवन्। आढकीपादपैः सह केदारेषु लघु-लघु तृणानि समागतानि तदा आढकीपादपानां विकासो अवरुद्धो न स्यात् एतदर्थं मासद्वय-मासत्रयाभ्यन्तरे वा तृणादीनाम् उन्मूलनं कृतम्। तथा च वपनात् चतुर्मासाभ्यन्तरे आढकीपादपेषु

---

1. कृषिपाराशरः, कृषिखण्डः, श्लोकः-88-90

प्रसूनानि जातानि, परन्तु पुष्पेषु कीटपतङ्गादीनां प्रकोपोऽपि दृष्टः, तत् प्रकोपनिवारणाय कृषिपाराशरग्रन्थोक्तधान्यव्याधिखण्डनम् (ऊँ सिद्धिः श्रीगुरुपादेभ्यो नमः। स्वस्ति हिमगिरिः) इति मन्त्रस्य प्रयोगः मया कृतः। तेन मन्त्रेण कीटपतङ्गादि-प्रकोपाणां निवारणं जातम्। तत्पश्चात् वपनकालात् सपादपञ्चमासाभ्यान्तरे सर्वाणि पुष्पाणि प्रकृतिपेलवफलेषु परिणितानि जातानि। सुकुमारफलेषु यदा ईतयः (इल्ली) दृष्टाः तदा तत् शमनार्थं पुनः धान्यव्याधिखण्डनमन्त्रस्य प्रयोगः कृतः तस्मात् ईतिप्रकोपस्य निवारणं सञ्जातम्। वैशाखमासे यदि आढक्याः वपनं क्रियते तदा ईतिभयमल्पं भवति तथा फलेषु अन्तः ईतिप्रवेशः नैव भवितुं शक्नोति इत्यस्मिन् प्रयोगे अनुभूतः। वपनकालात् सार्द्धपञ्चमासाभ्यन्तरे आढकीपादपानां कर्तनं कृतम्। तथा च शोधनं कृत्वा 350 किलोग्रामपरिमितं आढकीदलहनम् (द्विदलम्) अर्धैकडक्षितौ सम्प्राप्तम्।

अस्मिन् आढकीप्रयोगकृषिकर्मणि बीजक्रयपरिश्रमकर्तृभ्यः मया त्रिसहस्त्ररूप्यकाणि प्रदत्तानि त्रिसहस्राणि विहाय षोडशसहस्त्ररूप्यकाणां लाभः प्राप्तः। इति शम्।

### ज्यैष्ठमासे आढकीबीजवपनस्य प्रायोगिकामध्ययनम्-

ज्यैष्ठमासशुक्लपञ्चमीतिथौ तदनुसारेण 2016 तमे ख्रीष्टे वर्षे जूनमासे 9 दिनाङ्के रायसेनमण्डलान्तर्गते सुल्तानगञ्जनामकग्रामे कृषिपाराशरग्रन्थोक्तविहितवपन-कालमुहूर्त्तादीनामनुसारेण अर्धैकडपरिमितभूमौ 3 किलोग्रामपरिमितायाः-आढक्याः बीजानां वपनं मया कृतम्। तत्र च पाराशरीयवचनं यथा-

**वैशाखे वपनं श्रेष्ठं ज्यैष्ठे तु मध्यमं स्मृतम्।**
**आषाढे चाधमं प्रोक्तं श्रावणे चाधमामम्॥**
**उत्तरात्रयमूलेन्द्रमैत्रपेत्रेन्दुधातृषु।**
**हस्तामथ रेवत्यां बीजवपनमुत्तमम्॥**[1]

आढकीबीजानां वपनकालात् एकादशदिनाभ्यन्तरेषु अङ्कुरणं सञ्जातम्। वपनकालात् चत्वारिंशद्दिनान्तरेषु सम्पूर्णकेदारं हरितवर्णमभूत्। वपनात् मासद्वयाभ्यन्तरे आढक्याः पादपेषु चतस्त्र पञ्च वा शाखाः समागताः, आढक्याः पादपाः सार्द्धमासद्वयाभ्यन्तरे एकहस्तपरिमितं वृद्धिं सम्प्राप्नुवन्। आढकीपादपैः सह केदारेषु लघु लघु अत्यधिकानि तृणानि सञ्जातानि तदा आढकीपादपानां विकासोऽवरुद्धः प्रभावितो न स्यात् एतदर्थं मासद्वय-मासत्रयाभ्यन्तरे वा तृणादीनाम् उन्मूलनं च कृतम्। तथा च वपनात् सार्द्धत्रयमासाभ्यन्तरे आढकीपादपेषु पुष्पाणि जातानि, परन्तु पुष्पेण कीटपतङ्गादीनां

---

1. कृषिपाराशरः, कृषिखण्डः, श्लोकः-88-90

प्रकोपोऽपि दृष्टः तत् प्रकोपनिवारणाय कृषिपाराशरग्रन्थोक्तधान्यव्याधिखण्डनमन्त्रस्य प्रयोगः मया कृतः। तेन मन्त्रेण कीटपतङ्गादि प्रकोपाणां निवारणं जातम्। तत् पश्चात् वपनकालात् सपादचतुर्मासाभ्यन्तरे सर्वाणि पुष्पाणि कोमलफलेषु परिणितानि जातानि। सुकुमारफलेषु यदा ईतयः दृष्टाः तत् शमनार्थं पुनः धान्यव्याधिखण्डनमन्त्रस्य प्रयोगः कृतः तस्मात् ईतिप्रकोपस्य निवारणं सञ्जातम्। वपनकालात् पञ्चमासाभ्यन्तरे आढकीपादपानां कर्त्तनं कृतम्। तथा च शोधन कृत्वा 300 किलोग्रामपरिमितम् आढकी दलहनम् (द्विदलनम्) अर्धैकड्क्षितौ सम्प्राप्तम्।

अस्मिन् आढकीप्रयोगकृषिकर्मणि बीजक्रयपरिश्रमकर्तृभ्यः मया त्रिसहस्त्ररूप्यकाणि प्रदत्तानि त्रिसहस्त्राणि विहाय 13500 रूप्यकाणां लाभः प्राप्तः।

**आषाढमासे आढकीबीजवपनस्य प्रायोगिकामध्ययनम्-**

आषाढमासशुक्लसप्तमीतिथौ तदनुसारेण 2016 तमे ख्रीष्टे वर्षे जुलाईमासस्य 11 दिनाङ्के रायसेनमण्डलान्तर्गते सुल्तानगञ्ज नामकग्रामे कृषिपाराशरग्रन्थोक्तविहितवपन-कालमुहूर्त्तादीनामनुसारेण अर्धैकड्परिमितभूमौ 3 किलोग्रामपरिमित-आढक्याः बीजानां वपनं मया कृतम्। तत्र पाराशरीयवचनं यथा-

**वैशाखे वपनं श्रेष्ठं ज्यैष्ठे तु मध्यमं स्मृतम्।**
**आषाढे चाधमं प्रोक्तं श्रावणे चाधममम्॥**
**उत्तरात्रयमूलेन्द्रमैत्रपेत्रेन्दुधातृषु।**
**हस्तामथ रेवत्यां बीजवपनमुत्तमम्॥**[1]

आढकीबीजानां वपनकालात् नवदिनाभ्यन्तरेषु अङ्कुरणं सञ्जातम्। वपनकालात् विंशतिदिनान्तरेषु सम्पूर्णकेदारं हरितवर्णं दृष्टम्। वपनात् मासद्वयाभ्यन्तरे आढक्याः पादपेषु चतस्त्र पञ्च वा शाखाः समागताः आढक्याः पादपाः तथा च एकहस्तपरिमितं वृद्धिं सम्प्राप्नुवन्। आढकीपादपैः सह केदारेषु लघु लघु अत्यधिकानि तृणानि सञ्जातानि तदा आढकीपादपानां विकासावरोधः प्रभावितो न स्यात् एतदर्थं मासद्वय-मासत्रयाभ्यन्तरे वा तृणादीनाम् उन्मूलनं च कृतम्। तथा च वपनात् त्रिमासाभ्यन्तरे आढकीपादपेषु पुष्पाणि जातानि, परन्तु पुष्पेण कीटपतङ्गादीनां प्रकोपोऽपि दृष्टः तत् प्रकोपनिवारणाय कृषिपाराशरग्रन्थोक्तधान्यव्याधिखण्डनमन्त्रस्य प्रयोगः मया कृतः। तेन मन्त्रेण कीटपतङ्गादि प्रकोपानां निवारणं जातम्। तत् पश्चात् वपनकालात् सपादचतुर्मासाभ्यन्तरे सर्वाणि पुष्पाणि कोमलफलेषु परिणितानि जातानि। सुकुमारफलेषु यदा अत्यधिक-ईत्याः दृष्टाः

1. कृषिपाराशरः, कृषिखण्डः, श्लोकः-88-90

तत् शमनार्थं पुनः धान्यव्याधिखण्डनमन्त्रस्य प्रयोगः कृतः तेन मन्त्रप्रभावेण ईतयः अल्पमात्रासु मृता एव जाताः। वपनकालात् सार्धचतुर्थमासाभ्यन्तरे आढकीसस्यानि पक्वानि जातानि। तदा सम्पूर्ण सस्यस्य कर्त्तनं शोधनं च कृत्वा 250 किलोग्रामपरिमितम् आढकी दलहनम् अर्धैकड़्वमितौ सम्प्राप्तम्।

अस्मिन् आढकीप्रयोगकृषिकर्मणि बीजक्रयपरिश्रमकर्तृभ्यः मया सार्धत्रिसहस्र-रूप्यकाणि प्रदत्तानि सार्धत्रिसहस्राणि विहाय 10250 रुप्यकाणां लाभाः प्राप्ताः।

### श्रावणमासे आढकीबीजवपनस्य प्रायोगिकाध्ययनम्-

श्रावणमासशुक्लद्वितीयातिथौ तदनुसारेण 2016 तमे ख्रीष्टे वर्षे अगस्तमासे 04 दिनाङ्के रायसेनमण्डलान्तर्गते सुल्तानगञ्ज नामकग्रामे कृषिपाराशरग्रन्थोक्तविहितवपनकाल-मुहूर्त्तादीनामनुसारेण अर्धैकड़ऽपरिमितभूमौ 3 किलोग्रामपरिमित-आढक्याः बीजानां वपनं मया कृतम्। तच्च पाराशरीयवचनं यथा-

**वैशाखे वपनं श्रेष्ठं ज्यैष्ठे तु मध्यमं स्मृतम्।**
**आषाढे चाधमं प्रोक्तं श्रावणे चाधमामम्॥**
**उत्तरात्रयमूलेन्द्रमैत्रपेत्रेन्दुधातृषु।**
**हस्तामथ रेवत्यां बीजवपनमुत्तमम्॥**[1]

आढकीबीजानां वपनकालात् सप्ताष्टदिनेषु वा अङ्कुरणं सञ्जातम्। परन्तु अत्यधिक वृष्टिकारणात् सर्वाणि अङ्कुराणि नष्टानि जातानि।

### कृषिवैज्ञानिकमतानुसारं आढकीवपनस्य प्रायोगिकमध्ययनम्-

कृषिवैज्ञानिकानाम् आढकीवपनकालविषये मतमस्ति-शीघ्रपक्वादीनां वपनं जूनमासस्य प्रथमपक्षे करणीयम्। तदनुसारेण 2016 जूनमासे त्रयोदशे दिनाङ्के रायसेनमण्डलान्तर्गते सुल्तानगञ्जनामकग्रामे अर्धैकडपरिमितभूमौ 3 किलोग्राम आढकबीजानां वपनं कृतम्। वपनकालात् नवदिनान्तरं बीजस्य अङ्कुरणं जातम्। वपनकालात् अष्टदशदिनान्तरं सर्वं केदारं हरितवर्णमयं दृष्टम्। वपनकालात् सार्धैक-मासाभ्यन्तरे आढकीपादपैः सह घासतृणादीनामपि विकासो जातः तत् निवारणाय आढकीपादपान् परितः भूमेः कर्षणेन घासतृणादीनामुन्मूलनं कृतम्। आढकीपादपानां विकासाय 150 मिलिग्रामपरिमितः उर्वरकन्ट्रोलप्लसनामक-ओषधेः प्रयोगः कृतः तेन प्रयोगेण आढकीपादपानां शीघ्रविकासः सञ्जातः। वपनकालात् मासद्वयाभ्यान्तरे

---

1. कृषिपाराशरः, कृषिखण्डः, श्लोकः-88-90

आढकीपादपेषु पञ्च षट् शाखानाम् वृद्धिः एवञ्च हस्तद्वयपरिमितस्य विकासो जातः। वपनकालात् मासत्रयभ्यान्तरे आढक्याः पादपेषु पुष्पाणि समागतानि। पुष्पेषु कीटपतङ्गादीनां प्रकोपो दृष्टः। तत् प्रकोपनिवारणाय 25 किलोग्रामः (D.A.P.) डी.ए.पी. नामकस्य ओषधेः प्रयोगः कृतः। तेन प्रयोगेण कीटपतङ्गादीनां विनाशः जातः एवञ्च आढकीपादपेषु पुष्पाणां विकासोऽपि जातः। वपनकालात् सार्द्धत्रयमासान्तरे सर्वाणि पुष्पाणि फलेषु परिणितानि जातानि, परन्तु फलेषु ईतिप्रकोपः दृष्टः ता ईतयः फलेषु छेदनं कृत्वा अन्तः प्रवेशं कृतवत्यः। ईतिप्रकोपनिवारणाय 50 मिलिग्रामफसीनामकस्य ओषधेः प्रयोगः कृतः। तेन प्रयोगेण प्रकोपस्य शमनं जातम्। वपनकालात् चतुर्थमासाभ्यन्तरे सर्वाणि फलानि पक्वानि जातानि तेषां छेदनं कृतम्। ततः शोधनं कृत्वा 342 किलोग्रामपरिमितं आढकीदलहनं अर्धैकडमितं सम्प्राप्तम्।

अस्मिन् कृषिवैज्ञानिकाढकीप्रायोगिकवपनकर्मणि बीजोषधिक्रयपरिश्रमकर्तृभ्यः षष्ठसहस्त्ररूप्यकाणि प्रदत्तानि षष्ठसहस्राणि विहाय 10,610 रूप्यकाणि प्राप्तानि।

**निष्कर्षः-**

कृषिपराशरग्रन्थ-आधनुकविज्ञानयोः आढकीवपनस्य प्रायोगिकाध्ययनेन ज्ञायते यत् वर्तमानकाले कृषिपाराशरोक्तपद्धतिः उत्तमा वर्तते तथा च अल्पव्ययेन अत्यधिक-लाभकारिणी कृषि प्राचीनकृषिः वर्तते इति शोधपत्रस्य निष्कर्षः।

**सन्दर्भग्रन्थः**

1. कृषिपाराशरः चौखम्बा संस्कृत भवन।

✦✦✦

# देववाण्यां चत्वारः पुरुषार्थाः द्वे विद्ये च

**डॉ. धनेशकुमारपाण्डेयः***

जलमिव मनः सहजतया अधोगामि भवति। पुरुषार्थं विना तन्नैवायाति उपरि। तमोगुणान्वितं मनः अनायासेन भवति। तत् सत्त्वगुणमयं कर्तुम् आयासः अपेक्ष्यते। यथा जलमुपरि नेतुं यन्त्रस्य आवश्यकतास्ति, तथैव मनस्यपि मन्त्रस्यावश्यकतास्ति। यथा गीतायाम्-

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।**
**न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।।**[1]

**तात्पर्यम्** - यः मनुष्यः शास्त्रोक्तविधीन् त्यक्त्वा स्वेच्छया आचरणं करोति, सः अन्तःकरणस्य शुद्धिं (सिद्धिं) न कर्तुं शक्नोति। न वा सः सुखं प्राप्तुं शक्नोति। न च सः परमां गतिं प्राप्तुं शक्नोति।

संसारः दुःखालयः अस्ति। निसर्गतया दुःखं वर्तमानमस्ति इह जगतीतले। सुखाय तु प्रयासः क्रियते साधकैः। अशान्तिः तु सर्वत्र व्याप्तास्ति, परन्तु शान्तेः चयनं करणीयं भवति अशान्तेः निवारणाय। अत एव सनातनपरम्परायां चत्वारः पुरुषार्थाः सन्ति। तेषामाचरणेन मनुष्यः सुखी भवति।

अस्माकं जीवने अपि प्रतिदिनं सहजतया चत्वारः पुरुषार्थाः संघटन्ते, वयं तन्न सावधनतया विचारयामः। यथा- प्रातः मनः शरीरं मतिः च शुद्धाः निर्गतविकाराः गतश्रान्ताः च भवन्ति। तदानीम् ईशस्मरणे धर्माचरणे च स्वतः प्रवृत्तिः अस्माकं जायते। यदि तत्र अस्माभिः प्रमादः क्रियते तर्हि शरीरं स्वयमेव शौचदन्तधावनस्नानादिनित्यक्रियाः कर्तुम् अस्मान् प्रेरयति।[2] नित्यक्रियासम्पादनमपि शरीरधर्मत्वेन पुरुषार्थः अस्ति। प्रातः

---

* सहायकाचार्यः, वेदकर्मकाण्डयोः विभागः, हिमाचलादर्शसंस्कृतस्नातकोत्तर-महाविद्यालयः, जाङ्गला, शिमला, हि.प्र.-171214

1. गीता - 16.23
2. न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
   कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।। गीता- 3.5

मलमूत्रत्यागः शौचस्नानादिक्रियाः च अस्माकमेव शरीरस्य धर्मः। इत्थं प्रातः सन्ध्यावन्दनम्, देवोपासना, मन्दिरगमनं चेति धर्मः एवास्ति।

धर्माचरणानन्तरं द्वितीयाय पुरुषार्थाय वयं स्वभावतः यतामहे। तस्य पुरुषार्थस्य नामास्ति अर्थः। अर्थाय मनुष्याः विविधकर्माणि कर्तुं प्रवृत्ताः भवन्ति। कृषकाः कृषिकार्यम्, सैनिकाः रक्षाकार्यम्, वैश्यजनाः व्यापारकार्यं सेवकाश्च सेवाकार्यं कर्तुं प्रवृत्ताः संजायन्ते।[1]

इत्थं द्वितीयं पुरुषार्थं सम्पाद्य तृतीयं पुरुषार्थं कामं प्रति प्रवृत्तिः मनुष्यानां संजायते। अर्थप्राप्तये कर्माणि कृत्वा अभीष्टं भोज्यं विहारादिकं च वयं भुञ्जामहे। अन्ते च वयं दिनान्ते निशायामन्तिमं पुरुषार्थं मोक्षं प्रति सुखनिद्रायां प्रवर्तामहे। एतदस्ति इह लोकव्यवहारसम्पादनाय अपराविद्यायाः सम्मतम् आचरणम्। पराविद्यायाः आचरणाय ततोऽपि अधिकः प्रयासः करणीयः भवति।

मुण्डकोपनिषदि विद्या द्विधा प्रोक्ता अस्ति। परा विद्या अपरा विद्या च। ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति वेदाश्चत्वारः। अपि च शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषं चेति षड्वेदाङ्गानि अपरा विद्या अस्ति। अथ परा विद्या सा अस्ति, यया अक्षरं ब्रह्म अधिगम्यते।

**द्वे विद्ये वेदितव्ये इति ह स्म यद्**
**ब्रह्मविदो वदन्ति परा चैवापरा च।**[2]

ऋग्वेदो यजुर्वेदः, सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति दश विद्या अपरा विद्या मन्यन्ते। यया विद्यया परमात्माधिगम्यते सा परेति।

अग्निपुराणस्य प्रथमे अध्याये तु वेदवेदाङ्गानां सहितम् अपराविद्यायां मीमांसा, धर्मशास्त्रम्, पुराणम्, न्यायः, वैद्यकः, गान्धर्ववेदः, धनुर्वेदः अर्थशास्त्रं चेति सम्मिलितमस्ति। यया विद्यया च अदृश्य-अग्राह्य-गोत्ररहित-चरणरहित-नित्याविनाशिब्रह्मणः बोधो जायते सा परा विद्या। परा विद्या एव आत्मविद्या अथवा ब्रह्मविद्या अपि कथ्यते। यदि अपरा विद्या जीवनस्य प्रथमं सोपानमस्ति तर्हि परा विद्या जीवनस्य द्वितीयं सोपानमस्ति।

भौतिकजगति यत् ज्ञानं विज्ञानञ्चेति नाम्ना अभिधीयते, तदेव उपनिषदि अपरा विद्या इति नाम्ना कथितमस्ति। अभ्युदयं भौतिकता चेति अविद्यायाः पर्यायमस्ति। निःश्रेयः आध्यात्मिकता च विद्यायाः पर्यायपदानि सन्ति। अपरं चापि ईशावास्योपनिषदि

---

1. सुखस्य मूलं धर्मः। धर्मस्य मूलमर्थः। अर्थस्य मूलं राज्यम्। राज्यस्य मूलमिन्द्रियजयः। इन्द्रियजयस्य मूलं विनयः। विनयस्य मूलं वृद्धोपसेवा। चाणक्यसूत्रनीतिः।
2. मुण्डकोपनिषत् 1.1.4

अपि सः एव आशयः वर्णितः अस्ति, विद्या अविद्या चेति नाम्ना। वैदिकचिन्तकानां दृष्ट्या परमात्मा एव वस्तुतः "वेद्यः" अर्थात् ज्ञातुं योग्यः अस्ति। मनुष्यस्यान्तिमं ध्येयं तु ईश्वरप्राप्ति एवास्ति।

यत् ज्ञानं परमात्मानं प्रति गन्तुं मार्गं न दिशति, तत् विद्या इति वक्तुं शक्यते। लौकिकप्रयोजनानां सिद्धेः सम्बद्धानि अन्यानि सर्वाणि ज्ञानानि ऐहिकं महत्त्वं तु धारयन्ति, परन्तु तानि ब्रह्मगतिं प्रदातुं न शक्नुवन्ति। तानि ब्रह्म प्रति गन्तुं भौतिकसाधनानि सन्ति, न वाध्यात्मिकसाधनानि। अतएव ऐहिकमहत्त्वं धृतवत्यः विद्याः अविद्या इति नाम्ना प्रसिद्धाः।

लौकिकप्रयोजनाय प्राप्ता विद्या संसारेऽस्मिन् भौतिकोपलब्धिं प्रददाति। किन्तु सा आध्यात्मिकोन्नतेः आधारः नैव सिद्ध्यति। वस्तुतः विद्या अविद्या चेति उभे एव मनुष्यैः सम्यक् स्वीकरणीये। ताभ्याम् ऐहिकं पारलौकिकं चास्तित्वं क्रमशः सार्थकं करणीयम्।

**विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।**[1]

**तात्पर्यम्** – बुद्धिमान् मनुष्यः विद्याम् अविद्यां चेति उभयं सहैव जानाति। सः अविद्यया मृत्युमयं संसारमेनं तरति, अर्थात् अविद्यायाः उपयोगं कुर्वन् सार्थकमैहिकं जीवनं जीवति। तदा एव भौतिकक्लेशेभ्यः व्यवधानेभ्यश्च मुक्तो भूत्वा विद्यां ध्यायन् देहावसानं कृत्वा सच्चिनन्दस्य परमात्मनः स्वरूपं प्राप्य अमृतत्वपूर्णं परलोकं प्राप्नोति।

इत्थं पुरुषार्थं विना जीवः इह न किञ्चन प्राप्तुं शक्नोति। शास्त्रसम्मतं कर्मकरणमेव धर्मः अस्ति। ततश्च धर्मसम्मतं शास्त्रसम्मतं च अर्थोपार्जनं कामसेवनं च क्रमशः अर्थः कामः च पुरुषार्थौ स्तः। अन्तिमः पुरुषार्थः मोक्षः चापि शास्त्रसम्मतं धर्मसम्मतं च कर्म कृत्वा प्राप्तुं शक्यते। मनोनिग्रहणाय मनुष्यः पुरुषार्थं कुर्यात् एव।

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।**[2]

**तात्पर्यम्** – अस्मिन् संसारे मनुष्यः कर्माणि कुर्वन् एव शतं वर्षाणि जीवितुमिच्छेत्। अनेन साधनेन एव मनुष्ये कर्म लिप्तं न भवति। अस्मात् भिन्नः अन्यः कोऽपि मार्गः नास्ति। मुख्यः भावः एषः अस्ति यत् कर्म कुरु अनेन एव कर्मबन्धनात् मुक्तिः भविष्यति। एवमेव ब्रह्मबिन्दूपनिषदि अपि उक्तम्–

---

1. ईश. मन्त्रः 11
2. ईश. मन्त्रः 2

**मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**
**बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥**[1]

**तात्पर्यम्** - सर्वेषां मनुष्याणां बन्धनस्य मुक्तेः च कारणं मनः एवास्ति। विषयेषु आसक्तं मनः बन्धनस्य कारणं भवति। विषयेभ्यः रहितं मनः मुक्तेः (मोक्षस्य) कारणमस्ति।

**अन्यच्चापि-**

**धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।**
**अजागलस्तनस्यैव तस्य जन्म निर्थकम्॥**[2]

**तात्पर्यम्**- अजायाः गलस्य अधः स्तन इव दृश्यमानः कश्चन मांसखण्डः लम्बमानो भवति। अजायाः शारीरकप्रक्रियायाम् अस्य स्थानम् न भवति। निरुपयोगिनः प्रयोजनरहितस्य च वस्तुनः सूचनार्थम् अस्य न्यायस्य प्रयोगः क्रियते। न्यायः अयं तदेव निष्प्रयोजनत्वं दर्शयति।

इत्थं चत्वारः पुरुषार्थाः संसारात् मुक्तये अस्माकं पूर्वाचार्यैः कल्पिताः। तथैव द्वे विद्ये अपि अपि मानवानां परमकल्याणाय सोपानमिव धरायामस्यां विद्येते।

**सन्दर्भाः**

1. sa.wikiquote.org
2. gitasupersite.iik.ac.in
3. sa.m.wikipedia.org
4. गोयन्दका, जयदयाल; श्रीमद्भगवद्गीता, तत्त्वविवेचनी हिन्दी टीका, गीताप्रेस गोरखपुर
5. मिश्र, भास्कर; वैदिकशिक्षा पद्धति, महर्षि सान्दीपनि वेदविद्या प्रतिष्ठान, उज्जैन
6. उपाध्याय, बलदेव; संस्कृत साहित्य का इतिहास, शारदा निकेतन

✦✦✦

1. ब्रह्मबिन्दूपनिषत्
2. ब्रह्माण्डपुराणे अ. 150

# श्रीकृष्णमिश्रयतिप्रणीतप्रबोधचन्द्रोदयनाटके शान्तरसविचारः

**डॉ. सुमनचन्द्रपन्तः 'सुमन्तः'***

अनादिसनातनज्ञानधारा निखिलजनमानसीयमनोमालिन्य-प्रक्षालनार्थमनवरततया प्रवहमानास्ति। अस्यां निर्मलज्ञानधारायां निमज्जनार्थं नानाविधनिगमपुराणेतिहासादिशास्त्राणि दृष्टानि प्रणीतानि च ऋषिभिर्विद्वद्भिश्च। कालान्तरे शास्त्रसारसुधारसं सकलसामाजिकजनान् समास्वादयितुं सरसकाव्यविधा समाविर्भूता। या चादिकविवाल्मीकितोऽद्य यावत्सतत-जायमानावलोक्यते। सर्वशास्त्रोद्देश्यं मानवीयैहिकामुत्रिक-मङ्गलकरणम्, एतत्काव्यमपि तदनुगुणोपकारकमेव सिद्ध्यति। सर्वजन-हितैषी कविरात्मशैमुष्या मूर्तामूर्तभावान् विभावादिमाध्यमेनाभिव्यक्तीकरोति, यत्काव्यं सद्यः परनिर्वृतिपुरस्सरं सदुपदेशजनकं भवति। प्रायशः कविः साधारणीकरणव्यापारेणास्वाद्यमानशृङ्गारादिनवरसै रामादिवद्धिते प्रवर्तनम्, रावणादिवद् अहितान्निवर्तनम्[1] इति सरसोपदेशं सामाजिकजनानां सम्मुखं प्रस्तूय काव्यस्य सफलत्वं सिद्धयति। एतत्परम्परासंवर्धकेन वीतरागश्रीकृष्णमिश्रयतिना षडङ्कालङ्कृताद्वैतवेदान्तविष्णुभक्तिसमुल्लसितशान्तरसप्रधानं प्रबोधचन्द्रोदयाख्य-प्रतीकात्मकनाटकमपारकाव्यसंसारे प्रस्तूय प्रतीकात्मकनाट्यपरम्परा प्रवर्तिता, योत्तरवर्त्ति-काव्यकाराणां कृते आदर्शरूपताङ्गता।

## कवेर्व्यक्तित्वं कृतित्वञ्च -

विगतस्रक्चन्दनवनितादिवैषयिकरसवतोऽपरमितालौकिकानन्दाभिन्नमुकुन्दपादारवृन्द-मकरन्दास्वादनलोलुपस्य पण्डितप्रवराचार्यश्रीकृष्णमिश्र-यतेर्जन्मैकादशशताब्द्या मध्यावधौ मध्यप्रदेशीयजेजकभुक्तिनामकस्य चन्द्रेलवंशीयलोकपालविपुलकीर्तिकीर्तिवर्ममहोदयस्य

* सहायकाचार्यः, 'अतिथिः' साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः, कोटभलवालः, जम्मूः

1. रामादिवद्वर्तितव्यं न रावणादिवत् -काव्यप्रकाश कारिका -2, वृत्तिभागः

राज्यसिंहासन-कालेऽभवत्। प्रामाण्यपदभाक्प्रबोधचन्द्रोदयनाटकीयप्रस्तावना-भागावलोक-नेनावगम्यते यत्कीर्तिवर्मण: समकालीनो मालवनरेश: परमारवंशीयभोजराज आसीत्। कलचुरिराजानं कर्णदेवं पराजित्य गोपालेन कीर्तिवर्माख्य: कश्चित्क्षत्रियो राज्यसिंहासने संस्थापित:। यथा-

**गोपालो भूमिपालान्प्रसभमसिलतामात्रमित्रेण जित्वा।**
**साम्राज्ये कीर्तिवर्मा नरपतितिलको येन भूयोऽभ्यषेचि॥**[1]

एतन्नाटकस्य हिन्दीटीकाकारो रामचन्द्रमिश्रो नाटकागत-बिहारस्थस्य मन्दारनामक-तीर्थस्थानस्य सादरोल्लेखवशाद् गौडानाञ्च सोपहासदाम्भिकता प्रकटीकरणाद्बिहार-वास्तव्योऽसावासीदित्यङ्गीकरोति।

**नाटकथावस्तु-**

कथावस्तुरूपमूलाधार एव काव्योल्लास: रसभावादीनां परिणति: सम्भाव्यताया: दिग्दर्शनं च भवति।

**अवस्थानुकृतिनाट्यं, रूपकं तत्समारोपात्।**[2]

अर्थादितिवृत्ताधारितकाव्यनिबद्धं तत्तत्प्रवृत्तिगतनायकनायिकानां वान्यपात्राणां तादात्म्य-प्रतिपादककुशलकुशीलवै: कृतचतुर्विधावस्थानुकरणं नाट्यं कथ्यते। तद्वस्त्वाधिकारिक-प्रासङ्गिकभेदेन द्विधा विभज्यते। यथा दशरूपककार: कथयति-**तत्राधिकारी मुख्यमङ्गं प्रासङ्गिकं विदु:।**[3] नाट्यफलाधिकारी तत्फलभोक्ता तत्फलप्राप्तिपर्यन्तं नायकनिर्वाहित-वृत्तसम्बन्धिनी कथा आधिकारिककथा कथ्यते। यथा-

**अधिकार:फलस्वाम्यमधिकारी च तत्प्रभु:।**
**तन्निर्वत्तमभिव्यापि वृत्तं स्यादाधिकारिकम्॥**[4]

यथा रामायणे आद्यन्तफलभोगनिर्वृत्तको राम:। प्रकृतनाटके कामादिदोषदाह-कोपनिषद्विद्याविभूषितप्रतीकात्मकदार्शनिकनायको विवेक एव मोहादिमहाशत्रून् शमयित्वा प्रबोधोत्पत्तिरूपाद्वैतविष्णुफलभोक्तृप्रमाता धीरोदात्तनायकोऽस्ति।

---

1. प्रबोध चन्द्रोदयम्-1-4,1/2
2. दशरूपकम्-1-7
3. दशरूपकम्-1.11, अर्धकारिका
4. दशरूपकम्-1.12

**प्रथमाङ्के** – लोकप्रवृत्तककामरत्योः पारस्परिकसंवादानन्तरं त्रिविधदुःख-निर्वर्तकयोर्विवेकमत्योर्वार्तालापक्रमे मोहजनितकामक्रोधलोभमदमात्सर्यतृष्णाहिंसाहतविवेको मतिं कथयति यत्प्रिये भवबन्धनपातकः कामो मां मोक्षार्थिनं पापी कथयति। मतिः प्रश्नं करोति स्वाभाविकनित्यशुद्धबुद्ध-आनन्दमयामलपुरुषः कथं भवबन्धनपाशबद्धो भवति। विवेक उत्तरयति यद् भवसागरतरणकुशलपुरुषोऽपि कामिनीकटाक्षबाणाहतो भूत्वा पुनर्भवबन्धनपाशबद्धो भवति। ततश्च मतिरुद्धारार्थं प्रश्नं करोति। तामुत्तरयन् विवेकः कथयति यदुपनिषदा सह सम्बन्धेन प्रबोधोत्पत्तिः ततश्च भवबन्धमोचनम्।[1]

**द्वितीयाङ्के** – मोह आहूतदम्भं वदति यत्प्रबोधोदयार्थं कृतप्रतज्ञविवेकेन पवित्रतीर्थस्थलानि प्रति शमादयः प्रेषिताः। एतत्समये दक्षिणदिग्भागागताहङ्कारो ब्रूते। यदात्रात्यन्तमूर्खजनोऽपि पाण्डित्यगर्वान्वितो विलोक्यते। पुनश्चाश्रमवर्णनम्। ततश्च चार्वाङ्महामोहयोः कुशलक्षेमप्रश्नोपस्थापनानन्तरं कलिद्वारासह्यविरोधप्रकटनेन विष्णुभक्ति-नामयोगिन्या प्रभावः प्रचारः प्रसारश्च शीघ्रं वर्धते। एतत्समये एकपुरुषानीतमदमानपत्रेण ज्ञायते यच्छान्तिः श्रद्धामात्रा सह विवेकोपनिषदोः सम्मेलनार्थमहर्निशं प्रयत्नपरायणास्ति।[2]

**तृतीयाङ्के** – मिथ्यादृष्टिगतां श्रद्धां शान्तिर्वननगनदीपुलिनपुण्यनगराश्रमादि-स्थलेष्वन्वेषयन्ती सखीकरुणायाश्च परमार्शानुसारं श्रद्धामात्ममतश्रेष्ठप्रतिपादकेषु जैनदिगम्बरबौद्धादिपाखण्डालयेष्वन्वेषयति। तत्र विष्णुभक्त्याश्रितां श्रद्धां कापालिकः आकर्षणविद्यया आकर्ष्टुं प्रयतते।[3]

**चतुर्थाङ्के** – श्रद्धादर्शनार्थिनी मैत्री भणति यन्महाभैरवीजाल-पाशात्त्वदीयरक्षणं विष्णुभक्त्याभवत्। पश्चाद्राराज्ञा लोभविज्जयिनी सन्तोषप्रदां पूतवाराणसीपुरीं प्रस्थानार्थं सेनाप्रेषणादेशः प्रस्तावितः।[4]

**पञ्चमाङ्के** – विवेकसैनिकैर्यदा मोहपक्षः संहतः तदा निष्कर्षरूपतया श्रद्धायाः कथनमस्ति यदात्मीयजनविरोधो वंशनाशको भवति। एवं संवादक्रमे आत्मबान्धवक्रोधादि-निधनजनितकष्टापन्नं मनो वैयासिकी सरस्वती सांसारिकवस्तुस्थितिं सम्बोध्य पश्चाच्च वैराग्यं प्रति समाकृष्य निवृत्तिं मनसस्स्त्रीरूपे प्रणयति।[5]

---

1. प्रबोधचन्द्रोदयम्, प्रथमाङ्कः– 01 पृष्ठतः 41 पृष्ठपर्यन्तम्
2. प्रबोधचन्द्रोदयम्, द्वितीयाङ्कः– 42 पृष्ठतः 93 पृष्ठपर्यन्तम्
3. प्रबोधचन्द्रोदयम्, तृतीयाङ्कः– 94 पृष्ठतः 130 पृष्ठपर्यन्तम्
4. प्रबोधचन्द्रोदयम्, चतुर्थाङ्कः– 131 पृष्ठतः 165 पृष्ठपर्यन्तम्
5. प्रबोधचन्द्रोदयम्, पञ्चमाङ्कः– 167 पृष्ठतः 201 पृष्ठपर्यन्तम्

**षष्ठाङ्के** – जायमानसुखदिवसावकाशेषु शान्तिद्वारा पृष्टराजकुलसमाचारं विशदतया सूचयित्र्यां श्रद्धाया उपदेशो यथा नित्यानित्यवस्तुविचारणा एव प्रिया, वैराग्यमेकमात्रं मित्रम्, यमनियमादीनि सन्मित्राणि, शमदमप्रभृतयः सहचराः, मैत्र्यादिपरिचायिकाः, नित्यसहचरी मुमुक्षा, रिपुमोहममतासङ्कल्प-सङ्गादयश्च उच्छेद्याः, इत्यादितर्क सङ्घर्षादि-जन्यप्रबोधोदयाद् अपगता-ज्ञानान्धकारवान् पुरुषो विष्णुभक्तिप्रसादान्मुक्तो भवति।[1]

**नाटकीयतत्त्वम्**- कविना एतन्नाटके निखिलनाटकीयनियमानामनुपालनं निपुणतापूर्वकं विहितम्। प्रतीकात्मकनायकविवेकः तत्सहचरीभूतानां पात्राणां वस्तुविचारसन्तोषपुरुषप्रबोधोदय वैराग्यनिदिध्यासनसङ्कल्पपारिपार्श्वकपुरुषसारथिप्रतिहारिणां प्रतिनायकपक्षाणां महामोहचार्वाक-कामक्रोधलोभदम्भाहङ्कारमनोदिगम्बरभिक्षुककापालिकादीनां पारस्परिकसङ्घर्षः, सन्ध्यासूर्योदय-वनोद्यानादीनाञ्च प्रसङ्गानुकूलं रम्यं वर्णनमत्र दृश्यते। काव्यशास्त्रनियमानुसारेण प्रकृतकाव्ये शान्तरसः प्रधानाङ्गीरसरूपेण सहृदजनैरास्वाद्यमानोऽस्ति। अङ्गरसरूपेण शृङ्गारकरुण-भयानकरसाः सामाजिकचित्तद्रावकास्सन्ति। अङ्कान्ते वृत्तपरिवर्तनं, अर्थप्रकृति-अवस्था नाट्यसन्ध्यादिकार्यञ्च नाट्यनियमान्तरगतमेव कृतम्। एतन्नाटकीयप्रथमाङ्के सङ्कीर्ण-विष्कम्भकस्य प्रयोगो दृश्यते।

**भाषागतवैशिष्ट्यम्**- आत्माभिव्यक्तेर्मौलिकाधारा भाषैव भवति। कविरात्म-भावाभिव्यक्तिं गद्यं पद्यं वोभयप्रकारेण करोति। पद्यापेक्षया गद्यं कवीनां निकषं कथ्यते। यथा "गद्यं कवीनां निकषं वदन्ति।" परन्तु नाटकेषु संवादो गद्यपद्योभयप्रकारेण प्रस्तूयते। गद्ये नीरसतावशात्कविर्यथाप्रसङ्गमनोरञ्जनात्मकोपदेशजनिकां। पद्यपरिष्कृतप्रौढ-प्रतिभां प्रदर्शयति।

प्रकृतप्रतीकात्मकदार्शनिकतत्त्वोपदेशजनकनाटके नाट्यशास्त्रीयनियमानुगुणं सरस-बोधगम्योद्घोषात्मकाल्पसामासिक-आरभटी-कैशकी-सात्त्वती-भारत्यादिनाट्यवृत्तिविभूषितभाषया सह पात्रानुसारप्राकृत-शौरसेनी-महाराष्ट्री-मागधीभाषायाः प्रयोगो दृश्यते।

छन्दोविच्छित्तिदृष्ट्या प्रकृतनाटके शार्दूलविक्रीडित-शिखरिणी-वसन्ततिलका-पुष्पिताग्रा-वंशस्थ-हरिणी-मालिनी-पृथ्वी-इन्द्रवज्रा-स्रग्धरा-मन्दाक्रान्ता-प्रहर्षिण्यादिछन्दसां प्रयोगः प्राकरणिकभावानुकूल एवास्ति। चन्द्रोदयनाटके आस्वाद्यमानशृङ्गारकरुणशान्तादयो रसास्सन्ति। 'रस्यत इति रसः' अर्थाद् आस्वादजीवातुभूतपदार्थ एव रसः। काव्ये विभावनादिसमूहालम्बनात्मकव्यापाराभिन्नव्यञ्जनाव्यापारद्वारा स्वपरभेदशून्यः सामाजिकजन-बुद्धिग्राह्यः प्रधानीभूतपदार्थ एव रसपदवाच्यः। काव्यशास्त्रज्ञैःश्रव्यकाव्ये शृङ्गारादिनवरसनां नाट्ये चाष्टौ रसनां स्थापना कृता। यथा भरतमुनिर्नाट्यशास्त्रे निरूपयति-

---

1. प्रबोधचन्द्रोदयम्, षष्ठाङ्कः- 202 पृष्ठतः 241 पृष्ठपर्यन्तम्

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**
**बीभत्साद्‌भुतसञ्ज्ञौ चेत्यष्टौ नाट्यरसाः स्मृताः॥**[1]

इत्थं नाटकेऽष्टौ रसविधानं विहितम्। शान्तरसस्य तादृशाभिनयाभावत्वाद-मङ्गलप्रायत्वाच्च नाट्यरसरूपे आचार्यभरतमुनिना गणना न कृता स्यात्। तथा चान्योत्तरवर्त्याचार्यैः शान्तोऽपि नवमो रसःकाव्यस्याङ्गीरसरूपेणाङ्गीकृतः, अन्यथा महाभारतादिशान्तरसप्रधानकाव्येषु तदनुपपत्तिप्रसङ्गः स्यात्। आचार्य मम्मटभट्टो लोकप्रवृत्तिमूलकशृङ्गारादिभ्योऽष्टाभ्यो रसेभ्यो निवृत्तिमूलकं शान्तरसं भिन्नक्रमेण प्रतिपादयति, काव्ये तदास्वाद्यमानतां च स्वीकृतवान्। यदुक्तम्

**निर्वेदस्थायिभावेऽस्ति शान्तोऽपि नवमो रसः।**[2]

प्रकृतकाव्ये शान्तरस एव प्रधानतयास्वाद्यमानो वर्तते। मायिकपञ्जरपञ्जरितपुरुषः शास्त्रोपदेशादुचितानुचित-कर्त्तव्याकर्त्तव्य-युक्तायुक्त-नश्वरानश्वर-नित्यानित्यवस्तुविवेकयोग्यता-माप्नोति। सैव योग्यता निर्वेदावस्था कथ्यते। अथवा चित्तवृत्तिचाञ्चल्याभावाद् ऐकान्तिक-वस्तुबोधपरायणतैव निर्वेदः, अथवा वैषयिकवेदनाभावाद् एकमात्रपरब्रह्मपरमेश्वरस्य श्रवणचिन्तनमनननिदिध्यासनम् एव निर्वेदः। गीतावचनं यथा-

**यदा ते मोहकलितं बुद्धिर्व्यतितरिष्यति।**
**तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥**

**श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।**
**समाधावचला बुद्धिस्तदा योगमवाप्यसि॥**[3]

इत्थं साधनापराकाष्ठावस्थामधिगतः शान्तो दान्तश्च प्रमाता ब्रह्मसाक्षात्कारं करोति यदलौकिकमङ्गलमाहोस्विद् ब्राह्मी स्थितिः। यथोक्तं गीतायाम्-

**एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।**
**स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति॥**[4]

साहित्यं समाजस्य दर्पणम्। लोकहितैषी कविः सामाजिकोत्थानार्थं समाजगतसमस्याः काव्यनाट्ययोर्माध्यमेन प्रकाशयति, वैदिकलौकिकपरम्परापराङ्मुखान्नृपादीन्सरसकाव्योपदेदेशेन कर्त्तव्याकर्त्तव्यञ्च बोधयित्वा परम्परोन्मुखीं करोतीति धिया आचार्यश्रीकृष्णमिश्रयती

---

1. नाट्यशास्त्रम्-6.4
2. काव्यप्रकाशः चतुर्थः उल्लासः-47
3. श्रीमद्‌भगवद्गीता-2.52.53
4. श्रीमद्‌भगवद्गीता-2.72

राज्यसुखविषमूर्छितं कीर्तिवर्माख्यं नृपं चेतनाप्रदानार्थमलौकिकमङ्गलोपकारकं दार्शनिक-विद्योपेतं प्रतीकात्मकं शान्तरसान्वितं प्रबोधचन्द्रोदयनामकं दृश्यकाव्यं सहृदयहृदयरङ्गमञ्चे प्रस्तौति।

संसारचक्रप्रवर्तनाय महामोहस्याज्ञानमेव मूलम् , तन्निवृत्तिः तत्त्वावबोधेन सम्भवति। यथा चन्द्रोदये-

**अमुष्य संसारतरोरबोधमूलस्य नोन्मूलविनाशाय।**
**विश्वेश्वराधनबीजजातातत्त्वावबोधादपरोऽभ्युपायः॥**[1]

अर्थाद् अनादिभावरूपाज्ञानोत्पन्नसंसारवृक्षोत्पाटनं भगवदाराधनाजन्यज्ञानेनैव सम्भाव्यते, नास्ति कोप्यन्योपायः। अत्र मिथ्यादृश्यमानं जगदालम्बनविभावः, सांसारिकदुःखोच्छेदनार्थमे-कान्तवासादय उद्दीपनविभावाः, मतिधृत्यादयो व्यभिचारिभावाः, निर्वेदस्थायिभावः। तस्माच्छान्तरसनिष्पत्तिः।

नाटकीयवस्तुविचारपात्रस्य राज्ञया सह संवादक्रमे शस्त्रविद्यया पञ्चशरं जिगीषुं राजानं प्रबोधयत् प्रोवाच वस्तुपात्रं यद् दारासक्तिदर्शनोत्कण्ठां त्यक्त्वा परिणतिविरसतां देहबीभत्सतादिकञ्चाकलय्य कामोन्मूलनमवश्यम्भावि। कामस्य प्रधानास्त्रभूतां नारीं विजित्य तदन्यसहायकसमूहा वितथमनोरथा भूत्वा स्वयमेव पराभवं गमिष्यन्ति। यानि शृङ्गारोद्दीपकानि कामस्य मित्राणि चन्द्र-चन्दन-चन्द्ररात्रि-चञ्चलभ्रमर-विलास-कानन-वसन्तोदय-घनगर्जन-युक्तदिवसनीपवनपवनादीन्यपि पराजितानि भविष्यन्ति। शत्रुञ्जयः पुरुषः कथमपि शत्रुपाशबद्धो न भवति, अपितु दृढतया शत्रुणा साकं सङ्घर्षं कृत्वा विजयश्रीं प्राप्नोति। राजा क्रोधोपरि विजयाय क्षमामाह्वयति। तत्र क्षमा भणति -

**क्रोधान्धकारविकटभ्रुकुटीतरङ्ग**
**भीमस्य सान्ध्यकिरणारुणरौद्रदृष्टेः।**
**निष्कम्पनिर्मलगभीरपयोधिधीरा**
**वीराः परस्परपरिवादगिरः सहन्ते॥**[2]

अर्थाच्छत्रुः क्रोधरूपान्धकारारुणाननवान् भवतु, अथवा सायङ्कालीन- सूर्यकराभ-कोपरक्तनयनवान् भवतु, तथापि वीरपुरुषः तत्क्रोधवचनानि निस्तरङ्गसमुद्रवद् धैर्येण सहते। पुरुषार्थेषु परमपुरुषार्थो मोक्षोऽस्ति। तन्मोक्षप्राप्तौ बाधकीभूतकामक्रोधलोभादीनामुपरि विजयः प्राथम्येन प्राप्तव्यः। नृपाहूतलोभविजयिनः सन्तोषस्योपदेशोऽस्ति यत् "धनिकजनानां द्वारे कृपणजनः तिरस्काररूपसन्तापं सहते।" आकाशवाणीतोऽयि भोः! मूर्खलुब्ध तव

1. प्रबोधचन्द्रोदयम्-4.7
2. प्रबोधचन्द्रोदयम्-4.20

व्यामोहो दुच्छेद्योऽस्ति।

**समारम्भा भग्नाः कति न वरांस्तव पशो**
**पिपासोस्तुच्छेऽस्मिन् द्रविणमृगतृष्णार्णवजले।**
**तथापि प्रत्याशा विरमति न ते मूढ शतधा**
**विदीर्णं यच्चेतो नियतमशनिग्रावघटितम्॥**[1]

अथ च

**मृत्युर्नृत्यति मूर्ध्नि शश्वदुरगी घोरा जरारूपिणी**
**त्वामेषा ग्रसते परिग्रहमयैर्गृध्रैर्जगद् ग्रस्यते।**
**धूत्वा बोधजलैरबोधबहुलं तल्लोभजन्यं रजः**
**सन्तोषामृतसागराम्भसि मानाङ्मग्नः सुखं जीवति॥**[2]

इत्थं शत्रुञ्जयो विवेकी राजा (नायकः) वैषयिकसुखं प्रति तृणवद् व्यवहारं कृत्वा यमनियमादिमाध्यमेन मोक्षसुखमनुभवति। सांसारिकसकलसमुद्रशैलनद्यादीना-मात्यन्तिकविनाशशीलत्वमवगमनात्प्रियबन्धुबान्धवव्यसनजन्यविवेकापहारिणं हृदय-दाहोत्पादकविषमशोकानलं स्फुरन् वदति –

**ध्रुवं ध्वंसो भावी जलनिधिमहीशैलसरिता-**
**मतो मृत्योः शीर्यत्तृणलघुषु का जन्तुषु कथा।**
**तथाप्युच्चैर्बन्धुव्यसनजनितः कोऽपि विषमो**
**विवेकप्रोन्माथी दहति हृदयं शोकदहनः॥**[3]

अनेन संसारस्य नश्वरताभासनाद्विवेकं बन्धुवियोगादिजन्यसन्तापोऽत्यधिकं पीडयति। यथोक्तं गीतायां भगवता देवकीनन्दनेन

**जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।**
**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥**[4]

इत्यादिशास्त्रयुक्त्या विवेकिनं राजानं विष्णुभक्ति-शान्ति-श्रद्धाः प्रबोधयन्त्यो मीमांसा-न्याय-साङ्ख्यादिभिः शास्त्रैर्नानापथप्रथित आगमप्रमाणगम्योऽजोऽवकाशशून्यो भेदबुद्धिविकलोऽखण्डोऽद्वितीयोऽच्युत उमापतिः परमेश्वर एक एव। यथा –

---

1. प्रबोधचन्द्रोदयम्–4.19
2. प्रबोधचन्द्रोदयम्–4.23
3. प्रबोधचन्द्रोदयम्–5.2
4. श्रीमद्भगवद्गीता–2.27

**ज्योतिः शान्तमनन्तमद्वयमजं तत्तद्गुणोन्मीलनाद्**
**ब्रह्मेत्यच्युत इत्युमापति प्रस्तूयतेऽनेकधा।**
**तैस्तैरेव सदागमैः श्रुतिमुखैर्नानापथप्रस्थितै-**
**र्गम्योऽसौ जगदीश्वरो जलनिधिर्वारां प्रवाहैरिव।।**[1]

यथा पुष्पदन्तेन शिवमहिम्नस्तोत्रे आराध्यते परमेश्वरः-

**त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति**
**प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।**
**रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां**
**नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।**[2]

परापरदारुणयुद्धेन लोकायत-बौद्धादिपाखण्डागमन्यायमीमांसादीनामवगाढप्रहारै-र्जर्जरीभूतमशेषशत्रुमच्युतभक्तिप्रसादात्पुत्रधनदारादिविषममोहशोकशून्यमवाप्तवैराग्योपदेश-योग्यताकं विवेकिलोकपालं सरस्वती सांसारिकासारतामित्थं द्रढयति-

**वंशं प्राप्ते मृत्योः पितरि तनये वा सुहृदि वा**
**शुचा सन्तष्यन्ते भृशमुद्गरताडं जडधियः।**
**असारे संसारे विरसपरिणामे तु विदुषां**
**वियोगो वैराग्यं द्रढयति वितन्वञ्शमसुखम्।।**[3]

सरस्वतीमनसोस्संवादक्रमे सरस्वती मनःकथयति यत् पदार्थानामनित्यतायाः विचार एव ममतोच्छेदनस्य प्रथमोपायोऽस्ति। अनन्तसंसारचक्रान्वितात्मीयजनसङ्गतिर्विद्युत्प्रकाश-वत्क्षणभङ्गुरेत्याकलय्यानन्दमनुभवतु। पुनश्चाकाण्डागतशोकप्रवाहवेगानामननुध्यानमेव परमौषधमिति मुन्युपदिष्टप्रमाणवचनैर्मेघश्यामकान्तिवत्यतिसुन्दरहार-केयूर-कुण्डल-कलिताङ्गश्रीहरिरूपसशीलतजलाशयसम्भिन्नेऽपगतशोकवति ब्रह्मण्यभेदभावनयात्मशान्ति-मधिगच्छत्विति। तद्वचनैरुद्बोधितमनोदशेत्थंभूता-

**नार्यस्ताः नवयौवना मधुकरव्याहारिणस्ते द्रुमाः**
**प्रोन्मीलन्नवमल्लिकासुरभयो मन्दास्त एवानिलाः।**
**अद्योदात्तविवेकमार्जिततमः स्तोमव्यलीकान्पुन-**
**स्तानेतान्मृगतृष्णिकार्णवपयः प्रायान्मनः पश्यति।।**[4]

---

1. प्रबोधचन्द्रोदयम्-5.9
2. शिवमहिम्नस्तोत्रम्
3. प्रबोधचन्द्रोदयम्-5.22
4. प्रबोधचन्द्रोदयम्-5.32

वस्तुतस्तु ऐहिकशृङ्गारसुखोत्पादकानां स्त्रीभ्रमरगुञ्जितपादपप्रफुल्लितप्रत्यग्र-मल्लिकाकुसुमसुरभितानिलादीनां मृगतृष्णाजलवदसत्प्रतिभानं कृत्वा तेषां त्यागः प्रथमं शान्तेः सोपानमस्तीति मनसो वचनश्रवणानन्तरं सरस्वती भणति यद् गृहस्थजनोऽनाश्रमी न स्यात्। अत एव तव निवृत्तिः सधर्मचारिणी भवतु, शम-दम-सन्तोषादिपुत्रा अनुचरा भवेयुः, यमनियमादयश्च मन्त्रिणो भवन्तु, विवेकोऽपि तवानुग्रहादुपनिषद्देव्या साकं यौवराज्यसुखमनुभवतु। मैत्र्यादिचतस्रो भगन्यो भगवत्या विष्णुभक्त्या तव सन्तोषाय प्रेषितास्सन्ति। यमनियमादिभिः साकं यौवराज्यसुखोपभोगाद् आत्मात्मस्थितिमधिगच्छ। यथा-

**त्वत्सङ्गाच्छाश्वतोऽपि प्रभवलयजरोपप्लुतो बुद्धिवृत्ति-**
**ष्यको नानेव देवो रविरिवजलधेर्वीचिषु व्यस्तमूर्तिः।**
**तूष्णीमालम्बसे चेत्कथमपि वितता वत्स संहृत्यवृत्ती-**
**र्भात्यादर्शे प्रसन्ने रविरिव सहजानन्दसान्द्रस्तदात्मा॥**[1]

अर्थात्तव मनसो विषयनिवृत्तौ सत्यामात्मा सूर्यवत्स्वाभाविकानन्दनिर्भरो भविष्यति। तत्पश्चाच्छान्तिर्विवेकादिष्टवचनमनुवदन्ती कामादिपुत्रनाशान्मोहनिवृत्तिर्भविष्यति, ततश्च वैराग्योदयः, ततश्च मनोभवक्लेशनाशः तस्माच्च पुरुषः तत्त्वावबोधमिच्छति। यथा-

**अस्तं गतेषु तनयेषु विलीनमोहे**
**वैराग्यभाजि मनसि प्रशमं प्रपन्ने।**
**क्लेशेषु पञ्चसु गतेषु समं समीहां**
**तत्त्वावबोधमभितः पुरुषस्तनोति।**[2]

राजकुलस्यारोग्यमवलोकनेनामृतनयना श्रद्धा भणति यच्छान्त्यर्थमसज्जनानां निग्रहो यमनियमादिसज्जनानां सत्कारश्च कर्त्तव्यः। जितेन्द्रियदेवानुजीविभक्तसमूहो जगत्पिता-परमेश्वरस्याराधनां करोति। यथा

**असतां निग्रहो यत्र सन्तः पूज्या यमादयः।**
**अराध्यते जगत्स्वामी वश्यैर्देवानुजीविभिः॥**[3]

स्वाराट् सम्राट् वा पदालङ्कृतनृपोद्देश्यमखिलानर्थमूलमायाया निग्रहणं शान्तिश्रावित-राजकुलव्यवस्थाञ्च श्रद्धेत्थं श्रावयति।

---

1. प्रबोधचन्द्रोदयम्-5.33
2. प्रबोधचन्द्रोदयम्-6.1
3. प्रबोधचन्द्रोदयम्-6.8

नित्यानित्यवस्तु-विचारणैव प्रिया, वैराग्यमेकमात्रं मित्रम्, यमनियमादयः सखायः शमदमप्रभृत्तयः सहचराः, मैत्र्याद्याः सेविकाः। मुमुक्षा नित्यं सहचरी, मोहममता-सङ्कल्पसङ्गादिशत्रवश्च दमनीयाः। यथा-

**नित्यानित्यवस्तुविचारणाप्रणयिनी वैराग्यमेकं सुहृत्-**
**सन्मित्राणि यमादयः शमदमप्रायाः सहाया मताः।**
**मैत्र्याद्याः परिचारिकाः सहचरी नित्यं मुमुक्षा बला-**
**दुच्छेद्या रिपवश्च मोहममतासङ्कल्पसङ्गादयः।**[1]

निरुपाधिसुन्दरं विविधविद्याधरविलासलावण्यमधुमतीं मेदनीमवाप्य पवित्रधर्मरज्वा मोक्षार्थिनं राजानं पुनरङ्गारपयस्विन्यामवगाहमानमवलोक्योपनिषद्देव्येत्थं पुरुषप्रस्तावं कुर्वन्त्याह जगज्जन्मस्थितिलयकाररूपाः स्वाभाविकानन्दप्रकाशरूपशान्तविकारशून्या नित्यभूतेश्वरस्य शरणागताः विद्वज्जना द्वैतभावं विनाश्याग्रेसरन्ति। यथा-

**यस्माद्विश्वमुदेति यत्र रमते यस्मिन्पुनर्लीयते**
**भासा यस्य जगद्विभाति सहजानन्दोज्ज्वलं यन्महः।**
**शान्तं शाश्वतमक्रियं यमपुनर्भावाय भूतेश्वरं**
**द्वैतध्वान्तमपास्य यान्ति कृतिनः प्रस्तौमि तं पूरुषम्।।**[2]

अकर्ता पुरुषः कथमीश्वरः? वस्तुज्ञानेन कथं संसारनिवृत्तिस्सम्भवति? संसार-निवर्त्तककर्माचरणजन्यशान्तमनोभाववतःशतवर्षं जिजीविषो राज्ञः सोपहासपूर्वकं कथनमस्ति यद् यज्ञधूमान्धकारश्यामलितनयना मीमांसा कुतर्कोपहता, यतो हि स्वाभाविका-चेतनाचललौहखण्डश्चुम्बकसन्निधानेनाचलेतरो भवति तथैवाजेक्षणेरिता माया विश्वसृष्टिकरी भवति। एतदेव तदीयेश्वरता। तस्मात्तमोऽन्धजनानामेतादृगीश्वरभावनाया नाशोऽज्ञानोत्पन्ना-सारसंसारस्य कर्मादिना मोचनमहोऽन्धकारेणान्धकारस्य नाशवत्प्रतीयते। यदन्धकारमयानां स्वभावबद्धानां सप्तभुवनानां प्रकाशकं तद्ब्रह्मतत्त्वमेव मृत्युभयरक्षकं संसारतारकञ्चास्ति। यथा-

**स्वभावलीनानि तमोमयानि**
**प्राकाशयेद्यो भुवनानि सप्त।**
**तमेव विद्वानतिमृत्यमेति**
**नान्योऽस्ति पन्था भवमुक्तिहेतुः।।**[3]

1. प्रबोधचन्द्रोदयम्-6.3
2. प्रबोधचन्द्रोदयम्-6.14
3. प्रबोधचन्द्रोदयम्-6.17

पुरुष उपनिषद्देव्याः सम्मुखं सहर्षं प्रश्नमुपस्थापयति यदहं पुरुष आत्मा? किमहं परमेश्वररूपो वा। उपनिषद् एवमेतत्, तथाहि

**असौ त्वदन्यो न सनातनः पुमान्**
**भवान्न देवात्पुरुषोत्तमात्परः।**
**स एष भिन्नस्त्वदनादिमायया**
**द्विधेव बिम्बं सलिले विवस्वतः॥[1]**

पुरुषो विवेकं प्रति भगवन्नहं भगवतीकथितोपदेशं सम्यगवबोधनेऽसमर्थोऽस्मि।

विवेको गदति यत्पदार्थानामज्ञानेन वाक्यार्थज्ञानं न भवति। तद्बोधरूपोपदेशो यथा–

**एषोऽस्मीति विविच्य नेति पदतश्चित्तेन सार्धं कृते**
**तत्त्वानां विलये चिदात्मनि परिज्ञायते त्वमर्थे पुनः।**
**श्रुत्वा तत्त्वमसीति बाधितभवध्वान्तं तदात्मप्रभं**
**शान्तं ज्योतिरनन्तमन्तरुदितानन्दः समुद्योतते॥[2]**

अर्थाद् 'एषोऽस्मि' 'नेति' इत्यादिपदैश्चित्तापेक्षया विवेकभावोत्पन्नो भूत्वा तत्त्वविलयद्वारा त्वमर्थस्य चिदात्मज्ञाने सति 'तत्त्वमसि' एतद् वाक्यानुसन्धातात्संसार-तमोनिवर्त्तकं स्वयं प्रकाशमानमनन्तर्ज्योतिःप्रकाश्यते। पुरुषःश्रुतार्थस्य परिभावनं करोति। निदिध्यासनं निगदति यद्भगवती विष्णुभक्तेराज्ञास्ति यद्रहस्याभिप्रायं विवेकमुपनिषद्देवीं सम्बोध्य त्वं स्वयं पुरुषसकाशं गच्छ। यदा समाविष्टनिदिध्यासनपुरुषो ध्यानस्थो भवति तदाश्चर्यमाश्चर्यमिति शब्दो मुखरितो भवति, ततश्च प्रबोधोदयः पुरुषमाप्नोति। यथा–

**उद्दामद्युतिदामभिस्तडिदिव प्रद्योतयन्ती दिशः**
**प्रत्यग्रस्फुटदुत्कटास्थि मनसो निर्भिद्य वक्षःस्थलम्।**
**कन्येयं सहसा समं परिकरैर्मोहं ग्रसन्ती भज-**
**त्यन्तर्धानमुपैति चैकपुरुषं श्रीमान् प्रबोधोदयः॥[3]**

प्रबोधोदयस्य कथनमस्ति यद् अभ्युदितप्रबोधाद्ध्वस्तीकृत्नैसर्गिकप्रभावत्यस्मिन् त्रैलोक्ये किं किं प्राप्तम्? किं नाशितम्? किमुत्पादितम्? किं वस्त्रादिवद् ग्रथितम्? किञ्चाकाशादिक्रमेण कारणेऽलीयन्त? किञ्चिदस्त्यपि नास्ति तज्ज्ञानेन कथमपि वितर्कमार्गे

---

1. प्रबोधचन्द्रोदयम्–6.25
2. प्रबोधचन्द्रोदयम्–6.28
3. प्रबोधचन्द्रोदयम्–6.28

त्रैलोक्यस्य स्थिरता सम्भवा। यतो हि स्वाभाविकप्रकाशात् त्रैलोक्यमूलतमोदलितोऽहं प्रबोधयोऽस्मि। यथा–

**किं वाप्तं किमोपादितं किमुदितं किं वा समुत्सारितं**
**स्यूतं किं नु विलायितं नु किमिदं किञ्चिन्न कानिचन।**
**यस्मिन्नभ्युदिते वितर्कपदवीं नैवं समारोहति**
**त्रैलोक्यं सहजप्रकाशदलितं सोऽहं प्रबोधोदयः॥**[1]

पुरुषः सानन्दशान्तमनसा प्रबोधचन्द्रोदयमालिङ्ग्य कथयति यदन्धकारराशिं अपहृत्य सुप्रभातमभूत्। यतो हि मोहरूपान्धकारमपकृत्य विकल्पनिद्राञ्च मथित्वा बोधरूपश्रद्धाद्यया सह विश्वात्मकविष्णुराविर्भवति स एष एव। यथा–

**मोहान्धकारमवधूय विकल्पनिद्रा-**
**मुन्मथ्य कोऽप्यजनि बोधतुषाररश्मिः।**
**श्रद्धाविवेकमतिशान्तियमादिकेन**
**विश्वात्मकः स्फुरति विष्णुरहं स एषः॥**[2]

इत्थं विष्णुभक्तिप्रसादात्पूर्णमनोरथो लौकिककामनाशून्यो दिग्गमनतत्परः शान्तो विगतशोकमोहवान् पुरुषः स्वम्भूर्मुनिर्भूत्वा निर्मलसच्चिदानन्दपदे प्रतिष्ठितोऽभवत्। यथा–

**प्रशान्तारातिरगमद्विवेकः कृतकृत्याम्।**
**नीरजस्के सदानन्दे पदे निवेशिताः॥**[3]

इत्थम् आचार्यश्रीकृष्णमिश्रयतिना समस्तनाट्यनियमनिकषे सहजतयोपनिषद्विद्यायाः तत्त्वबोधकं शुभ्रशान्तरसगङ्गाधाराप्रवाहकं प्रबोधचन्द्रोदयनामकमेतत्प्रतीकात्मकनाटकं प्रणीतम्। एतन्नाटके वीतरागकवेरुत्कृष्टकाव्यप्रतिभा स्वतः दृग्गोचरीभूता विद्यते। नाटकेऽस्मिन् काव्यार्थीभूतः शान्तरसः सहृदयान् आस्वादनाय आवर्जः यति।

काव्योद्देश्यमपि लौकिकमङ्गलेन सह अलौकिकमङ्गलकारकमुपदेशजननम्। अत्र कविना लौकिकमङ्गलभोक्तृजनेभ्योऽलौकिकफलोपदेशः सरसतया प्रकटीकृतः। मायिक-शोकमोहलोभादिग्रस्तजन आत्मानन्दप्राप्तुमेतन्नाटकस्यानुसन्धानाच्छारीरिकसूत्राणि प्रति रुचिं प्रदर्श्यालौकिकमङ्गलमार्गेऽग्रेसरो भविष्यति।

---

1. प्रबोधचन्द्रोदयम्–6.29
2. प्रबोधचन्द्रोदयम्–6.30
3. प्रबोधचन्द्रोदयम्–6.31

## सन्दर्भग्रन्थसूची


1. प्रबोधचन्द्रोदयम्, चौखम्भाविद्याभवनम्, संस्करणम्, 2014
2. संस्कृत साहित्य का इतिहास, बलदेव उपाध्याय, शारदानिकेतन संस्करण 2001
3. काव्यप्रकाशः, विश्वेश्वरीटीकासहितः, पुनर्मुद्रणसंस्करणम्, 2011
4. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर


✦✦✦

# भारतीयशास्त्रेषु पञ्चकोषानुगुणं बालविकासः

डॉ. चक्रधरमेहेरः*

**भूमिका -**

समग्रेऽपि चराचरजगत्यस्मिन् जीवितजनः जीवने न कदाचित् गतिहीनो दृश्यते। तत्र तु कारणं समयानुगुणं विभिन्नास्ववस्थासु नूतनगुणानामाविर्भावः, प्राचीनानाञ्च विशेषतानां लोप इति। यतः विकासात्मकप्रक्रियायामस्यां जायमानानि सर्वाण्यपि परिवर्तनानि समानानि न परिलक्ष्यन्ते। जीवनस्य प्रारम्भिकावस्थायां जायमानानि परिवर्तनानि तु रचनात्मकानि निर्माणात्मकानि वा भवन्ति येन प्राणिषु परिपक्वता समायाति। उत्तरावस्थायां च जायमानानि परिवर्तनानि विनाशात्मकानि भवन्ति येन प्राणी वृद्धत्वमवाप्नोति। अतः बालकस्य प्रारम्भिकावस्थायाम् अथवा तस्य रचनात्मककाले यः विकासः दरीदृश्यते सः भाविजीवनस्य मुख्याधारत्वेन द्रढीयान् भवति। एवं रूपेण प्राणिषु आजीवनं सक्रियतायै शारीरिक-मानसिक-बौद्धिक-सामाजिक-आर्थिक-धार्मिक-सांवेगिकादिक्षेत्रेषु निरन्तरम् अनुकूलं परिवर्तनमपेक्ष्यतैव। इदमेव परिवर्तनं मनोवैज्ञानिकैः, दार्शनिकैः शिक्षाशास्त्रिभिर्वा विकासनाम्नाभिधीयते। यथा हि -

Development is a process that creates regular progress, growth, positive changes in human tendency or the process of becoming bigger, stronger, better in daily life or achievement of fitness through physical, mental, intellectual, emotional, social and environmental sources.

कदाचिद् विकाससन्दर्भेषु अभिवृद्धिपदस्यापि बहुधा प्रयोगः पर्यायवाचित्वेन दृश्यते। परम् उभयोरपि शब्दयोः सम्यक् परिशीलनेन स्पष्टमिदं भवति यत् वृद्धिर्नाम शरीरे विद्यमानानाम् आन्तरिकाङ्गानां बाह्यङ्गानाञ्च अनुकूलपरिवर्तनं वर्धनञ्च। विकासस्तु शारीरिकः, मानसिकः, बौद्धिकः, सामाजिकः, सांवेगिकश्च भवति। अर्थात् शरीराङ्गेषु वृद्धिः गर्भाधानस्य सप्ताहद्वयात्परमारभ्य प्रायः विंशत्यायुरवाप्य अवरुद्धा भवति। परं विकासस्य प्रक्रिया सार्वभौमिकी वर्तते या शिशोः जन्मनः आरभ्य अविरामगत्या

---

* सहायकाचार्यः, शिक्षाशास्त्रविभागः, के.सं.विश्वविद्यालयः, श्रीरणवीरपरिसरः, जम्मूः।

मृत्युपर्यन्तं प्रचलति। इत्थम् अभिवृद्धेरपेक्षया विकास इति शब्दः सार्वकालिकः व्यापकश्च वर्तते, यस्य विविधपक्षाणां मापनं मूल्याङ्कनञ्च अत्यन्तं महत्त्वपूर्णं भवति।

## बालविकासस्य सम्प्रत्ययः -

कस्यचिदपि प्राणिनः जीवनारम्भः तस्य जन्मनः प्राक् गर्भावस्थायामेव जायते। वस्तुतः शिशोः जन्म तु केवलं विकासक्रमेषु जायमानं किञ्चन परिवर्तनमात्रम्। अनेनैव शिशुः आन्तरिकवातावरणात् बहिरागत्य बाह्यवातावरणेन साकं सम्पर्कं स्थापयति। ततश्च तस्य विकासक्रमः आजीवनं प्रचलति। मनोवैज्ञानिकाः, दार्शनिकाः, शिक्षाशास्त्रिणश्च सर्वे बाल्यावस्थायाः महत्त्वमङ्गीकुर्वन्तः अस्मिन्नेवायुषि बालस्योचितपालन-पोषणार्थं शिक्षणार्थञ्च बलं ददति येन अग्रे गत्वा सः बालः सुनागरिकस्सन् समाजनिर्माणकार्येषु महतीं भूमिकामावहेदिति। **फ्रायड** महोदयः कथयति 'प्राणी पञ्चवर्षाभ्यन्तरे यथा निर्मितो भवति अग्रेऽपि प्रायः सः तथैव भवति' इति। अनेन स्पष्टमिदं भवति यत् बालविकासः सम्पूर्णमानवविकासे प्रथमसोपानत्वेन कार्यं करोति।

## भारतीयशास्त्रेषु बालविकासः

विकासपरम्परायामस्यां मानवजातेः विकासः नाद्यतनीयः विषयः। अयं तु सृष्टेः आरम्भादेव जायमानः वर्तते। भारतीयशास्त्रेषु विकाससन्दर्भे विस्तृतरूपेण विवेचनं कृतमस्ति। सांख्यदर्शने तु 'सृष्टिविकासः' इति विषये मुख्यतया चर्चा कृता दृश्यते। सम्पूर्णसृष्टेः प्रकृतिपुरुषरुपेण जडचैतन्यरूपेण वा सत्ताद्वयं वर्तते। तदनुसारं प्रत्येकमात्मनि पुरुषः प्रकृतिश्च विद्यमाने स्तः। सृष्टेः जन्मविकासवत् मानवस्यापि जन्मविकासयोर्स्थितिः समरूपा वर्तते। प्रत्येकं मनुष्यः स्वयमेव सृष्टि भूत्वा सृष्टिविकासस्य स्थित्यनुगुणम् आत्मानं नियोजयति। वस्तुतः मातुः गर्भे शिशुः सूक्ष्मशरीररूपेण जन्मधारणं करोति। तदनु तस्मिन्नेव सूक्ष्मशरीरे प्रत्येकं तन्मात्रा तत्सम्बद्धमहाभूतमुत्पादयति। तद्यथा - शब्देनाकाशः, स्पर्शेन वायुः, रूपेण तेजः, रसेन जलं, गन्धेन च मृत्। अनेन क्रमशः मातुः एव गर्भे पञ्चतत्त्वैर्निर्मितस्य मानवशरीरस्य वृद्धिः भवति। मासत्रयात्परं गर्भस्थितस्य भ्रूणस्य कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि च स्थूलरूपेण परिवर्तितानि भवन्ति। भ्रूणरूपेण वर्धमानस्य शिशोः जन्मनः पश्चात् कर्मेन्द्रियाणि सक्रियाणि जायन्ते। ज्ञानेन्द्रियाण्यपि स्वव्यापारेषु शनैः चेतनयुक्तानि भवन्ति। इत्थं शरीरेन्द्रियाणाम् अवयवानाञ्च विकासः त्वरितगत्या शैशवावस्थायां बाल्यावस्थायाञ्च प्रचलति।

आध्यात्मिकविकाससन्दर्भे तु भारतीयशास्त्रेषु पञ्चकोषाणाम् अन्नमय-प्राणमय-मनोमय-विज्ञानमय आनन्दमयानां विवेचनं विस्तृतरूपेण कृतमस्ति। तच्च-

**अन्नमयकोषः**- अन्नादिभक्षणपूर्वकं वर्धमानमिदं शरीरम् अन्नमयकोष इति। विनाऽन्नं तु शरीरमिदं नाशमधिगच्छति। संसारे सर्वोऽपि जीवः अन्नेनैव जन्म लभते, जीवति तथा म्रियते। उक्तं हि तैत्तिरियोपनिषदि-

**अन्नादध्येव खल्विमानि भूतानि जायन्ते।**
**अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति।** (3.2)

विषयेऽस्मिन् आदिगुरुशङ्कराचार्येण स्वविरचिते विवेकचूडामणिनामके ग्रन्थे प्रत्यपादि यत् -

**देहोऽयमन्नभवनोऽन्नमयस्तु कोषश्चानेन**
**जीवति विनश्यति तद्विहीनः।**
**त्वक्चर्ममांसरुधिरास्थिपुरीषराशि यं**
**स्वयं भवितुमर्हति नित्यशुद्धः॥** -वि.चू.म.156

अर्थाद् अन्नेन सन्तृप्तोऽयं देहः अन्नमयकोषरूपेण ज्ञायते। अत्र शारीरिकभारादिनां यथोचितवृद्धिपूर्वकं शरीराभ्यन्तरे स्नायुमण्डले अन्तस्स्राविग्रन्थेषु च विद्यमानविविधाङ्गैः क्रियासम्पादनेन बालकस्य शारीरिकविकासः भवति।

**प्राणमयकोषः** - स्वामिविद्यारण्यमतानुसारम् अन्नमये शरीरे विद्यमानोऽयं प्राणमयकोषः समस्तेन्द्रियाणां प्रेरक इव कार्यं कुरुते। अयमेव कोषः आपादमस्तकेषु व्याप्तस्सन् व्यानरूपेण शक्तिं प्रयच्छन् चक्ष्वादीन्द्रियाणां प्रेरकः भवति। प्रोक्तञ्च -

**पूर्णो देहे बलं यच्छन्नक्षानां यः प्रवर्तकः।**
**वायुः प्राणमयो नासावात्मा चौतन्यवर्जनात्॥** -पञ्चदशी 3.5

भगवतः शङ्कराचार्यस्य मतानुसारन्तु पञ्चकर्मेन्द्रियाणां हस्तपादादिनां समन्वयेन प्राणाः एव प्राणमयकोष इत्युच्यते यः जीवान् सर्वविधक्रियासु प्रेरयति। यदुक्तम्

**कर्मेन्द्रियैः पञ्चभिः रचितोयं प्राणो भवेत् प्राणमयस्तु कोशः।**
**येनात्मवानन्नमयोन्नपूर्णः प्रवर्ततेसौ सकलक्रियासु॥** -वि.चू.म. 167

वस्तुतः मानवे जन्मारभ्य काश्चन मूलप्रवृत्तयः जायन्ते। एतासाञ्च मूलप्रवृत्तिनां परिणतिः संवेगरूपेण भवति। सांवेगिकविकासैव हर्ष-शोक-क्रोध-मोहादिनां संवेगानां नियन्त्रको भवति। अयमेव सांवेगिकविकासः मानववृद्धेः विकासस्य च सर्वाधिको महत्त्वपूर्णपक्षः वर्तते, येन जनः समाजे आत्मानमुत्तमनागरिकत्वेन प्रतिष्ठापयितुं सक्षमो भवति।

**मनोमयकोषः** – ज्ञानेन्द्रियैः मनसा च निर्मितोयं कोषः प्राणमय–अन्नमयशरीरयोर्नेतृत्वं विदधाति। अन्नमयकोषाभ्यन्तरे कोमलहृदि सूक्ष्मछिद्ररूपेणायं तिष्ठति। शास्त्रादिजनित–विवेकद्वारा योगी एव आनन्दामृतरुपप्रकाशमानमेनं कोषमभिजानाति। तदुक्तं हि मुण्डकोपनिषदि

**मनोमयः प्राणशरीरनेता प्रतिष्ठतोऽन्ने हृदयं सन्निधाय।**
**तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यत् विभाति॥**

–मु.उ.2/2/8

कोषोऽयं बालकस्य मानसिकविकासेन सम्बद्धो वर्तते ज्ञानेन्द्रियाणां मनसश्च विकासत्वात्। अत्र मानसिकविकासेन तात्पर्यं बालकस्य ज्ञानभण्डारे वृद्धिः। मानवस्य मानसिकशक्तिः एव समुचितनिर्णयस्वीकारे सहायतां करोति। अतः तस्य मानसिकविकासे संवेदना–चिन्तन–तर्क–स्मृत्यादिनां विकासः भवति। विषयेऽस्मिन् आदिगुरुशङ्कराचार्याभिप्रैति–

**ज्ञानेन्द्रियाणि च मनश्च मनोमयः**
**स्यात्कोशोममाहमिति वस्तुविकल्पहेतुः।**
**संज्ञादिभेदकलना कलितो**
**बलीयांस्तत्पूर्वकोषमभिपूर्य विजृम्भते॥**

–वि.चू.म. 69

**विज्ञानमयकोषः** – विशेषज्ञानं भवति विज्ञानम्। बुद्धिसंयुक्तानि पञ्चसंख्यकानि ज्ञानेन्द्रियाणि विज्ञानमयकोषत्वेन अभिधीयन्ते। स्थूलशरीराद् अन्नमयकोषाद् भिन्नोऽयं सूक्ष्मविषयाणां बौद्धिकज्ञानेन सम्बद्धो भवति। यदुक्तं हि पैङ्गलोपनिषदि – **ज्ञानेन्द्रियैः सह बुद्धिः बुद्धिर्विज्ञानमयकोशः।** (पै.उ.2.4)। बुद्धिं विना तु मानवः शान्तियुक्तः न भवति। गीतायामप्युक्तं –

**नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।**
**न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्॥** –भ.गी.2.66

शङ्करमतानुसारन्तु कोषोऽयं निश्चयात्मिकाबुद्ध्या युक्तो भवति यः पुरुषस्य संसारस्य मुख्यकारणं भवति। यथा–

**बुद्धिर्बुद्धीन्द्रियैः सार्धं सवृत्तिः कर्तृलक्षणः।**
**विज्ञानमयकोषः स्यात् पुंससंसारकारणम्॥** –वि.चू.म.186

**आन्दमयकोषः**– कोषोऽयं सम्पूर्णव्यक्तित्वविकासस्य सर्वोच्चावस्था वर्तते। यतः जीवनस्य सर्वास्ववस्थासु मानवस्य शिष्टव्यवहारस्य महत्त्वं वर्तते। शिक्षायाः मूललक्ष्यं हि जीवने सन्तुलितव्यक्तित्वस्य निर्माणमस्ति। जीवने यदि विद्यते किञ्चन शाश्वततत्त्वं

तर्हि तदुत्तमव्यक्तित्वनिर्माणपुरस्सरं शान्तिपूर्णं जीवनयापनमेव। स एव जनः सुखी इति कथ्यते यः नित्यं निरहङ्कारः सन् न द्वेष्टि न किमपि काङ्क्षति। उक्तञ्च श्रीमद्भगवद्गीतायाम्

**ज्ञेयः स नित्यसन्यासी यो न द्वेष्टि न काङ्क्षति।**
**निर्द्वन्दो हि महाबाहो सुखं बन्धात्प्रमुच्यते॥** –भ.गी. 5.3

माण्डूक्योपनिषद्युक्तं – **एषः सर्वेश्वरः। एषः सर्वज्ञः। एषोऽन्तर्यामी। एष योनिः सर्वस्य। प्रभवाप्ययौ हि भूतानाम्। (मा.उ. 6)**

इत्थं भारतीयशास्त्रेषु बहुषु स्थानेषु विविधरूपेण बालविकासविषये प्रत्यक्षाप्रत्यक्षतया बहुधा चर्चितम्। परमत्र केवलं प्रामुख्येन वेदान्तदर्शनान्तर्गतविज्ञानमयकोषान् स्वीकृत्य दिङ्मात्रं कथितम्।

**परिशीलितग्रन्थसूची**

1. राजेशकुमारचौरासिया, वैदिकपञ्चकोशः, कलाप्रकाशनम्, वाराणसी।
2. रामानुजभाष्यम्, श्रीमद्भागवद्गीता, गीताप्रेस, गोरखपुरम्।
3. नीता अग्रवाल, बालविकासः, अग्रवाल– पब्लिकेशन्स, आग्रा।
4. डॉ. सोमनाथसाहुः, शिक्षायाः दार्शनिकाधाराः, शुशीलापब्लिकेशन्स, कुशङ्ग।
5. आदिगुरुशङ्कराचार्यः, विवेकचूडामणिः, व्याख्याकारनन्दलाल दशोरा, रणधीर–प्रकाशनम्, दिल्ली।
6. श्रीवाचस्पतिमिश्रः, सांख्यतत्त्वकौमुदी, व्याख्याकारगजानन्दशास्त्री, नईदिल्ली।
7. श्री रामनयनमिश्रः, भारतीयशिक्षामनोविज्ञानम् (भारतीयमनोविज्ञाने विकासस्य सम्प्रत्ययः)

✦✦✦

# प्रथमं छन्दसामङ्गम्

## FIRST PART OF VEDA'S

**डॉ. विजयकुमारपयासी** *

सर्वाषु भाषासु प्राचीनतमा भाषा संस्कृतभाषा वर्तते अस्या:ज्ञानं व्याकरणाभावे न सम्भवति, न वा शब्दानां तत्त्वावबोध:, न वा तं विना शास्त्रेषु गति:, न च वेदे प्रयुक्तानां मन्त्राणां सम्यग् बोध:, तस्मात् व्याकरणाध्ययनं भवति परमावश्यकम्। यथा मुखं विना शरीरस्य न शोभा, न वा तस्य सत्ता, तथैव षट्ष्वाङ्गेष्वध्ययनेनापि व्याकरणाध्ययनाभावेन तस्य शोभा। अत एवास्य प्राथम्यं शास्त्रकारा:शास्त्रेषु **मुखं व्याकरणं स्मृतम्**[1], **षड्गेषु- प्राधान्यं व्याकरणं प्रधाने च कृतो यत्नः फलवान् भवतीति**[2] कण्ठरवेण प्रोक्तवन्त:। शास्त्रमिदं सर्वशास्त्रोपकारकत्वात् ब्रह्मण: प्राप्ते: प्रथमोपायो वर्तते। व्याकरणाध्ययनं तु तपसां श्रेष्ठतमं तप:, येन तपसा मुमुक्षव: सरलमार्गेण ब्रह्मण: साक्षात्कारं कर्तुमर्हन्ति **तपसा चीयते ब्रह्मेति**[3] सिद्धन्तितत्वात्। अत एव वाक्यपदीये भर्तृहरिणा-

**आसन्नं ब्रह्मणः तस्य तपसामुत्तमं तपः।**
**प्रथमं छन्दसामङ्गं प्राहुव्याकरणं बुधाः॥**[4]

इदं व्याकरणं वेदस्य षड्ष्वागेषु, ज्योतिषनिरूक्तशिक्षाछन्दकल्पप्रभृतिषु प्रथमं प्रधानञ्च वर्तते। वेदस्य रक्षणाय ज्ञानाय च प्रधानं कारणं व्याकरणमेव अत एव भाष्यकार: **( लोपागमविकारज्ञो हि सम्यक् वेदान् परिपालयिष्यतीति )**[5] वक्ति।

---

* सहाकाचार्य( अतिथि ) , व्याकरणविभाग:, केन्द्रीयसंस्कृतविश्वविद्यालय:, एकलव्यपरिसर:, अगरतला, त्रिपुरा

1. पा.शि.
2. महा.पस्पशा.
3. मुण्डकोपनिषद्
4. वा.प.कारि.सं. 11
5. महा.पस्पशा

वेदार्थस्य नित्यत्वं सर्वैः दार्शिनिकैः यथा प्रतिपाद्यते, तदवत् व्याकरणार्थोप्यानादिरूप-नित्यतावान् इति तस्य नित्यत्वबोधनं वैयाकरणैरङ्गीक्रियते। भाष्यकारेण **व्याकरणं नामेयमुत्तरा विद्या**[1], **तस्यादित उदात्तमर्धह्रस्वम्**[2] **1,2,32** इत्यस्मिन् सूत्रे व्याख्यायते, **पुरा कल्पे पूर्वा, आद्यत्वे तूत्तरेति** पस्पशायां कैयटोप्याह। यद्यपि भगवतः पाणिनेः प्राक् बहुषु आपिशाल-काश्यप-गार्ग्य-गालव-चाक्रवर्मण-भारद्वाज-शाकटायनशाकल-सेनक-स्फोटायन-प्रभृतीनां व्याकरणस्य सत्ता आसीत्, किन्तु साम्प्रतं विश्वेस्मिन् शब्दविद्यायाः पुरातनं व्याकरणं पाणिनियमेव। **काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमित्य-भियुक्तोक्तेः**[3] अथ च-पस्पशायां भाष्यकारोऽपि-

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणं।**
**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यन्न किञ्चन**[4]**॥**

यद्यपि जगति शब्दसाधुत्वमेव परमप्रयोजनं सामान्यतः श्रूयते व्याकरणशास्त्रस्य, किन्तु तथा नास्ति अस्य शास्त्रस्य द्वैविध्यं प्राचीनकालादेव, शब्दसाधुत्वरूपं दर्शनत्वरूपञ्च दृश्यते। महर्षिव्याडिविरचितः संग्रहनामक ग्रन्थविशेष व्याकरणशास्त्रस्य दर्शनत्वं प्रतिपादयति, अत एव भाष्यकारः वक्ति-**शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः**[5] इति, संग्रह-ग्रन्थस्याध्ययनं तदानींतनकाले छात्राः कुर्वन्तिस्म किन्त्वद्य नोपलभ्यते कुत्रचित्। अस्य दर्शनत्वप्रतिपादकेष्वाचार्येषु कौण्डभट्ट-भर्तृहरिनागेशप्रभृतय आसन्। तथैव शब्दसाधुत्व-मप्यस्य शास्त्रस्य मुख्यप्रयोजनं विद्यते। शब्दसाधुत्वप्रक्रियाप्रतिपादकेषु पण्डितवरदराजाचार्य-भट्टोजिदीक्षितरामचन्द्राचार्य-प्रभृतिष्वस्ति लम्बायमानपरम्परा। भर्तृहरिणाप्युक्तम्-

**साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।**
**तस्मान्निबध्यते शिष्टैःसाधुत्वविषया स्मृतिः॥**[6]

इदं व्याकरणशास्त्रं पाणिनिमुनिविरचितमिति पाणिनीयमित्युच्यते, तत्र व्याकरण-शास्त्रस्य प्रथम आचार्य ब्रह्मा आसीत्, यथा ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः तं खल्विदमक्षरसमाम्नामित्याचक्षते। शीघ्रं गच्छन् कालेऽस्मिन् आपिशाल-काश्यप-गार्ग्य-गालव-चाक्रवर्मण-भारद्वाज-

---

1. पा.सूत्रे.म.भा.
2. पा.सू.
3. सरस्वतीसुषमा.पृ.सं. 210
4. सरस्वतीसुषमा.पृ.सं. 210
5. सरस्वतीसुषमा.पृ.सं. 210
6. वा.पदी.

शाकटायनशाकल-सेनक-स्फोटायनप्रभृतिषु कालावसाने महर्षिपाणिनिना स्वीयातुलतपश्चर्यया भगवन्तं विश्वनाथप्रसादस्वरूपं अक्षरसमाम्नायं मन्त्रमिवावाप्य व्याकरणशास्त्रस्य अष्टाध्यायीग्रन्थं व्यरचि, पुनर्व्याकरणशास्त्रस्य सत्ता लोके स्थापिता। अस्य शास्त्रस्य सर्वशास्त्रोपकारकत्वात् सर्ववेदपारिषदत्वं सर्वैरङ्गीक्रियते। अत एव महाभाष्ये भष्यकारः वक्ति-**सर्ववेदपारिषदं हीदं शास्त्रं, तत्र नैकः पन्थाः शक्य आस्थातुम्।**[1] तदेवं व्याकरणस्य कतिपयगूढस्थलानां वार्तिकनिर्माणेन प्रतिस्थलं परिष्कृतवन्तः कात्यायनमुनयः, तेषामपि महदुपकारः शास्त्रजिज्ञासूनां कृते। पुनश्च गभीरेऽस्मिन् समुद्रे समग्रस्यास्य शास्त्रस्य महाभाष्यात्मकं व्याख्यानं व्यरचि, अस्याजेयत्वं सुस्थिरतत्त्वञ्च सम्पादयत् साक्षात् शेषावतारः भगवान् पतञ्जलिः। अत एवास्य व्याकरणशास्त्रस्य महनीया परम्परा ज्ञायते।

**व्याकरणस्योपयोगित्वं वेदाङ्गत्वञ्च**- सर्वेषां ज्ञानरत्नानामकारः, सम्पूर्णभारतीय-संस्कृतेराधारस्तम्भः वेद एव, यथा मनुना-

> **यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तिताः।**
> **सः सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥**[2]

तथा सति आधुनिकभाषाणामपि गणितरसायनवनस्पतिविज्ञानेत्यादिनां तथा चेतिहासकाव्यनाटकानाञ्च प्रादूर्भावः वेदादेव। तथा च विश्वस्य सनातनं सर्वश्रेष्ठञ्च यत् साहित्यं तदपि वेदे एव, तस्यावबोधः नास्ति व्याकरणादृते। तत्र चतुर्षु वेदेषु प्रकृतिप्रत्ययानां विश्लेषणेन शास्त्रस्यास्य मूलभूतः संकेतः सम्यक् द्रष्टुं शक्यते। यथा-**धान्यमसि धिनुहि देवान्**[3]**, येन देवाः पवित्रेणात्मानं पुनते सदा**[4], सामवेदे, **यज्ञेन यज्ञमयजन्त देवाः**[5] इत्यत्र यजुर्वेदे च यज्धातुघटितयज्ञशब्दस्य कीदृशी व्युत्पत्तिः वर्णितास्ति। यतोहि **यज्धातोः अर्थत्रये शक्तिः, यज्दाने-यज्देवपूजायां यजसंङ्गति-करणे।**[6] तर्हि कं धातुमाश्रित्यास्य मंत्रस्य यज्ञेन यज्ञमयजन्त देवा इत्यस्य व्युत्पत्तिः कार्या। अस्य समग्रस्य वेदराशेः लाभः व्याकरणाभावे असम्भवः, अस्य संरक्षणं तु शाब्दिक एव कर्तुं शक्नुयात्। वेदे प्रयुक्तानां वैदिकमन्त्राणां ऋचाणामपि इदमूह्यमिद-

---

1. महा.भा.पस्प.
2. मनु.स्मृ.
3. यजुर्वेद 1/20
4. सामवेद 5/2/8/5
5. ऋग्वेद 1/164/50
6. धातुपाठ

मनह्यूयमिति निर्णयोरपि नैव कर्तुं पारयामः। अत एव महाभाष्यकारः भगवान् पतञ्जलिः **लोपागमविकारज्ञो हि सम्यक् वेदान् परिपालयिष्यतीति**[1], न च वेदे प्रयुक्तानां वैदिकमन्त्राणां यथायथं विभक्तिविपरिणयतुं शक्यते। **तान्नावैयाकरणः शक्नोति यथायथं विपरिणयतुमिति**[2], अर्थादवैयाकरणः विभक्तिनां यथावसरे परिवर्तनं नैव कर्तुमर्हति। अनेन भाष्यव्याख्यानेन स्पष्टं भवति यद् व्याकरणस्यास्ति परमोपयोगित्वम्। प्रसङ्गेऽस्मिन् एकं रोचकमुदाहरणमायाति, एकः धनिकः यजमान आसीत्, तेन प्रतिवर्षं किमपि यागादिकमनुष्ठीयते स्म। एकदा सः गृहे ब्राह्मणान् भोजनाय अकारयत् तत्र विदुषां समवाये एकः अल्पज्ञः पण्डितः आसीत्, सःधनिकं राजानं दृष्ट्वा अवदत्। भो महाशय, अहमपि पण्डितः यागादिकं सम्पादयामि कदाचित् माम अप्याह्वायतु। यजमानः वक्ति, अवश्यमित्युक्त्वा सर्वे भोदनादिकं कृत्वा स्व स्व गृहमगच्छन्। पुनः एकस्मिन् दिवसे यजमानस्य पुत्रवध्वाः पुत्ररत्नमभूत्, तदा तैःस्वभवने अष्टचिरञ्जीविनां पूजाऽनुष्ठितः, अनुष्ठीयमाने तस्मिन् कार्यक्रमे कुलपुरोहितैः सह अल्पज्ञपण्डितस्यापि निमन्त्रणं कृतवान्, तत्र पूजनकाले कुलपुरोहितः तमल्पज्ञपण्डितं उक्तवान् यत् भवान् एव पूजनं कारयतु। स अत्यन्तप्रसन्नवदनः पूजनमारभत्, वस्तुतः पुत्रप्राप्त्यानन्तरमष्टचिरञ्जीविनां पूजनं भवतीति। अतो सः तेषाम्-

**अश्वत्थामाबलिर्व्यासः हनुमानश्च विभीषणः।**
**कृपापरशुरामश्च सप्तैते चिरजीविनः॥**

इत्यादीनां पूजनमारब्धवान्। तत्र तेन स्वास्तिवाचनान्तरमष्टचिरञ्जीविनामावाहनं क्रमशः **नमः स्वस्तिस्वधा** इति सूत्रमाश्रित्य सामान्यतः चतुर्थ्यन्तघटितवाक्यं वदति, आदौ अश्वत्थामा वर्तते अत अश्वत्थामाय नमःपुष्पमर्पयामीत्युच्यते। तदा कुलपुरोहितः वदति अयि भो शुद्धं वद, अश्वस्थामाय न, अपितु अश्वस्थाम्ने नम इति भवति। पुनः सः अल्पज्ञपण्डितः अश्वस्थाम्ने इतिवत् बलिम्ने नमः इति उक्तवान्। कुलपुरोहितः हसन् वदति, अरे महाशयः बलये भवति न तु बलिम्ने, कथमशुद्धं वदसि। इदं सर्वं दृष्ट्वा श्रुत्वा चाल्पज्ञः सकोपं वक्ति, यत् भवान् एव कारयतु। वृद्धपण्डितः अश्वस्थाम्ने नमः, बलये नमः, विभीषणाय नमः, इत्यादितत्तद्विभक्तिघटितवाक्यान्युक्त्वा पूजां सम्पादितवान्। अल्पज्ञपण्डितः पुनः हसन् वदति यजमानं प्रति अयि भो यजमानः पश्यतु, अनेन पण्डितेन कथं भिन्न-भिन्नपदानां प्रयोगः क्रियते। यतोहि सः न जानाति स्म यत् कस्य किं रूपं भवति। तात्पर्यमयमस्ति यत् व्याकरणादृते एतादृशानि प्रयोगानि

1. पस्पशा.पृ.सं. 9
2. पस्पशा.पृ.सं. 10

तु भवत्येव-किन्तु शब्दानां सम्यक् तत्त्वावबोध अपि न भवति। अत एव भाष्यकाराः तान्नावैयाकरणः शक्नोति यथायथं विपरिणयतुमिति प्रतिपादयन्ति। यतोहि पाणिनीव्याकरणं महेश्वरप्रसादलब्धचतुर्दशसूत्रमुलकं, तस्मादस्य वेदाङ्गत्वं तु सुतराम् सिद्ध्यति। महेश्वर-प्रसादाल्लब्धानि अत एव एतेषां अइउण् इत्यादि चतुर्दशसूत्राणां पारायणमपि पुण्यजनकाय भवतीति। महाभाष्यकारेणाप्यस्य परमप्रयोजनं शब्दानुशासनमेव साक्षात् प्रतिपादितम्। कानि पुनः शब्दानुशासनस्य प्रयोजनानीति प्रश्ने, स्वयमेव वक्ति-**रक्षोहागमलध्वसन्देहाः प्रयोजनम्।**[1] तत्र काम्यनित्यभेदेन द्विविधं कर्म, तर्हि व्याकरणाध्ययनं किं काम्यकर्म आहोस्वित् नित्यकर्म। वस्तुतः **नपुंसकमनपुंसकेनैकवच्चान्यतरस्यामित्यनु-शासनानुसारेण** प्रयोजनमत्र, प्रयोजयतीति प्रयोजक इति रीत्या प्रयोजकश्च प्रयोजनञ्चेति द्वन्द्वे उक्तानुशासनेन एकशेषः, एकशेषश्च यः शिष्यते सः लुप्यमानार्थाभिधायि, तस्मादत्र प्रयोजनपदं प्रयोजकपरोऽपि। व्याकरणाध्ययनस्य किं प्रयोजनमेति वदता भाष्यकारेण रक्षोहागमलध्वसन्देहाः प्रयोजनम्। अत एव सूत्रे आगमपदोपादानम्। अयमाशयः ऊहार्थमपि व्याकरणाध्ययनं, यतोहि यागादिकर्मणि वैदिकैः मन्त्राणां प्रयोगः क्रियते किन्तु न तत्र तेषू मन्त्रेषु लिङ्गविभक्तिनाम् निर्देशः, तस्मात् तत् तत्स्थलेषु यथा वैदिकरीत्या स्वरप्रक्रियया सह प्रयोगः स्यादत अध्येयं व्याकरणम्। ऊहनमवैयाकरणः कर्तुं न शक्यत्वात्। यथा सौर्यं चरुं निर्वपेद्, ब्रह्मवर्चसकामः, सूर्याय त्वां जुष्टं निर्वपामीत्याद्यनेकानि, एकं प्रसिद्धमुदाहरणं वर्तते यस्योद्धरणं शास्त्रेषु बहुधा दृश्यते- **स्थूलापृषतीमाग्निवारुणीमनड-वाहीमालभेतेति** अत्र श्रुतौ सन्देहः वर्तते यत् स्थूलापृषती इत्यस्मिन् पदे कः समासः, स्थूला चासौ पृषती च स्थूलपृषतीति कर्मधारयः अथवा स्थूलानि पृषन्ति यस्याःसा स्थूलपृषतीति बहुव्रीहिसमासः, तर्हि कर्मधारये **समासस्येति**[2] सूत्रेण समासान्तोदात्तत्वं स्यात्, बहुव्रीहौ तु **बहुव्रीहौ प्रकृत्यापूर्वपदमिति**[3] सूत्रेण पूर्वपदप्रकृतिस्वरत्वमिति सन्देहे, निर्णय सः कर्तुं शक्येते, यः व्याकरणं जानाति। अतो भाष्यकारः **असन्देहार्थञ्चा-ध्येयं व्याकरणमिति ब्रूते।**[4] अर्थात् सन्देहनिवृत्तिः व्याकरणादेव। विषयेस्मिननेकानि-उदाहरणानि पस्पशायां भाष्यकारै उदाह्रियन्ते। विस्तरभिया अत्र नोल्लास्ते। अनेन व्याख्यानेन अस्य शास्त्रस्याध्ययनं सुतरां सिद्धयतीति नास्त्यत्र सन्देहलेसावसरः। यद्यपि सर्वेषां वेदाङ्गानामस्ति विशिष्टपरम्परा, अत एव शिक्षानीतौ-

1. महा.भा. पस्पशा. पृ.सं. 09
2. पा.सू. 6/01/223
3. पा.सू. 6/201
4. पस्पशा.

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्म लोके महीयते॥**[1]

इत्यादिना वेदोपकारकाणां सर्वेषामध्ययनं नितान्तं वरमुपयोगि चास्ति, तथापि व्याकरणस्य मुख्यत्वं सर्वतोभावेन अत्रापि प्रतिपादितं विद्यते, वेदोपकारकेष्वप्यङ्गेषु व्याकरणस्य परमोपकारकत्वात्, अत एव विद्वद्भिः तदध्ययनंपरमावश्यकं स्वीकृतम्। भर्तृहरिणा त्वस्य वेदोपकारकत्वात् सर्वशास्त्रोपकारकत्वमपि संसूचितं-**पवित्रं सर्व-विद्यानामधिविद्यं प्रकाशते**[2] इति। भर्तृहरिप्रणीतवाक्यपदीयग्रन्थस्य अम्बाकर्तृटीकाकृद्भिः रघुनाथशर्मवर्यैः अधिविद्यमित्यस्य **अधिविद्यं प्रकाशत इति सर्वो हि शास्त्रकृतः प्रायेण स्वस्यां विद्यायां व्याकरणमनुसरति, अपभ्रंशप्रयोगे च नियतमपत्रपत इत्येवं सर्वासु विद्यायां प्रकाशमानत्वं व्याकरणस्येति व्याख्याकृतः।**[3] अर्थात् सर्वैः शास्त्रकारैः स्व-स्व शास्त्रेषु व्याकरणस्यानुशरणं क्रियत एव, तदभावे शास्त्रस्य स्वारस्यं नैव सम्भवति। अतो शास्त्राणां ह्यार्दबोधाय, तत्त्वज्ञानाय, शब्दसाधुत्वज्ञानाय चेयं विद्या श्रेष्ठतमा भवतीति यथा- शुष्ककाष्ठादिपदार्थानां अग्निना सह संयोग एव ज्वलनं, अनुपगृहीतपदार्थाणां तेषां ज्वलनयोग्यतासत्वेऽपि अग्निः नाभिज्वलति। तथैव सर्वा विद्या यद्यप्यभ्यूदयमेव करोति किन्तु व्याकरणेनानुपगृहीतं स्वकीयं कार्यं नैव प्रतिपादयति। तदुक्तम् -

**यदधीतमविज्ञातं निगदेनैव शब्द्यते।**
**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्**[4]**॥**

एषा विद्या न केवला शब्दसाधुत्वज्ञानप्रतिपादिका अपितु सर्वविद्याभ्यःपवित्रत्वमपि प्रकाशयति। अर्थात् सर्वासां विद्यानां परमो मार्गः, वस्तुतः सर्वासु विद्यासु प्रवेशोपाय अनया विद्यैव भवति। तत्त्वावबोध अपि व्याकरणमन्तरा न। भर्तृहरिणापि वाक्यपदीये यथा-

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनाः।**
**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥**[5]

---

1. पा.शि.
2. वा.पद.का.सं. 14
3. वा.पद.का.सं 15 अम्बा.टीका पृ.सं. 38
4. वा.पद.का.सं 15 अम्बा.टीका पृ.सं. 38
5. वा.पद.का.सं-13

अर्थादर्थस्य यान्यपि प्रवृत्तितत्त्वानि तेषां सर्वेषां कारणं तु गोघटादय एव, शब्दं विना अर्थप्रवृत्तिः क्वचिदपि न सम्भवति यतोहि अर्थप्रवृत्तये शब्दा एव अपेक्षन्ते तेषां यथार्थज्ञानञ्च व्याकरणमन्तरा असम्भाव्यम्, अत इदं वक्तुं शक्यते, यत् शब्दार्थव्यवहारे कारणं व्याकरणमेव। शक्तिग्रहमपि व्याकरणाधीनं यद्यपि शक्तिग्रहः कोशादिनापि भवति तथापि शक्तिग्राहकेषु व्याकरणस्य प्राधान्यं वर्तत एव, यथा–

**शक्तिग्रहं व्याकरणोपमानात् कोशाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद्विवृतर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥**[1]

शक्तिग्रहाभावे तु शाब्दबोधः न स्यात् तस्मात् शास्त्राणामध्ययनमेव निरर्थकं स्यात्। वस्तुतः तदध्ययनस्य सन्त्यनेकानि मुख्यानि प्रयोजनानि तेषां सर्वेषामेकस्मिन् शोधप्रबन्धे लेखनमसम्भवम्। अतोऽत्र मुख्यप्रयोजनमुक्त्वानुषङ्गिकत्रयोदशप्रयोजनानि भाष्यकारैः प्रतिपाद्यन्ते महाभाष्ये। संक्षेपतः तेषां नामान्येवोल्लिख्यन्ते। यतोहि एकं एकं प्रयोजनमुद्दिश्य यदि विलिख्यते तदा तु एकं अन्यं शोधपत्रमिव भविष्यति, अत्र भाष्यकाराः लिखन्ति **लघ्वर्थं चाध्येयं व्याकरणं**[2] अतःभाष्यमेव शरणमिति कृत्वा नामान्येव विलिख्यते।

1. तेऽसुराः
2. दुष्टःशब्दः
3. यदधीतम
4. यस्तु प्रयुक्ते
5. अविद्वासः
6. विभक्ति कुर्वन्ति
7. यो वा इमाम
8. चत्वारि
9. उत् त्वः
10. सक्तुमिव
11. सारस्नतीम्
12. दशम्यां पुत्रस्य
13. सुदेवा असि वरुणेति।

अस्य शास्त्रस्य वेदाङ्गेषु यथा मुख्यत्वव्यवहारः, तदवदस्य दर्शनत्वमपि प्रसिद्धं वर्तते। यद्यपि शास्त्रस्यास्य सांख्ययोगन्यायवैशेषिकपूर्वमि–मांसोत्तरमिमांसा (वेदान्तादि) आस्तिकनास्तिकदर्शनयोःपरिगणनाभावेऽपि दर्शनत्वव्यवहारः, वस्तुतः दर्शनशास्त्रस्य सन्त्येते हेतवः –

---

1. पर.ल.म.शक्तिप्र.
2. पस्पशा.पृ.सं. 11

**श्रोतव्यःश्रुति वाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**[1]
**मत्वा च सततं ध्येय एते दर्शनहेतवः॥** इत्यादि।

अतः यान्यपि कारणानि भवन्ति तेषां सर्वेषां कारकाणां स्थितिः व्याकरणदर्शनेष्वपि। यतोहि दर्शनशास्त्राणमेकमेव मुख्यप्रयोजनं ब्रह्मणः साक्षात्कार एव, किन्तु सर्वेषामुभय-विधदर्शनानां तत्प्राप्तेरुपायः प्रथक-प्रथगेव। ब्रह्मणः साक्षात्कार एव साक्षात् मोक्षः, यथा-वेदान्तदर्शने धर्मप्राप्तिरन्तरमेव तस्य साक्षात्कारः, साक्षात्कारमेव मोक्षेति व्यवहारः। नैयायिकैस्तु प्रमाणप्रमेयादिषोडशपदार्थानां तत्त्वज्ञानेन मोक्षप्राप्ति इति उररीक्रियते। तथैव अन्यदर्शनपदव्यपदेशानां शास्त्राणां मोक्षप्राप्तेरुपायः वर्तते। तस्माद् व्याकरणशास्त्राध्ययेनन यदि साक्षात् मोक्षप्राप्तिः, तर्हि कथञ्चनास्य दर्शनत्वपदव्यवहार इति। यद्यप्यस्य दर्शनत्वविषये बहुधा शाब्दिकैः प्रपञ्चितो वर्तते। विशेषतः व्याकरणदर्शनपीठिकायां, व्याकरणदर्शन-भूमिकायां पण्डितरामज्ञापाण्डेयवर्यै अस्य दर्शनत्वं सम्यक् व्यवस्थापितः वर्तते। तथैव पण्डितश्रीमहामहोपाध्यायाः काशीपण्डितपरम्परायाः संस्थापकाः रामप्रसादत्रिपाठिकृतः पाणिनिदर्शने प्रमाणसमीक्षणमित्यस्मिन् विश्वविश्रुतग्रन्थे दर्शनत्वविषयमुररीकृत्य व्याकरण-शास्त्रस्य दशर्नत्वं प्रतिपादितम्। परमदार्शनिकैः पण्डितप्रवरैः भर्तृहरिवर्यैरपि वाक्यपदीयस्य ब्रह्मकाण्डे व्याकरणस्य दर्शनत्वविषयमादाय प्रतिबिन्दुमाश्रित्य दर्शनत्वं साधितम्, यथा-

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**
**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥**[2]
**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सतम्॥**[3]

अनया कारिकया व्याकरणं साक्षात् मोक्षस्य द्वारं विद्यत इति सिद्धयतीत्यत्र नास्ति सन्देहः। यतोहि यदि वयमस्मिन् विषये चिन्तयामः, तदा मनसि इदमेवायाति यत् यस्याध्ययनेन निःश्रेयसप्राप्तिरित्येक उपायः लभ्यते, येनोपायेन ब्रह्मणः साक्षात्कारः स्यात्, तस्य शास्त्रस्य दर्शनत्वेन प्रसिद्धिर्भवत्येव। यतोहि इदं व्याकरणं मोक्षप्राप्तेः प्रथमं सोपानं राजमार्गश्च वर्तते येन मुमुक्षवः सरलतया परमपुरुषार्थस्य मोक्षस्य प्राप्तिं कर्तुमर्हन्ति। व्याकरणस्य निःश्रेयसप्राप्तिरित्येकः प्रकारो वर्तत इत्युक्तत्वात्। एक अपरोऽप्युपायः व्याकरणेन विद्वद्भिः साधितः, यथा तत्र रघुनाथशर्मवर्यैः वाक्यपदीय-यस्याम्बाकर्तृटीकायां- **व्याकरणज्ञानेन साधुशब्दप्रयोगादभिव्यक्तपुण्यविशेषः तत्प्रभावेण ज्ञानक्रमेण महान्तं शब्दात्मानं सर्वेषामन्तरवस्थितमात्मभूत-**

---

1. सांख्य प्र.भा.प्र.अ.सू. 1
2. वा.पदी.का.सं. 16
3. वा.पदी.का.सं.14

**मभिसम्भवन्-आत्मतया साक्षात्कारेण तद्रूपतामापद्यमानः, जीवन्मुक्तिकाले करणसम्बन्धाभिमानराहित्यविदेहकैवल्ये च सर्वकरणराहित्यरूपं मोक्षं प्राप्नोतीति**[1] प्रतिपादितम्। अनेन व्याख्यानेन व्याकरणस्य दर्शनत्वं सिद्धं भवति। यद्यप्यस्य शोधपत्रस्य मुख्यप्रयोजनं वेदाङ्गेषु व्याकरणस्य मुख्यत्वसाधनमेवासीत्, तथापि मध्ये विषयोऽयं समागतः, तस्मादस्मिन् विषयेऽपि यथामति मया विचारितः। अत्रैव विस्तरभिया विरम्यते।

**सन्दर्भग्रन्थसूची-**


1. वाक्यपदीयम्- हरिवृषभकृतया स्वोपज्ञयावृत्या-श्रीरघुनाथशर्मविरचितया अम्बाकर्तृ व्याख्यायाच संवलितम्।
2. व्याकरणमहाभाष्यम् नवान्हिकम्-प्रो.हरिनारायणतिवारिविरचिता ज्योत्सनाटीका, प्रकाशकः चौखम्बाविद्याभवनम्, वाराणसी।
3. सरस्वतीसुषमापत्रिका 3-4 अङ्कौ, प्रकाशकः- सम्पूर्णानन्दसंस्कृत- विश्वविद्यालयः वाराणसी।
4. मुड्कोपनिषद्- गीताप्रेसगोरखपुरम्।
5. साख्यकारिका।
6. परमलघुमन्जूषा- प्रकाशकः चौखम्बाविद्याभवनवाराणसी।
7. पाणिनिशिक्षा।
8. वैयाकरणभूषणसारःप्रकाशकः चौखम्बाविद्याभवनवाराणसी।
9. धातुपाठः।
10. अष्टाध्यायी।
11 पाणिनिव्याकरणे प्रमाणसमीक्षा, प्रो.रामप्रसादत्रिपाठिकृत्प्रकाशकः- अनुसन्धान-विभागः सम्पूर्णानन्दसंसकृतविश्वविद्यालयः वाराणसी।


✦✦✦

---

1. वा.पदी.का.सं.14 पृ.सं.37

 ISSN : 7552-2779

# मीमांसानये वेदस्यापौरुषेयत्त्वम्

**डॉ. पवनकुमारपाण्डेयः***

वेदो हि भारतीयसंस्कृतेर्मूलाधारो वर्तते। समस्तमेव ज्ञानविज्ञानं वेदे वरीवर्ति। अस्मिन् न केवलं भारतीयानाम् अपितु समस्तजनानां महती श्रद्धा आदरश्च विद्यते। सर्वेषां मानवानां कल्याणार्थमयं प्रवर्तते। सायणाचार्येण **'अपौरुषेयं वाक्यं वेदः'** इति वेदस्य लक्षणं प्रतिपादितम्।

ननु वेदः पौरुषेय उत अपौरुषेय इत्यत्र वर्तन्ते जनेषु विप्रतिपत्तयः। अत एतद् महद्विचार्यविषयो वर्तते। नैयायिकानां वैशेषिकाणां च मते वेदस्य ईश्वरकृतत्वात्, ईश्वरस्य पुरूषविशेषत्वाच्च वेदः पौरुषेयः। योगदर्शनेऽपि 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषस्य विशेष ईश्वरः'[1] इत्यनेन ईश्वरस्य पुरुषविशेषत्वं स्वीकृतम्। पाश्चात्यविदुषां मते वेद ऋषिप्रणीतशब्दराशित्वात् पौरुषेय एव। मीमांसकानां वेदान्तिनाञ्च मते पुरुषकृतत्वा-भावादनादित्वाच्च वेद अपौरुषेय इति। स्मृतिभिरपि वेदस्य अपौरुषेयत्वं स्वीकृतम्। तथाह मनुः -

> **पितृदेवो मनुष्याणां वेदश्चक्षुः सनातनम्।**
> **अशक्यञ्चाप्रमेयञ्च वेदशास्त्रमिति स्थितिः॥**[2]

शोधपत्रेऽस्मिन् मीमांसानये वेदस्यापौरुषेयत्वं प्रतिपाद्यतेऽस्माभिः। भारतीयदर्शनसाहित्ये षडास्तिकदर्शनानि प्रसिद्धानि सन्ति। तेषु मीमांसादर्शनस्यातिप्रतिमं स्थानं विद्यते। पूर्वोत्तरभेदेन मीमांसादर्शनं द्विधा विभज्यते। पूर्वमीमांसा इत्यनेन जैमिनिना प्रवर्तितं मीमांसादर्शनं बोध्यते, उत्तरमीमांसा इत्यनेन वेदान्तदर्शनमिति। वेदवाक्यस्य तात्पर्यार्थनिर्णये दर्शनस्यास्य महत्त्वपूर्णं स्थानमस्ति। वेदवाक्यार्थे यत्र कुत्रापि सन्देहो भवति, यथा मन्त्रस्य विनियोगः, मन्त्रस्य तात्पर्यं, मन्त्रोऽयं कस्याङ्गमित्येतत् सर्वं मीमांसाशास्त्रेण विचार्यते साध्यते च।

---

* सहायकाचार्यः, संस्कृतवेदाध्ययनविभागः,
कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः, नलबारी, असमप्रदेशः

1. योगसूत्रम् 1.24
2. मनुसंहिता 12.94

दर्शनेऽस्मिन् बहुसिद्धान्ताः प्रतिपादिताः। तेषु कश्चन सिद्धान्तो भवति वेदस्यापौरुषेयत्वमिति। मीमांसकानां मते वेदो नित्यः, अनादिः, अपौरुषेयो वर्तते। एते मीमांसकाः पूर्वपक्षस्य 'वेदस्य पौरुषेयत्त्व'-विषयकानि मतानि युक्तिभिः विखण्ड्य 'वेदस्यापौरुषेयत्व'मिति सिद्धान्तं प्रतिपादयन्ति। प्रथमं तावत् पूर्वपक्षस्य मतान्युपस्थाप्यन्ते।

**पूर्वपक्षः -**

पूर्वपक्षिणां मते वेदः पौरुषेयः, सः केनचित् पुरुषेण विरचितः। यतो हि वेदस्य शाखाः पुरुषनामभिः श्रूयन्ते। यथा - शाकलशाखा, माध्यन्दिनशाखा, कौथुमशाखा, शौनकशाखा इत्यादयः। अनेन स्पष्टं यत् वेदः पौरुषेय इति। यत्र तद्धितप्रत्ययस्य प्रयोगो भवति तत्र "तेन प्रोक्तम्" इति पाणिनीयसूत्रेण पाणिनिना प्रोक्तं पाणिनीयम्, व्यासेन प्रोक्तं वैयासिकम् इत्यादिषु यथा पौरूषेयत्वस्य प्रतीतिर्भवति तद्वत् कौथुमः, शौनक इत्यादयः वेदशाखा अपि पौरुषेयाः। तथाह जैमिनेसूत्रे **"वेदांश्चैके सन्निकर्षं पुरुषाख्या"**।[1] अपि च जैमिनिन्यायमालायाम् -

**पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता।**
**काठकादिसमाख्यानाद्वाक्यत्वाच्चऽन्यवाक्यवत्॥**[2]

वेदे यानि वाक्यानि समाम्नायन्ते तानि कालिदासादिभिर्निर्मितानां रघुवंशादि-ग्रन्थानामिव लौकिकानि सन्ति। ते ह्यत्र दृष्टान्ततया प्रतिपादयन्ति। यथा रघुवंशादयो ग्रन्थाः इदानींतनास्तथा वेदा अपि। अर्थात् न तु वेदा अनादय अपौरुषेया इति। अत एव वेदकर्तृत्वेन पुरुषा आख्यायन्ते। वाल्मीकीयं रामायणं वैयासिकं भारतमित्यत्र यथा रामायणादिकर्तृत्वेन वाल्मीक्यादय आख्यायन्ते। तथैव काठकं, कौथुममित्येवं तत्तद्वेदशाखाकर्तृत्वेन कठादीनामाख्यातत्वात् वेदाः पौरूषेयाः। अपि च यथा आप्तप्रणीतत्वे मन्वादिवाक्यानां प्रमाणं तथैव वेदवाक्यानामपि प्रमाणत्वम् चेन्न -

**वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।**
**वेदाध्ययनसामान्यादधुनाध्ययनं यथा॥**

वेदाध्ययनं गुर्वध्ययनपूर्वकं भवति अत अपौरुषेयः, इति चेन्न। यतोहि महाभारतादीनामपि अध्ययनं गुर्वध्ययनपूर्वकं भवति -

**भारताध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।**
**भारताध्ययनत्वेन साम्प्रताध्ययनं यथा॥**

---

1. जैमिनीसूत्रम् 1.1.27
2. जैमिनीयन्यायमाला 1.1.8

प्रमाणेनानेन महाभारतस्यापि अपौरुषेयत्वं साधयितुं शक्यते।

ननु वेदानां सम्प्रदायप्रवर्तकत्वेन काठकादिसमाख्या स्यादित्याशङ्क्य पूर्वपक्षस्य युक्त्यनन्तरं सूत्रयति महर्षिजैमिनिः – **'अनित्यदर्शनाच्च'**।[1] पूर्वपक्षिणां मतमस्ति यत् यथा पौरुषवाक्ये अनित्यपदार्थाः श्रूयन्ते। यथा – 'बबरः प्रावाहणिरकामयत'[2] कुसुरुबिन्द औद्दालकिरकामयत[3] इति। उदाहरणे 'बबरः' 'औद्दालकि' इति नाम श्रूयते, अनेन स्पष्टं यत् बबरादेः जन्मनः प्राक् वेदस्यास्तित्वं नासीत्। अतस्तेषां नाम वेदे संप्राप्यते। तथा सति बबरादिभ्यः पूर्वमभावात् वेदाः पौरुषेयाः इति।

अपि च वेदस्य कानिचन वाक्यानि उन्मत्तप्रलाप इति प्रतिभाति। यथा 'सर्पाः सत्रमासत्', 'गावो सत्रमासत्'। अत्र वनस्पतीनामचेतनत्वात्, सर्पादीनां चेतनत्वेऽपि विद्यारहितत्वात् न तदनुष्ठानं सम्भवति। अनेन अनुमीयते यत् एतद्वाक्यं कस्यचित् पुरुषस्योक्तिः। पूर्वपक्षः वेदस्य पौरुषत्त्वे स्वमतस्य दाढर्याय प्रमाणत्वेन श्रुतिवचनमुद्धरति–

**तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि यज्ञिरे।**
**छन्दांसि यज्ञिरे तस्माद्यजुस्तस्मादजायत॥**[4]

अपि च –

**अस्य महतो भूतस्य निःश्वसितमेतत्।**[5]
**इदं सर्वमसृजत ऋचो यजूंसि सामानि।**[6]

एताः श्रुतयो वेदस्योत्पत्तित्वं प्रतिपादयन्ति। श्रुतिवाक्येषु तस्मात् परमेश्वरात् वेदानामुत्पत्तिः प्रतिपादिता। अत उत्पत्तिमत्वात् वेदाः पौरुषेयाः।

नैयायिकानां मते शब्दः अनित्यो भवति अस्मदादिबाह्येन्द्रियग्राह्यत्वादिति। एतेषां मते वैयाकरणानां स्फोटकल्पनाऽपि निरर्थका। पुरुषैः वर्णानां प्रत्युच्चारणं क्रियते। अत उत्पत्तिविनाशवन्तो वर्णा उपलभ्यन्ते। तस्मादनित्यः शब्दः। शब्दानामनित्यत्वात् शब्दराशीनां वेदानां कथं नित्यत्वम्।

अपि च नैयायिकनये ईश्वरो वेदस्य कर्ता। ईश्वरोऽपि पुरुषेष्वान्तर्भावात् वेदः पौरुषेयः। नन्वत्र मीमांसकानां प्रश्नो यत् परमेश्वरस्य ताल्वादिस्थानाभावेन वर्णोच्चारणा–

1. जैमिनीसूत्रम् 1.1.28
2. तैत्तिरीयसंहिता 7.1.10.2
3. तत्रैव 7.2.2.1
4. पुरुषसूक्तम् 10.90.9
5. बृहदारण्यकोपनिषद् 2.4.10
6. तत्रैव

सम्भवात्कथं वेदानाम् ईश्वरप्रणीतत्वमुच्यते नैयायिकैः स्वभावतोऽशरीरस्यापि तस्य भक्तानुग्रहार्थं लीलाविग्रहग्रहणसम्भवात् ईश्वरस्य वेदप्रणीतत्वं सम्भवति। तस्मात् वेदाः पौरुषेया इति।

**उत्तरपक्षः -**

अनेन प्रकारेण पूर्वपक्षिभिर्वेदस्य पौरुषेयत्वे नैकाः युक्तयस्तर्काश्चोपस्थापिताः। इदानीमुत्तरपक्षरूपेण मीमांसकाः एताः युक्तीः विखण्ड्य 'वेदस्यापौरुषेयत्वमिति' स्वसिद्धान्तं प्रतिपादयन्ति- **'आख्या प्रवचनात्'।**[1] सिद्धान्तिनां मीमांसकानां मते वेदस्तु अपौरुषेय इति। वेदस्य काठक-कौथुम-तैत्तिरीयादयः याः शाखाः श्रूयन्ते तेन शाखाकर्तॄणां बोधो न भवति, अपितु तत्तत् शाखायामध्ययनसम्प्रदायप्रवर्तितानामृषीणां बोधो जायते। तथाह जैमिनीयन्यायमालायाम्-

> **समाख्याध्यायाऽपकत्वेन वाक्यत्वं तु पराहतम्।**
> **तत्कर्त्रनुलम्भेन स्यात्ततोऽपौरुषेयता।।**[2]

वेदः कालिदासादिवाक्यमिव पौरुषेय इत्यप्यसमीचीनम्। यतो हि कालिदासादि-विरचिते ग्रन्थे तत्तत्कवीनां नाम संकेतो वोपलभ्यते। परं वेदे तस्य कर्तुः नामोल्लेखः क्वचिदपि न संप्राप्यते। अतो वेद अपौरुषेयो वर्तते।

पूर्वपक्षेण 'बबरः प्रावाहणिरकामयत' इत्यादिना वेदस्य पौरुषेयत्वं प्रतिपादितं तस्योत्तरं सूत्रयति महर्षिजैमिनिः- **'परं तु श्रुतिसामान्यमात्रम्'**[3] अर्थात् वेदे ये अनित्याः बबरादयः श्रूयन्ते तच्छब्दसामान्यमेव। अत्र बबरनामकः कोऽपि अनित्यः पुरुषो न विवक्षितः, अपि तु बबरध्वनियुक्तस्य प्रवहणस्वभावस्य वायोरर्थः स्वीकृतः। मीमांसकाः **"यः कल्पः सः पूर्वकल्पः"** इति न्यायेन वेदस्यापौरूषेयत्वं प्रतिपादयन्ति।

अपि च 'वनस्पतयः सत्रमासत' 'सर्पाः सत्रमासत' इति वाक्यानि वेदे श्रूयन्ते, तानि उन्मत्तप्रलापानीव न सन्ति। एतानि वाक्यानि तु सत्रस्य अर्थवादात्मकानि भवन्ति प्रशंसायामिति भावः। प्रसंशा चाविद्यमानेनापि कर्तुं शक्यते। अचेतनाः वनस्पतयः, अविद्वांसः सर्पादयोऽपि सत्रमनुष्ठितवन्तः, किं पुनश्चेतना विद्वांसो ब्राह्मणा इत्यत्र सत्रस्तुतिः। अर्थात् विद्वद्भिब्राह्मणैः सत्रमवश्यमेवानुष्ठेयमिति अर्थवादवाक्यस्य तात्पर्यम्। विधिवाक्येन सह एकवाक्यता संपाद्यार्थनिर्णयः कर्तव्य इति नियमो वर्तते। तस्मान्नास्ति

---

1. जैमिनीसूत्रम् 1.1.30
2. जैमिनीयन्यायमाला 55
3. जैमिनीसूत्रम् 1.1.31

वेदस्य पौरुषेयत्त्वं वेदस्तु अपौरुषेय एव। वेदस्य पौरुषेयत्वसिद्ध्यर्थं यानि श्रुतिवाक्यानि पूर्वपक्षेण उद्धृतानि, तदपि असमीचीनानि। 'तस्माद्यज्ञात्सर्वहुत:' 'त्रयो वेदा अजायन्त' इत्यादिश्रुतिवाक्यमर्थवादात्मकं वर्तते। 'यस्य नि:श्वसितं वेदा:' इति वाक्येनापि वेदस्योत्पत्तिर्न शंकनीया। अत्र यथा नि:श्वास: स्वाभाविकतया भवति तद्वत् वेदोऽपि नि:श्वास: इव अप्रयत्नसिद्ध इति भाव:।

नैयायिकै: यत् शब्दानामनित्यत्वमुक्तं तदप्यसमीचीनम्। तथाह माधवाचार्य:

**अबाधितप्रत्यभिज्ञाबलाद्वर्णस्य नित्यता।**
**उच्चारणप्रयत्नेन व्यज्यतेऽसौ न जन्यते।।**[1]

वैयाकरणा अपि शब्दस्य नित्यत्वं स्वीकुर्वन्ति। यथोक्तं भर्तृहरिणा –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत:।।**[2]

तस्मान्नित्ये शब्दे नास्ति वेदस्याप्रमाण्यमिति सिद्धान्त:। तथा च परमेश्वरस्य शरीराभावात् वेदकर्तृत्वं कथं स्यादिति मीमांसकजिज्ञासायां भक्तानुग्रहार्थं लीलाविग्रहग्रहण-सम्भवादिति नैयायिकै: प्रतिपादितमेतदपि न समीचीनम्। परमेश्वरस्य लीलाविग्रहसम्भवेऽपि अर्थात् इन्द्रियत्वेऽपि अतीन्द्रियदर्शनं न सम्भवति। इन्द्रियाणि स्वविषयमतिक्रम्य परविषयं न गृह्णन्ति। उक्तञ्च प्रभाकरगुरूणा –

**यत्राप्यतिशयो दृष्ट: स स्वार्तानतिलंघनात्।**
**दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता।।**[3]

अतो वेदो न ईश्वरकृति:। तस्मादपौरुषेय इति। ननु भगवता बादरायणेन वेदान्तसूत्रे वेदस्य ब्रह्मकार्यत्वं सूत्रितम् – **'शास्त्रयोनित्वात्'** इति।[4] ऋग्वेदादिशास्त्रकारणात् ब्रह्म सर्वज्ञमिति सूत्रार्थ:। परञ्च मनुष्यनिर्मितत्वाभावात् नैतावता वेदस्य पौरुषेयत्वं भवति। ईदृशमपौरुषेयत्वमभिप्रेत्य महर्षिबादरायणेन देवताधिकरणे वेदस्य आकाशादिवत् नित्यत्वं सूत्रितम् – **'अत एव च नित्यम्'** इति।[5] अत्र श्रुतिस्मृत्यपि प्रमाणं भवत:। **'वाचा विरूपनित्यया'**[1] इति श्रुति:। **'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा'**[2] इति स्मृति:। तस्मात् कर्तृदोषशंकाया अनुदयात् वेदस्य अपौरुषेयत्वं निर्विघ्नं सिद्धम्।

---

1. जैमिनीयन्यायमाला 51
2. वाक्यपदीयम्, ब्रह्मकाण्डम् – 1
3. सर्वदर्शनसंग्रह:, मीमांसादर्शनम् – 6
4. वेदान्तसूत्रम् 1.1.3
5. ब्रह्मसूत्रम् 1.3.29

एवं प्रकारेण वेदस्य पौरुषेयत्वे पूर्वपक्षिभिर्याः युक्तय उपस्थापिताः। तासां युक्तीनां खण्डनपुरःसरं सिद्धान्तिभिर्मीमांसकै वेदस्यापौरुषेयत्वं साधितम्। सिद्धान्तोऽसौ भारतीयसंस्कृतौ सुतरां समाद्रियते इति शम्।

**सन्दर्भग्रन्थः**

1. ऋग्वेदसंहिता, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, 2016
2. तैत्तिरीयसंहिता, मेहरचन्दलक्ष्मणदासः, नईदिल्ली, 2018
3. पतञ्जलिः, योगसूत्रम्, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, 1984
4. पाण्डेयः डा. अवध, ऋग्वेदभाष्यभूमिका, मोतीलालबनारसीदासः, वाराणसी, 2014
5. पाण्डेयः डा. महेन्द्रः, जैमिनीन्यायमाला, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 2013
6. माधवाचार्यः, सर्वदर्शनसंग्रहः, खेमराजः श्रीकृष्णदासप्रकाशनम्, मुम्बई, 2020
7. व्यासः, महाभारतम्, गीताप्रेसगोरखपुरम्, 2013
8. शर्मा सीतारामः, जैमिनीसूत्रम्, चौखम्बाविद्याभवनम्, वाराणसी, 2013
9. शास्त्रीहरगोविन्दः, मनुस्मृतिः, चौखम्बासंस्कृतभवनम्, वाराणसी, 2019
10. शंकराचार्यः, ब्रह्मसूत्रम्, श्रीकैलाश आश्रमः, ऋषीकेशः, 2001

✦✦✦

1. ऋग्वेदः 8.75.3
2. महाभारतम्, शान्तिपर्व 232.24

 ISSN : 7552-2779

# मानवजीवने खेचराणां प्रभावः

**आशीषकुमारः***

भारतीयज्योतिर्विद्वद्भिः मानवजीवने जन्मकालिकग्रहस्थित्यनुसारं ग्रहप्रभावस्य निरूपणं सम्यग्तया कृतम्। ग्रहप्रभावस्य यथार्थता परीक्षणानुभवेन ज्ञातुं शक्यते। मातृगर्भे जीव आकाश-तेज-वायु-भूमि-जलप्रभृतीनां पञ्चमहाभूतानां सूक्ष्मांशेन तथा त्रिगुणानां समन्वयेन रजोवीर्ययोगनिष्पत्याकलनाद् शरीरपिण्डं यावत् विकसितं भवतीति प्रसिद्धम्। आत्मा जीवस्य पूर्वार्जितकर्मानुसारम् आधानकालिक-लग्नबलेन शुभाशुभग्रहयोगेन च ग्रहमण्डलस्य विषरश्मिप्रभावेण अथवा अमृतरश्मियुक्तप्रभावेण स्वमातृगर्भे प्रविशति। अपि च तात्कालिकाकाशस्थस्वोच्च-सम-नीचावस्थानुसारं तथा ग्रहाणां स्वस्वगुण-धर्मानुसारं मानवः सत्वरजस्तमोगुणैः जन्मकालिकलग्नचन्द्रग्रहप्रभावे सात्विक-राजसिक-तामसिकगुणैः युक्तो भवति।

**यथोक्तं कल्याणवर्मणा-**

**राजा रविः शशधरश्च बुधः कुमारः।**
**सेनापतिः क्षितिसुतः सचिवैसितेज्यौ॥**

**भृत्यस्तयोश्च रविजः सबला नराणाम्।**
**कुर्वन्ति जन्मसमये निजमेवसत्त्वम्॥**

अपि चोक्तम् यथा-

**यथा धेनु सहस्त्रेषु वत्सो विन्दति मातरं।**
**तथा पूर्वकृतं कर्म कर्त्तारमनुगच्छति॥**

एवं रीत्या मनुष्यस्य प्रारब्धकर्मफलेन स्थानवंशगर्भजन्मभोगादीनां फलानि ग्रहेभ्यो जायते। अतः मानवजीवने ग्रहप्रभावस्य सारांशः अत्रैव मया संगृहीतः।

---

* शोधच्छात्रः ज्योतिषविभागः, केन्द्रीयसंस्कृत वि.वि. जम्मूः।

**ग्रहशब्दस्य व्युत्पत्तिः-**

1. ग्रह+अच् = गृह्णाति गतिविशेषानिति यद्वा गृह्णाति फलदातृत्वेन जीवानित्यर्थे विभषा ग्रहः इति पाणिनीयेन सूत्रेण अचि प्रत्यये सति ग्रहशब्दः सिद्ध्यति।[1]

2. वेदेऽपि यद्गृह्णाति तस्मात् ग्रहः इति निर्दिष्टम्।

3. आकाशे ज्योतिर्विम्बानि अनन्तसंख्यकानि दृश्यन्ते। सर्वाणि तानि स्थिरस्थानानि नक्षत्राणीति कथ्यन्ते। ग्रहास्तु पूर्वाभिमुखं गच्छन्ति, तथा तानि नक्षत्राणि सततं गृह्णन्ति। अत एवैते ग्रहा इति प्रोच्यन्ते। ग्रहाणामपि प्रकाशकाप्रकाशरूपेण भेदद्वयं पराशरेणाङ्कितम्। ग्रहाणां नवसंख्या महाभारते दृश्यते। अस्मिन् ग्रन्थे नवग्रहानधिकृत्य नवावतारा: प्रतिपादिताः। यत्र सप्तग्रहाणां चर्चा विद्यते तत्र राहुकेतू विहाय अवताराः ग्रहणीयाः। होराशास्त्रे फलकथनार्थं ग्रहाणां वर्णलिङ्गादिज्ञानमावश्यकमतोऽत्र निरूप्यते।

के च ग्रहाः-

**सूर्यचन्द्रमङ्गलश्च बुधश्चापि बृहस्पतिः।**
**शुक्रशनिश्चरो राहु केतुश्चेति नवहाः॥[2]**

वस्तुतः ज्योतिषशास्त्रे एते नवग्रहाः प्रसिद्धाः इत्याह पराशरः।

तत्र आदौ सूर्यः-

सरति आकाशे सुवति कर्मणि लोकं प्रेरयति वा इति सूर्यः।

ऋग्वेदेऽपि-

**आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्त्यञ्च।**
**हिरण्ययेन सवितारथेना देवो याति भुवनानि पश्यन्॥**

सूर्य आत्मा जगतस्तस्थुषश्चेति उपलभ्यते। अयं सूर्यः कालपुरुषस्य आत्मा, विश्वस्य राजा, रक्तश्यामवर्णोऽग्निदेवतार्कः, पुंल्लिङ्ग, क्षत्रियवर्णः, सत्त्वप्रकृतिको, मधुपिङ्गलनेत्रः, चतुरस्त्रशरीरः, शुचिः, पित्तस्वभावः, धीमान्, अल्पकेशः, अस्थिस्वामी, देवालयाधिपः, कटुरसः, दक्षिणदिक्स्वामी, दिवावली, स्थुलवृक्षोत्पादकः, रक्तक्षौमवस्त्रः, ग्रीष्मर्तुस्वामी, मूलसंज्ञकः, सिंहराश्यधिपतिः, मेषराशेः दशांशपर्यन्तमुच्चः, तुलाराशेश्च दशांशान्तं यावत् नीचस्थानापन्नः, सिंहराशेर्विंशत्यंशपर्यन्तं मूलत्रिकोणसंज्ञकः, अस्य मित्राणि चन्द्रमङ्गलगुरवो समबुधशानिशुक्रौ च शत्रु। स च राज्य-विद्रुम-रक्तवस्त्र-माणिक्य-

---

1. संस्कृत-हिन्दी कोषः पृ. 358
2. बृ.पा.हो.शा. पृ. 21 श्लोक 25

राजवर्ण-पर्वतक्षेत्र क-पितृपति-व्रतप्रभृतिवस्तूनां कारकः भाग्योदकारकं प्रोक्तः। भगवतः श्रीरामचन्द्रस्यावतारः सूर्य इति पराशरेणोक्तम्-रामोऽवतारः...... सोमसुतस्य च।[1] परन्तु बिहारीलालकर्मकाण्डे कश्चन भेदः वर्त्तते, यथा-सूर्यरूपिनृपसिंहश्च रामचन्द्रोऽस्तु चन्द्रमा[2] अर्थात् नृसिंहावतारः सूर्यः रामावतारः चन्द्रमा।

**अथ चन्द्रमा-**

सोमो हि कालपुरुषस्य मनः गौरगात्रः जलदेवताकः वैश्यः, स्त्रीलिङ्गः सत्त्वस्वभावः, बहुवातकफः प्राज्ञः शरीरे रक्ताधिपतिः, जलस्थानस्वामी समयमुहूर्त्ताधिपः लवणरसः उत्तरदिशि निशायां च बलवान् दुग्धवृक्षोत्पादकः वर्षर्तुस्वामी, क्षौमवस्त्रो धातुसंज्ञकः कर्कराश्यधिपतिः वृषरराशेरंशत्रयान्तमुच्चस्थानकः वृश्चिकराशेरंशत्रयपर्यन्तं नीचस्थानापन्नस्तथा वृषराशेस्त्रिंशदंशान्तं मूलत्रिकोणसंज्ञकश्चास्ति। सूर्यबुधावस्य मित्रे मङ्गलगुरुशनिशुक्राः समाः सन्ति। अयं पुनः मातृमनः पुष्टि गन्धरसेक्ष्गोधूमकारक द्विजशक्तिकार्यसस्यरजतविवाह-प्रभृतिकानां वस्तुनां कारकः चतुर्विंशनब्दे च भाग्योदयप्रदो भवति।

**अथ मङ्गलः-**

मङ्गलग्रहः कालपुरुषस्य सत्त्वम्, रक्तवर्णः कार्त्तिकेयदेवताकः, सेनापतिः क्षत्रियः, तमः स्वभावः, क्रूरो रक्तनेत्रश्चलः पित्तप्रकृतिकः, क्रोधी, कृशो, मध्यदेहश्चोदारहृदयः, अग्निस्थानस्वामी, समयेऽहोरात्राधिपः तिक्तरसः दक्षिणे रात्रौ च बलवान् कटुवृक्षोत्पादकः, रक्तवस्त्रः, ग्रीष्मर्तुस्वामी, मेषवृश्चिकराश्याधिपतिः, मकरराशेरष्टविंशत्यंशान्तमुच्चस्थानस्तथा कर्कराशेरष्टाविंशत्यंशपर्यन्तं नीचस्थानी मेषराशौ द्वादशांशान्तं मूलकोणसंज्ञकश्चास्ति। रविचन्द्रगुरवो अस्य मित्राणि शनिशुक्रौ समौ बुधश्च शत्रुः, अग्नितत्त्वः अग्नतत्त्वः धातुसंज्ञकश्चायं सत्त्वभूमिपुत्र शौर्यरोगब्रह्मभ्रातृपराक्रमाग्नि-साहसराजशत्रुकुटास्त्रीप्रभृतीनां वस्तूनां कारकः तथा अष्टाविंशतितमे वर्षे भाग्यप्रदो भवति। भगवन् नृसिंहश्चास्यावतारः प्रोक्तः। परन्तु कर्मकाण्डे च स एव परशुरामभौमेति बोधव्यः।

**अथ बुधः-**

बुधस्तु कालपुरुषस्य वाणी, दूर्वाश्यावर्णः विष्णुदेवताकः, नपुंसकः वैश्यः, श्रेष्ठशरीरः, श्लिष्टवाक्यः, हास्यप्रियः, वातपितकफदोषत्रययुतः, शरीरे त्वक्स्वामी, कृष्णक्षौमवस्त्र, शरदृताधिपः, रजः स्वभावः, मूलसंज्ञकः, युवराजश्च कथितः।

---

1. बृ.पा.हो.शा. पृ. 21 श्लोक. 27
2. विहारिलाल कर्मकाण्ड पञ्चमसंस्करण, पृ. 270

ज्योतिर्विद्यामातुलगणितकार्यनर्तनवैद्यहासशिल्पविद्याविवाहप्रभृतिकानां वस्तुनां कारकः, मिथुनकन्याराशिपतिः, कन्याराशेः पञ्चदशान्तमुच्चस्तथा मीनराशेः पञ्चदशपर्यन्तं नीचः कन्याराशौ पञ्चदशांशानन्तरं विंशत्यंशान्तं मूलत्रकोणः मूलसंज्ञकः भूमितत्त्वश्चास्ति। अस्य बुधस्य रविशुक्रौ मित्रे शनिगुरुभौमाः समाः चन्द्रश्च शत्रुः। अयं पुनः द्वात्रिंशत्तमे वर्षे भाग्यप्रदः। स च भगवतः बुद्धोऽस्यावतारः बोधव्यः। विशेषस्तु केचित् वामनश्च बुधस्तथा। यद्वा भवतु वामनावतारः बुद्धोऽवतारः वा बोधव्यः।

**अथ बृहस्पतिः-**

कालपुरुषस्य ज्ञानसुखात्मकः, गौरगात्रः, इन्द्रदेवताकः मन्त्री, ब्राह्मणः, विशालदेहः, पिङ्गलकेशनेत्रः, कफप्रकृतिकः, धीमान्, सर्वशास्त्रविशारदः, शरीरे वसास्वामी, कोशस्थानाधिपः, समये मासाधिपतिः, मधुररसः पूर्वस्यां दिशि दिने च बलवान् सफलवृक्षोत्पादकः, पीताम्बरः, धनुर्मीनस्वामी, कर्कस्य पञ्चांशपर्यन्तमुच्चस्तथा मकरस्य पञ्चांशान्तं नीचः, धनुषि च दशांशांन्तं मूलत्रिकणः, हेमन्तर्तुस्वामी, सत्त्वस्वभावः, आकाशतत्वः। स्वकर्मयजनदेवब्राह्मणधनगृहाकाञ्चनवस्त्रपुत्रमित्रान्दोलनविवाह-प्रभृतिकानां वस्तूनां कारकः मूलसंज्ञकश्चास्ति। अस्य हि रविचन्द्रमङ्गलाः मित्राणि, शनिः समः, बुधशुक्रौ शत्रू। अयं पुनः षोडशे वर्षे भाग्योदयकारको भवति। भगवान् वामनश्चास्यावतारः प्रोक्तः।

**अथ शुक्रः-**

शुक्रो हि कालपुरुषस्य वीर्यात्मको मन्त्री, श्यामशरीरः, स्त्रीलिङ्गश्चेन्द्राणी देवताको जलतत्त्वो ब्राह्मणः रजः प्रकृतिकः, सुखी, कान्तवपुः, श्रेष्ठः, सुलोचनः, काव्यकर्त्ता, कफवातप्रकृतिकः, वक्रकेशः, शरीरे शुक्रस्वामी, शयनस्थानाधिप, समये पक्षात्मकोऽम्लरसः, उत्तरदिशि दिने च बलवान्, पुष्पवृक्षोत्पादकः, क्षौमवस्त्रः, वसन्तर्तुस्वामी, मूलसंज्ञकः, वृषतुलाधिपः, मीनराशौ सप्तविंशतिसंख्यकौ शान्तमुच्चः, कन्यायां सप्तविंशत्यंशान्तं नीचः तुलायां पञ्चदशांशान्तं मूलत्रिकोणः। कलत्रकार्मूकसुखगीतशास्त्रकाव्यपुष्पसुकुमार-यौवनाभरणरजतयान-गर्वलोक मौक्तिकविभवकवितारसविवाहादीनां वस्तूनां कारकः।

शनिबुधौ चास्य मित्रे, गुरुभौमौ समौ, रविचन्द्रौ शत्रू स्तः। अयं हि पञ्चविंशे वर्षे भाग्योदयप्रदो भवति। भगवान् परशुरामोऽस्यावतारः।

**अथ शानिः-**

अयं हि काल पुरुषस्य दुःखस्वरूपः कृष्णवर्णः, ब्रह्मदेवताकः, नपुंसकः, मृत्युः, वायुतत्त्वः, शूद्रः, स्थूलदन्तोऽलसः, पङ्गुः, खररोमकचः, कृशो, दीर्घतनुः,

पिङ्गलनेत्रः, वातप्रकृतिकः, शरीरे स्नायुस्वामी, उत्करवाल्मीकस्थानाधिपतिः, समये वर्षपः, कषायरसः, पश्चिमे रात्रौ च बलवान, कुत्सितवृक्षात्पादकः, चित्रपट्टवस्त्रः, शिशिरर्तुस्वामी, मूलधातुसंज्ञकः, सर्वग्रहेषु वृद्धस्तथायुर्वृद्धिप्रदायकः, मकरकुम्भाधिपतिः, तुलाराशौ विंशत्यंशान्तमुच्चस्तथा मेषे विंशत्यंशान्तं नीचः, कुम्भे च विंशत्यंशपर्यन्तं मूलत्रिकोणेः तमः स्वभावो महिषहयगजतैलवस्त्रशृङ्गारप्रयाणसर्वराज्यदार्वायुधगृहयुद्ध-संचारशुद्र नीलमणि विघ्नकेशशल्य शूलरोगदासदसीजनायुष्यमृत्यु प्रभृतिकानां वस्तूनां कारकः षट्त्रिंशतमे वर्षे भाग्यप्रदो भवति। शुक्रबुधौ चास्य मित्रे, गुरु समो, रविचन्द्रभौमा शत्रवः सन्ति। भगवान् कूर्मोऽस्यावतारः प्रोक्तः। भेदस्तु कल्किरूपी च शौरिस्तु राहुश्च बोधरूपधृक इति सामान्यः।

**अथ राहुः-**

भगवान् वराहोऽस्यावतारः। सेनास्वरूपः धूम्राकारो नीलशरीरो वनवासी, भयङ्करो वातप्रकृतिको धीमान्, चाण्डालजातिकः, बल्मीककस्थानाधिपः. सीसधातुपः, चित्रकन्याः, समये चाष्टमासाधिपः, धातुसंज्ञकः, प्रयाणसमयसर्परात्रि सकलसुप्तार्थं द्युतकारकः, मिथुने विशत्यंशान्तमुच्चः कुम्भे मूलत्रिकोणश्च प्रोक्तः। अस्य गृहं कन्याराशिर्ज्ञेयः। शनिशुक्रौ अस्य मित्रे सूर्यचन्द्रभौमा:ल शत्रवः प्रोक्ताः।

**अथ केतुः-**

भगवान् मत्स्योऽस्यावतारः। शेषान्तस्य राहुवदेवस्वरूपः। समये मासत्रयाधि-पतिर्जीवसंज्ञकः चित्रयुतवस्त्रः नीलमणि-स्वामी-व्रणरोगचर्मार्त्तिशूलस्पुट-क्षुधार्तिकारकः धनुषि षडंशान्तमुच्चः। सिंहे मूलत्रिकोणश्च प्रोक्तः। अस्य गृहं मीनराशिर्ज्ञेयः। शनिशुक्रौ शत्रू सूर्यचन्द्रभौमाः मित्राणि गुरुबुधौ च समौ प्रोक्तौ।

**अत्र वैशिष्ट्यम्-**

क्रूरग्रहाः कृष्णपक्षे दक्षिणायने शुभग्रहाश्च शुक्लपक्षे उत्तरायणे बलिनो भवन्ति। वर्षमासदिनहोराणां स्वामिनः क्रमादुत्तरोत्तरं बलिनः सन्ति। शनिमङ्गलगुरुशुक्रचन्द्रादित्यश्चेते ह्युत्तरोत्तरोरं बलिनो निगदिताः।

✦✦✦

# श्रीमालिनीविजयोत्तरतन्त्रस्य सप्तदशेऽधिकारे योगय सन्दर्भे प्राणायामविवेचनम्

**अभिषेककुमार-उपाध्यायः** *

संक्षिप्तिका (Abstract)- भारतीयज्ञानपरम्परायां कश्मीरमण्डलस्य अन्यतमं स्थानं विद्यते। कश्मीरमण्डलस्य ज्ञानपरम्परा भारतीयज्ञानपरम्परायां क्षीरसागररूपेण कार्यं करोति। अस्यां ज्ञानपरम्परायां भारतीयज्ञानसंस्कृतेः आध्यात्मिकं, धार्मिकं, नैतिकं तथा च सामाजिकं, तांत्रिकं, दार्शनिकं, योगिकं वर्णनं सरलतया प्रतिपादितम्। एतेषु विषयेषु योगतत्त्वविमर्शः सर्वाधिको महत्त्वपूर्णो वर्तते। योगतत्त्वस्य साधनामाध्यमेन साधकाः स्वलक्ष्ये सफलतां प्राप्नुवन्ति। योग शब्दः युज् समाधौ इति धातोः घञ् प्रत्यये सति निष्पन्नो भवति। योगः मोक्षस्य प्राप्तये सर्वोत्तमोपायः वर्तते। योगस्य माध्यमेन जीवः परमतत्त्वस्य साक्षात्कारं करोति। योगस्य माध्यमेन साधकस्य विविधानां जिज्ञासानां समाधानं भवति। कश्मीरमण्डलस्य आगमग्रन्थेषु योगतत्त्वस्य साक्षात्कारः पदे पदे परिलक्षितो भवति। दर्शनेऽस्मिन् साधकः योगतत्त्वविमर्शेण शिवस्य सायुज्यं प्राप्नोति।

कश्मीरशैवदर्शनस्य मतानुसारं शिवः संसारस्य मूलकारणं वर्तते। संसारस्य सर्वविधतत्त्वेषु शिवतत्त्वं विराजते। शिवः योगीनां हृदये शक्तिरूपेण निवासं करोति। कश्मीरशैवसाधकाः यदा योगसाधनां कुर्वन्ति तदा ते शिवशक्त्योः साक्षात्कारं कुर्वन्ति। अनेन साक्षात्कारेण योगीनां जीवनं प्रकाशमयं भवति। अतः कश्मीरयोगपरम्परायां योगस्य तत्त्वानां वर्णनं विभिन्नग्रन्थेषु समुपलभ्यते।

प्रस्तुतशोधपत्रेऽस्मिन् **“श्रीमालिनीविजयोत्तरतन्त्रस्य सप्तदशेऽधिकारे योगस्य संदर्भे प्राणायामविवेचनम्”** इति विषयस्य विवेचनं भविष्यति।

**शब्द-संकेत ( Key words )**-श्रीमालिनीविजयोत्तरतन्त्रस्य परिचयः, अधिकाराणां परिचयः, सप्तदशेऽधिकारे प्राणायामस्य विवेचनम्।

* शोधार्थी, सर्वदर्शनविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, कुतुब-सांस्थानिकक्षेत्रम्, नवदेहली

**विषयः ( Subject )** – कश्मीरशैवदर्शनस्य आगमग्रन्थेषु श्रीमालिनीविजयोत्तर–तन्त्रस्य महत्त्वपूर्णं स्थानं विद्यते। आगमेऽस्मिन् मातृकयोः सरलतापूर्वकं विवेचनं प्राप्यते। आगमेऽस्मिन् माता पार्वती परमेश्वरं प्रति योगसम्बन्धिनो विविधप्रश्नान् करोति। तदा परमेश्वरा तेषां प्रश्नानां निराकरणे विस्तारपूर्वकं प्रकाशं कुर्वन्ति। अनेन प्रकारेण ग्रन्थोऽयं ऋषीणां कृते श्रवणगोचरयुक्तो अभवत्। सर्वप्रथमं मालिनीविजयोत्तरतन्त्रं महेश्वरः अघोरात् परमेश्वरतारकान्तशिवात् अश्रुणोत्। यथोक्तम् –

**प्रत्युवाच प्रहृष्टात्मा नमस्कृत्य महेश्वरम्।**
**श्रृणुध्वं संप्रवक्ष्यामि सर्वसिद्धि–फलप्रदम्।**
**मालिनीविजयं तन्त्रं परमेशमुखोद्धृतम्।**
**भुक्तिमुक्तिप्रदातारमुमेशममरार्चितम्।।**[1]

अनेन प्रकारेण ग्रन्थेऽस्मिन् नवकोटिमन्त्रैः सहिता सिद्धयोगीश्वरीतन्त्रस्य व्याख्या प्रतिपादिता।[2] अनन्तरं द्वितीयावसरे परमेश्वरशिवेन देवसभायां उमादेवीम् अश्राव्यत। अनेनैव प्रकारेण तृतीयावसरे कार्तिकेयः ऋषिपरम्पराकथामृतम् अश्राव्यत। श्रीमालिनी–विजयोत्तरतन्त्रं सिद्धयोगीश्वरीतन्त्रं वर्तते। अस्मिन् संदर्भे यदा पार्वती सिद्धयोगीश्वरीमतस्य प्रश्नं करोति तदा शिवः तस्योत्तरं कथयति –

**श्रृणु देवि प्रवक्ष्यामि सिद्धयोगीश्वरीमतम्।**
**यन्न कस्यचिदाख्यातं मालिनीविजयोत्तरम्।।**[3]

अनेन प्रकारेण अस्य ग्रन्थस्य महत्त्वमत्यधिकं वर्धमानं जायते।

ग्रन्थेऽस्मिन् त्रयोविंशतिः अधिकाराः सन्ति। सर्वेषु अधिकारेषु विविधप्रकारैः योगसाधनापरकज्ञानविषयाणां वर्णनं विद्यते। अस्य ग्रन्थस्य सप्तदशेऽधिकारे प्राणायामस्य विवेचनं सरलतापूर्वकं विवेचितम्। तस्य वर्णनमत्र प्रस्तूयते।

**श्रीमालिनीविजयोत्तरतन्त्रस्य सप्तदशेऽधिकारे प्राणायामस्य विवेचनम्** – श्रीमालिनीविजयोत्तरतन्त्रस्य सप्तदशेऽधिकारे योगस्य संदर्भे प्राणायामस्य विवेचनं विस्तारपूर्वकं प्रतिपादितम्। अधिकारेऽस्मिन् प्रारम्भे एव सर्वेश्वरशिवः साधकानां प्रति जागररूकतायाः विषये कथयति यत्– ध्यानपूर्वकं सर्वप्रथमं मनस्तत्त्वे स्फुटं भव।[4] मनस्तत्त्वस्य गतिचक्रं अथवा चञ्चलताया स्थिरीकरणार्थम् एक एव उपायः वर्तते।

---

1. श्रीमालिनीविजयोत्तरतन्त्रम्, 1/6–7
2. श्रीमालिनीविजयोत्तरतन्त्रम्, 1/7
3. श्रीमालिनीविजयोत्तरतन्त्रम्, 1/13
4. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोक संख्या, 1

तस्य नाम प्राणायाम इति। यथोक्तम्– गतिभङ्गं ततस्तस्य प्राणायामेन कारयेत्।[1] स च प्राणायामः पञ्चविधः प्रकारेण ज्ञायते।

श्रीमालिनीविजयोत्तरतन्त्रे प्राणायामः पञ्चप्रकारको परिभाषितः। यथा –

**स च पञ्चविधः प्रोक्तः पूरकादिप्रभेदतः।**
**पूरकः कुम्भकश्चौव रेचको ह्यपकर्षकः॥**
**उत्कर्षः पञ्चमो ज्ञेयस्तदभ्यासाय योगिभिः॥**[2]

अनेन प्रकारेण प्राणायामस्य प्रकारेषु पूरकः, कुम्भकः, रेचकः, अपकर्षकः कथितः तथा चोत्कर्षादिनां विवेचनं भवति। एतेषां प्राणायामानां परिभाषासहितं वर्णनमत्र दीयते

**श्रीमालिनीविजयोत्तरतन्त्रे प्राणायामस्य भेदानां वर्णनम्** :- अधिकारेऽस्मिन् प्राणायामस्य पञ्चप्रकाराणां वर्णनं विवेचितम्। यत्र परिभाषासहितः उल्लेखः प्रतिपादितः। यथाक्रमं तेषां प्रस्तुतीकरणमत्र दीयते।

**1. पूरकप्राणायामः**- प्राणायामस्य अवस्थायां यदा प्राणुवायुः उपरिसंयोगेन उदरे समाहितः भवति तदेवं प्रकारो व्यापारो पूरकप्राणायामः भवति। यथोक्तमपि -

**पूरकः पूरणाद्वायोर्द्वेषा षोढा च गीयते।**
**स्वभावपूरणादेको विरेच्यान्यः प्रपूरितः॥**[3]

अस्य निरन्तराभ्यासेन वायुः भिन्न-भिन्नात्मकेषु समूहेषु विभक्तो भवति। प्राणवायुः विविधभेदात् शरीरे गच्छति। तस्या संख्यापि अनन्ततायुक्तो जायते। यथोक्तम् श्रीमालिनीविजयोत्तरतन्त्रे -

**नासामुखोर्ध्वतालूनां रन्ध्रभेदाद्विभिद्यते।**
**भिन्नः षोढास्त्वमभ्येति पुनर्भेदैरनन्तताम्॥**[4]

अनेन प्रकारेण पूरकप्राणायामस्य साधनावस्थायां सिद्धिः भवति। अस्य प्राणायामस्य साधकाः निरन्तरम् अभ्यासं कुर्वन्ति।

**2. कुम्भकप्राणायामः** - कुम्भकप्राणायामे वायोः स्थितिः पूर्णरूपेण परिवर्धमाना भवति। तत्र पञ्चप्रकारेण कुम्भकप्राणायामस्य स्थितिः स्पष्टा भवति। यत्र प्रथमावस्थायां

---

1. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 2
2. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 2-3
3. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 4
4. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 5

श्वासवायोरुदरे पूर्णतया स्थिरीकरणं भवति। द्वितीयावस्थायां प्राणधारणीकरणाद् अनन्तरं रिक्तोदरे पुनः वायोः स्थायीकरणं कुम्भकस्य द्वितीयास्थितिः भवति। अनन्तरं वायोः मुक्तिकरणं, ग्रहणीकरणं तथा च वायोरेकीकरणमेव कुम्भकस्य पञ्चमी अवस्था भवति। उक्तमपि –

**कुम्भः पञ्चविधो ज्ञेयस्तत्रैकः पूरितादनु।**
**विधृतो रेचकात्परश्चाद्द्वितीयः परिकीर्तितः॥**

**द्वयोरन्ते द्वयं चान्यत्स्वभावस्थश्च पञ्चमः।**
**स्थानान्तरप्रभेदेन गच्छत्येषोऽप्यनन्तताम्॥**[1]

अनेन प्रकारेण कुम्भकप्राणायामस्य स्थितेः वर्णनमत्र विवेचितम्।

**3. रेचकप्राणायामः**– रेचकप्राणायामः तृतीयप्रकारको भवति। नाभिस्थानात् कुम्भकरूपात् स्तम्भितवायोः उपरीकरणं तथा बाह्यक्षेपीकरणमेव रेचकप्राणायामः भवति। प्राणायामोऽयं षोढ़ा विभज्यते। तस्य विवेचनं तु अत्यधिकं गृह्यतमं भवति। यथोक्तम् –

**रेचकः पूर्ववज्ज्ञेयो द्विधाभूतः षडात्मकः।**
**स्थानसंस्तम्भितो वायुस्तस्मादुत्कृष्य नीयते॥**[2]

अनेन प्रकारेण रेचकप्राणायामस्य सरलतया वर्णनमत्र प्रतिपादितम्।

**4. उत्कर्षकप्राणायामः** – उत्कर्षे प्राणायामे कुम्भितप्राणवायोः अपानानन्तरं नासिक्यद्वादशान्तामाकेन्द्रे प्रेषणस्य व्यापारः भवति। अस्मात् कारणात् एव एष उत्कर्षक-प्राणायामः विद्यते। श्रीमालिनीविजयोत्तरतन्त्रेऽपि लिखितम् –

**योऽन्यप्रदेशसंप्राप्त्यै स उत्कर्षक इष्यते।**
**तस्मादपि पुनः स्थानं यतो नीतस्तदाहृतः॥**[3]

अनेन प्रकारेण उत्कर्षकप्राणायामः सिद्धो भवति।

**5. अपर्षकप्राणायामः** – अपकर्षप्राणायामे उत्कर्षप्राणायामस्य विपरीतास्थितिः भवति। अस्मिन् प्राणायामे कुम्भात् वायोः नाभिकेन्द्रं प्रति व्यापारः जायते। तदा अपकर्षप्राणायामः सिद्धो भवति। यथोक्तम् –

---

1. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 6-7
2. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 8
3. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 9

**अपकर्षकः इत्युक्तो द्वावप्येतावनेकधा।**
**एषामभ्यसनं कुर्यात्पद्मकाद्यासनस्थितः॥[1]**

अनेन प्रकारेण एकमेव वारं कृतः प्राणायामः अधमकोटिकः भवति। मध्यमकोटिकः प्राणायामः उद्घातश्रेणीयुक्तो भवति तथा च त्रिरुद्धातप्राणायामः ज्येष्ठकोटिकः समस्तसिद्धिप्रदायको भवति। प्राणायामोऽयं द्वादशमात्रासमन्वितः भवति। यथोक्तम् -

**अधमः सकृदुद्धातो मध्यमः सिद्धिदो मतः।**
**ज्येष्ठः स्याद्यस्तिरुद्धातः स च द्वादशमात्रकः॥[2]**

अनेन प्रकारेण श्रीमालिनीविजयोत्तरतन्त्रे प्राणायामस्य सन्दर्भे सरलतापूर्वकं वर्णनं विवेचितम्। सन्दर्भेऽस्मिन् अत्र प्राणवायोः सञ्चरणस्य अभ्यासः सर्वाधिको महत्त्वपूर्णो वर्तते। योगसाधनायां प्राणायामस्य प्रकाराणां ज्ञानं साधकानां कृते साधनामार्गं प्रदर्शयन्ति। साधकाः योगस्य सर्वेषां प्राणायामप्रकाराणां निरन्तरम् अभ्यासं कुर्वन्ति। अनेन अभ्यासेन ते शिवशक्त्योः सायुज्यं प्राप्नुवन्ति। अत्रैव प्राणायामस्य सन्दर्भे चतुर्विधधारणानामपि वर्णनं प्रतिपादितम्। साधनावस्थायां प्राणायामस्य सिद्धेः करणार्थं धारणानामपि महती भूमिका भवति। धारणा योगसाधनायां महत्या भूमिकायाः निर्वहनं करोति। श्रीमालिनी-विजयोत्तरतन्त्रे धारणानां सन्दर्भे लिखितम् -

**चतस्रो धारणा ज्ञेयाशिरव्यम्ब्वीशामृतात्मिका।**
**यद्यत्र चिन्तयेद्द्रव्यं तत्तत्सर्वगतं स्मरेत्॥[3]**

एतासु धारणासु शिखीधारणा, अम्बुधारणा, ईशधारणा तथा च अमृतधाराणा गणिता भवति। तत्रापि ईशानीधारणा बिन्दुनादस्य धारणा वर्तते। अस्याः धारणायाः सिद्धेः अनन्तरं योगी शुद्धविद्यायां प्रवेशं करोति। अस्मात् कारणात् एषा ईशानीधारणा वर्तते।[4] योगसाधनायां योगी धारणानामाधारेण योगमार्गस्य पथि अवस्थितो भूत्वा हेयोपादेयविज्ञानस्य विज्ञः भवति। अनेन ज्ञानेन सः अनुत्तरपदस्य अधिकारी भवति।[5]

अन्ते च शिवः स्वयमेव कथयति यत्-योगयुक्तात्मसाधकस्य प्रथमं कर्त्तव्यं वर्तते यत् एतेषां योगसाध्यपदानां वा सोपानानां निरन्तरतया अभ्यासं कुर्यात्।

---

1. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 10
2. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 11
3. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 14
4. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 15
5. श्रीमालिनीविजयोत्तरतन्त्रम्, सप्तदशोऽधिकारः, श्लोकसंख्या, 16

**उपसंहारः ( Conclusion ):**- अन्ते च स्वयमेव स्पष्टं भवति यत् श्रीमालिनी-विजयोत्तरतन्त्रस्य सप्तदशेऽधिकारे योगस्य संदर्भे प्राणायामस्य विस्तारपूर्वकं वर्णनं प्रतिपादितम्। योगस्य सिद्धेः प्राणायामस्य सर्वाधिकं महत्त्वं भवति। प्राणायामोऽयं योगसाधनायाः प्रथमं तत्त्वं वर्तते। अस्य सिद्धेः अनन्तरं शैवसाधकाः योगस्य सोपानानुसारेण योगसाधनां कुर्वन्ति। अतः श्रीमालिनीविजयोत्तरतन्त्रस्य अध्ययनं साधकानां कृते श्रेयस्करो भवति।

**सन्दर्भ ग्रन्थसूची ( Bibliography )**


1. **मालिनीविजयोरत्ततन्त्रम्** : परमहंसमिश्रः, हिन्दी-टीका-सहितम्, चौखम्बा संस्कृत-प्रतिष्ठानम्, दिल्ली।
2. *नेत्रतन्त्रम्,* क्षेमराजकृतः, (नेत्रोद्योत-संस्कृत) श्रीराधेश्याम-चतुर्वेदिकृतम्, ज्ञानवती हिन्दी टीका सहित, चौखम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली।
3. *विज्ञानभैरवम्* : श्रीक्षेमराजाचार्य विरचितं विवृतिभागोत्तरं श्री शिविपाध्याय विरचितम्, श्रीबापूपाल-आँजनाविरचितं कारिकानुवाद-विवृतभागस्थ-हिन्दी व्याख्यासहितम्, चौखम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली।
5. *तन्त्रालोकः* अभिनवगुप्तः, भाग-1-2, राजानकः जयरथकृतम्-विवेक-व्याख्यासहितः, मिश्रः, परमहंसः, (हिन्दीभाष्यसहितम्), वाराणसी, सम्पूर्णानन्द-संस्कृविश्वविद्यालयः, 1922-23
5. प्रत्यभिज्ञाहृदयम् : क्षेमराजः, सिंहः, जयदेवः (सम्पादकः) : मोतीलाल-बनारसीदासः, दिल्ली-1963
6. काश्मीर शिवाद्वयवाद की मूल अवधारणाएँ, रस्तोगी, नवजीवन, मुंशीराम मनोहरलाल पब्लिकेशन्स, नई दिल्ली, प्रथम संस्करण-2002


✦✦✦

 ISSN : 7552-2779

# शङ्कराचार्याभिमतं समाधिस्वरूपविवेचनम्

## ( पञ्चीकरणग्रन्थालोके )

**मानसी** *

वेदान्तशास्त्रपरम्परायां विविधाचार्यैः स्व-स्वदर्शनानुरूपं अद्वैततत्त्वानुसन्धानार्थं जपभक्तिध्यानसमाधीत्यादयः नैकाः उपायाः प्रदर्शिताः। शङ्कराचार्येण ब्रह्मवस्तुनः विवेचनार्थं जीवब्रह्मणोः परस्परम् ऐक्यसम्पादनार्थञ्च 'ब्रह्मसत्यं जगन्मिथ्या' इति सिद्धान्तं प्रतिपादितम्। अर्थात् ब्रह्म एव केवलं त्रैकालिकं सत्यम् एतच्च दृश्यमानमखिलं संसारम् असत्यरूपेण प्रतिभासते। सांसारिकाः प्राणिनः कर्मफलभोगार्थमुपाधिभूतशरीरे प्रविश्य भौतिकजगति आविर्भूत्वा अज्ञानवशाद् ब्रह्मणो नित्यशुद्धबुद्धमुक्तसत्यस्वभावं विस्मृत्य अनात्मदेहेन्द्रियादिषु पञ्चभूतात्मकं जगदेव सत्यं (नित्यं) मन्यन्ते। प्रसङ्गेऽस्मिन् शङ्केयं भवति यद् जीवः स्वभावत एव सर्वदा मुक्तः सुखस्वरूपश्चास्ति तथा च ब्रह्मणस्तस्याभेदश्चेदुभयोर्मध्ये भेदप्रतीतेः कारणं किम्? अतो सृष्टेः कारणभूततत्त्वानुसन्धानाय शरीरोत्पत्तिसृष्टिप्रक्रिययोः ज्ञानमावश्यकम्। वस्तुत उपाधिभेदेन आत्मनि भेदस्य प्रतीतिरुत्पद्यते।[1] वस्तुतत्त्वस्य दर्शनार्थं भेदनिवृत्त्यर्थञ्च समाधिरेव समीचीनं साधनं वर्तते। अयं सिद्धान्तः विवेकचूडामणौ प्रतिपादितः आचार्यशङ्करेण। यतोहि सर्वे परमहंससंन्यासिनः समाधिविधिना एव परब्रह्मणः साक्षात्कारं कृतवन्तः। आद्यशङ्कराचार्यैः 'पञ्चीकरणम्' इति नामके प्रकरणग्रन्थारम्भे परमहंससंन्यासिनां समाधिविधेस्स्वरूपं समाधये च पञ्चीकरणस्य प्रक्रियायाः निरूपणं कृतम्। शोधपत्रेऽस्मिन् पञ्चीकरणविधेः विवेचनं न कृत्वा पञ्चीकरणस्यालोके समाधेः विवेचनं क्रियते।

### समाधेर्व्युत्पत्तिलभ्योऽर्थः

नैकाचार्यैः विविधेषु ग्रन्थेषु ध्यानप्रक्रियायाः साधनावलम्बनरूपे समाधेस्स्वरूपं परिभाषितम् अङ्गीकृतञ्च। शाब्दिकदृष्ट्या समाधिपदस्य निर्वचनम्- 'समाधीयतेऽस्मिन्निति

---

* शोधच्छात्रा, संस्कृतप्राच्यविद्याध्ययनसंस्थानम्
जवाहरलानेहरूविश्वविद्यालयः, नवदेहली

1. उपाधिभेदात्स्वयमेव भिद्यते चोपाध्यपोहे स्वयमेव केवलः।
तस्मादुपाधेर्विलयाय विद्वान् वसेत्सदाकल्पसमाधिनिष्ठया।। विवेकचूडामणिः 358

समाधिः' अर्थात् धियः समत्वस्थितिः ब्रह्मणि चित्तस्य अवस्थानं वा समाधिः। यस्यामवस्थायां जीवः सांसारिकबाह्यपदार्थेभ्यः चित्तम् उन्मुखीकृत्य (शास्त्रनिषिद्धबहिर्मुखीवृत्तीन् अन्तर्मुखीन् कृत्वा), योगाङ्गानि अनुसृत्य साधनचतुष्टयसम्पन्नो भूत्वा च ध्येयवस्तुनः सततरूपेण ज्ञातुं ध्यानवस्थायां लीनो भवति। अतएव मोक्षभावप्रदायिनी प्रकर्षध्यानयुता चित्तस्य सर्वोत्कृष्टावस्था एव समाधिः। श्रीमद्भगवद्गीतायाः शाङ्करभाष्ये समाधिपदस्य व्युत्पत्तिलभ्यौ अर्थौ द्वौ प्राप्येते। प्रथमव्युत्पत्त्यनुसारेण **"समाधीयते अस्मिन् पुरुषोपभोगाय सर्वम् इति समाधिः"**[1] अर्थात् समाधिः नाम अन्तःकरणम्। द्वितीयव्युत्पत्त्यनुसारेण **"समाधीयते चित्तमस्मिन् इति समाधिः"**[2] एतद्व्युत्पत्त्यनुसारम् आत्मनः नाम समाधिः।

पातञ्जलदर्शने महर्षिपतञ्जलिना द्विप्रकारकसमाधेः सम्प्रज्ञातासम्प्रज्ञातरूपेण स्वरूपं प्रतिपादितम्। एतौ एव समाधियोगसञ्ज्ञया विभूषितौ यतोहि पाणिनीयव्याकरणानुसारेण व्युत्पत्तिदृष्ट्या योगपदस्यार्थः 'युज् समाधौ' इति धातुना समाधिरर्थः सिद्ध्यति। अत एव योगसूत्रभाष्यकारेण प्रख्यापितम्- **"योगः समाधिः। स च सार्वभौमः चित्तस्य धर्मः"**[3] अर्थात् समाधेरर्थश्चित्तवृत्तिनिरोधः वर्तते। योगपदस्य गौणोऽर्थः एकाग्रताऽस्ति। समाधौ चित्तस्य सर्ववृत्तिनिरोधत्वात् (स्वस्वरूपशून्यत्वात्) अखण्डगोचरानन्दैकरसरूपस्य ध्येयतत्त्वस्य प्रतीतिरेव समाधिः।[4] पातञ्जलयोगदर्शने चित्तभूमिदृष्ट्या समाधेः भेदोपभेदाः प्राप्यन्ते। एतेषां क्षिप्त-मूढ-विक्षिप्त-एकाग्र-निरूद्धनामकचित्तभूमीनाम् अवस्थाविशेषेण नैकाः समाधयः भवन्ति, येषां सविस्तरं विवेचनं व्यासेन निजयोगसूत्रभाष्ये वर्णितम्। साधनादृष्ट्या सर्वेऽपि समाधिभेदाः योगसञ्ज्ञया कथयितुं न शक्यन्ते यतोहि क्षिप्त-मूढ-विक्षिप्तभूमीनां रजतमोगुणयोः आधिक्येन वा कदाचित् सत्त्वगुणस्याधिक्येनापि रजोगुण-स्यातिशये सति चित्तवृत्तीनां निग्रहणं मुहुर्मुहुर्खण्डितं भूत्वाल्पकालाय एव तिष्ठति। प्रसङ्गेऽस्मिन् सूत्रकारभाष्यकारयोः मते सम्प्रज्ञातासम्प्रज्ञातसमाधी एव योगसञ्ज्ञया कथयितुं शक्यते।

### पञ्चीकरणग्रन्थे समाधिस्वरूपम्

अद्वैतसिद्धान्तेषु समन्वितं पञ्चीकरणप्रकरणग्रन्थेऽत्यन्तसङ्क्षिप्ततया समाधिपरिभाषा उल्लिखिता- **"अकार उकारे, उकारो मकारे, मकार ॐकारे, ॐकारोऽहम्येव। अहमात्मा साक्षी केवलश्चिन्मात्रस्वरूपः, नाज्ञानं, नापि तत्कार्यं, किन्तु**

1. श्रीमद्भगवद्गीतशाङ्करभाष्यम् 2.44
2. श्रीमद्भगवद्गीतशाङ्करभाष्यम् 2.53
3. योगसूत्रव्यासभाष्यम् 1.1
4. तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः। योगसूत्रः 3.3

**नित्यशुद्धबुद्धमुक्तसत्यस्वभावं परमानन्दाद्वयं प्रत्यग्भूतचैतन्यं ब्रह्मैवाहमस्मीत्यभेदेनावस्थानं समाधिः।"**[1]

अर्थात् अकारस्य लयः उकारे, उकारस्य मकारे, मकारस्य ओङ्कारे, ओङ्कारस्य च अहमिति पदे लयः भवति। अयमात्मा सर्वाधिष्ठानरूपः स्वप्रकाशरूपोऽस्ति अर्थाद् अयमात्मा अज्ञानरूपो न वर्तते, न च अज्ञानजनितकार्यभूतसंसाररूपोऽस्ति। अहम् इति पदेनाख्यम् अस्मत्प्रतीतिविषयत्वाद् अयमात्मा जन्ममरणाविद्यादिरहितो ज्ञानरूपोऽविद्यासम्बन्धविहीनः सत्यस्वभावयुक्तो निरतिशयानन्दरूपः अद्वयः सर्वेषां प्राणिनां हृदयेषु अधिष्ठातृरूपः वर्तते। उक्तब्रह्मबोधकवाक्यानां मननेन ब्रह्माकाराकारितचित्तस्याखण्डवृत्तिना ब्रह्मबोधोपलब्धिः भवति। ग्रन्थकारेण पञ्चीकरणे पञ्चीकरणप्रक्रियान्तर्गतस्थूलसूक्ष्मभूतानामारोहावरोहक्रमेण विलयं विज्ञाप्य जगतः मिथ्यात्वं ब्रह्मणः अभेदस्वरूपञ्च विवेचितमस्ति। 'ब्रह्मैवाहमस्मि' इति प्रकारेण प्रकर्षध्यानावस्थायां योगिनां तादात्म्यसम्बन्धावच्छिन्नाभेदज्ञाननिष्ठस्थितिः समाधिः। आचार्यनृसिंहसरस्वतिमतानुसारं व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावे सति चित्तस्यैकाग्रतापरिणामः समाधिः।[2]

**समाधिभेदः**

वेदान्तदर्शने तत्त्वानुसन्धानाय योगदर्शने च चित्तवृत्तिनिरोधाय मार्गः प्रशस्तः। तत्र प्राधान्येन चित्तवृत्तिनिरोधमार्गो व्याख्यातः। चित्तवृत्तिनिरोधाय समाधिर्द्विविधः प्रोक्तः- सम्प्रज्ञातासम्प्रज्ञातसमाधिश्च। एतयोरेव अपरनामनि सविकल्पः निर्विकल्पश्चेति। पञ्चीकरणस्य टीकाकारैः अप्येतयोः समाध्योः स्वोपटीकासु वर्णनं कृतम्। 'पञ्चीकरणम्' प्रकरणग्रन्थे सृष्ट्योत्पत्तिप्रलयक्रमान् निरूपयन् साधनचतुष्टयसम्पन्नसाधकेभ्यः प्रणवमाध्यमेन आत्मानुसन्धानविधेरपि वर्णनं कृतवान् एतल्लेखकः। श्रवणमनननिदिध्यासनप्रयोगेऽपि संशयशून्यज्ञानानुत्पत्तौ परमहंससंन्यासिभ्यः समाधिरावश्यको वर्तते। श्रुतिप्रामाण्यमनुसरन् आचार्यशङ्करः उपर्युक्तसमाधिलक्षणे एतदर्थमेव प्रणवं समाधिभूतध्यानप्रक्रियाया आलम्बनत्वेन कथयति। समाधेर्विधानं श्वेताश्वतरोपनिषदः ऋषिणा अपि कृतम्। परमात्मध्यानेन, तस्मिन् मनोयोगेन च विश्वरूपाज्ञानस्य निवृत्तिर्भवति।[3] एतत्कारणेन एव श्रीमद्भगवद्गीतायामप्युक्तम्- **'ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्।'**[4] अर्थात् अत्रापि समाधिस्वरूपं विवेच्यते यत् ज्ञानज्ञेयज्ञातारः एकत्रीभूत्वा तस्य हृदये एव तिष्ठन्ति। एतत् सर्वं वीक्ष्यैव

1. पञ्चीकरणम्, पृ. 3-4
2. वेदान्तसारः (सुबोधिनीटीकया)
3. तस्याभिध्यानाद्योजनात्तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्तिः। श्वेताश्वतरोपनिषद् 1.10
4. श्रीमद्भगवद्गीता 13.17

पञ्चीकरणग्रन्थस्य टीकाकारैः स्वोपटीकासु मूलविषयं केन्द्रे स्थापयित्वा एव समाधेर्भेदौ विवेचितौ।

**सम्प्रज्ञातसमाधिः**

पञ्चीकरणविवरणकारमते प्रणववाचकध्येयतत्त्वस्य विशिष्टतया ध्यानमय-साक्षात्कारकरणाद् एव चित्तवृत्तयः ब्रह्मवृत्तिमयप्रवाहसंयुक्ताः भूत्वा एकस्यां यस्याम् अवस्थायां स्थिरीभूतानि भवन्ति, सा अवस्था सम्प्रज्ञातसमाधिरिति।[1] सविकल्पसमाधौ ज्ञेयज्ञात्योः ज्ञानं पृथक्तया भवति। तयोः भेदयोः लयभावमनपेक्ष्य ध्येयवस्तुनः आकारधारकचित्तवृत्तेः अद्वितीयवस्तुनि (ब्रह्मणि) स्थिरीकरणमेव सविकल्पकसमाधिस्थितिः भवति। अस्मिन् समाधौ साधकस्य मनः ज्ञाता, ज्ञेयं च आत्मवस्तुरूपेण जायते। अनयोश्च ज्ञानप्रक्रियालयप्रवाहः पुनरपि सततं प्रवहति। एतस्यामवस्थायां साधकः ब्रह्मणः साक्षात्कारप्रक्रियायां स्थूलमार्गेण सूक्ष्ममार्गं प्रति गच्छति, एतां प्रक्रियामनुसरतः तस्य साधकस्य यत्किञ्चिद् ज्ञानबाधकद्वैतवस्तुप्रतीतौ सत्यपि यत्किञ्चिद् अद्वैततत्त्वम् अपि प्रकाशते। ध्यानाभ्यासाधिक्येन अहङ्कारशून्यभावेन च ब्रह्माकाराकारितमनोवृत्तेः प्रवाहः सम्प्रज्ञातसमाधिः इति मुक्तिकोपनिषत्प्रामाण्यम्।[2] यथा कश्चिकर्गजेन पुष्पं निर्माय गृहशोभायै तस्य प्रयोगः क्रियते। किन्तु द्रष्टा जानाति यत् एतत् कर्गजनिर्मितं पुष्पम्, न तु यथार्थं पुष्पम्। किन्तु तस्य ज्ञाने तस्मिन् पुष्पत्वभानेऽपि पुष्पस्य मिथ्यात्वस्य एव निश्चयः बुध्यते। तथैव 'अहं ब्रह्मास्मि' बोधवाक्यबुद्धमयीब्रह्माकारा-कारितचित्तवृत्तौ कागदनिर्मितपुष्पवद् ज्ञातृ-ज्ञान-ज्ञेयरूपित्रिपुट्याः भाने तत्र अद्वैतवस्तुनः अपि सत्यता प्रतिभासते। जीवब्रह्मणोः नित्यां शाश्वतीम् अभिन्नतां सम्प्रज्ञातुं योगमार्गः श्रुतिभिः निर्दिष्टः, सः सम्प्रज्ञातसमाधिमार्गः एव।[3]

पञ्चीकरणचन्द्रिकायां टीकाकारः आचार्यगङ्गाधरः निदिध्यासनस्वरूपं स्पष्टयन् समाधिस्वरूपं विशदीकरोति। तत्रैव सम्प्रज्ञातसमाधिं द्विविधम् अपि कथयति- दृश्यानुविद्ध[4]

---

1. प्रणवस्वरूपार्थानुसन्धानपुरःसरं एकरसवस्तुमात्रत्वेन चित्तस्य तदाकारवृत्त्यवस्थानं सम्प्रज्ञात-समाधिरित्युच्यते। पञ्चीकरणम् (विवरणव्याख्यया), पृष्ठसङ्ख्या 168
2. ब्रह्माकारमनोवृत्तिर्प्रवाहोऽहंकृतिं विना।
   सम्प्रज्ञातसमाधिः स्यात् ध्यानाभ्यासप्रकर्षतः।। मुक्तिकोपनिषद् 2.53
3. अथ जीवब्रह्मणोर्मिथो व्यतिहारेणैकरसस्वरूपवाक्यार्थप्रतिपत्त्यर्थं साधनभूतं समाधिं सङ्गिरते। पञ्चीकरणम् (विवरणव्याख्यया), पृष्ठसङ्ख्या 168
4. यदैकान्ते यमनियमादिबहिरङ्गसम्पन्नो विवेकी सेन्द्रियस्य चित्तस्याखण्डैकरसे लक्ष्ये धारणां कृत्वा ध्यानारम्भं करोति। तदान्तिमं तदेव घटिकादिदीर्घकालं प्रयत्नपूर्वकं कृतं सद्दृश्यानुविद्धं तदेव परिपक्वं सत्समाधिश्च भवतीति ज्ञेयम्। पञ्चीकरणम् (तत्त्वचन्द्रिकया), पृ.स. 217

शब्दानुविद्धञ्च।[1]

यस्याम् अवस्थायां साधकाः चित्तवृत्तिनिरोधाय सततं प्रयत्नं कुर्वन्ति। अभ्यासकाले चित्तमेकाग्रकरणार्थं चिन्तयन्ति, क्रोधलोभमोहमात्सर्यादिविकारसम्बन्धिताः सर्वाः वृत्तयः जडदृश्यरूपास्सन्ति, जीवात्मा चित्तवृत्तीनां साक्षिचेतनतत्त्वः इति। अर्थात् नाऽहं कर्ता, नाऽहं भोक्तेत्यादिभावनाभिः तासां सर्वासां वृत्तीनां मिथ्यात्वं विज्ञाय साक्षिस्वरूपचैतन्यं यथार्थवस्तुरूपेण बुद्ध्वा जीवात्मा अहमेव द्रष्टा इत्येव अभ्यस्येत। एवम्प्रकारेण अभ्यासपरिपाकेन स्थिरस्य जीवात्मनः हृदये दृश्यपदार्थानां मिथ्यात्वनिश्चयात् स्वप्रकाश-स्वरूपचिदात्मा प्रकाशते। एतत्परिणामेव अस्मिन् समाधौ नामरूपात्मकबाह्यजागतिकपदार्थानां विलीने सत्यपि चित्तवृत्तिनिग्रहणं न भवति, यतोहि मनसि नैके विचाराः विचरन्ति। अयमेव साक्षिभावनिष्ठः समाधिः दृश्यानुविद्धः सविकल्पकः समाधिः कथ्यते वेदान्तबुधैः।[2]

साधकः यस्याम् अवस्थायामभ्यासाय 'नित्यब्रह्माभिन्नो पापरहितो ज्ञानस्वरूपो संसारबन्धनशून्योऽद्वयब्रह्मैवाहमस्मि' इति शास्त्रप्रतिपादितलक्षणाभावनया विवेकीभूत्वा चित्तवृत्तिनिग्रहणाय स्थिरीकरणाय च मनः आत्मनि संयोजयति। एतद्भावनापरिपक्वाभ्यासेन एव चित्तवृत्तीनाम् आत्मनि विलीने सति सहजमेव निर्विकल्पकसमाधिर्सिद्ध्यति। अत एव ध्येयतत्त्वमधिकृत्य स्वरूपं प्रति प्रकर्षज्ञानं प्राप्य चित्तं स्थिरीकृत्य च स्थिरीकरणस्य भावः शब्दानुविद्धः सविकल्पकसमाधिः बुध्यते।[3] पञ्चीकरणवार्तिके सुरेश्वराचार्यैः अपि सूत्ररूपेणोपरोक्तप्रकारद्वयं निरूपितम्-

**चिदात्माऽहं नित्यशुद्धबुद्धमुक्तसदद्वयः।**
**परमानन्दसंदोहवासुदेवोऽहमोमिति।**
**ज्ञात्वा विवेचकं चित्तं तत्साक्षिणी विलापयेत्॥**[4]

योगसूत्रकारमते चित्तस्य एकाग्रभूमौ सम्प्रज्ञातसमाधिः सिद्ध्यति। त्रिगुणात्मकप्रकृतेः कार्यत्वात्चित्तं त्रिगुणात्मकम्। अत्र तामसिकराजसिकगुणवद्वृत्तीनाम् अभिभूते सति

---

1. एवं पुनः पुनरभ्यस्यमाना ब्रह्मविद्याख्याऽखण्डकारा चित्तवृत्तिः सत्त्वोत्कर्षतारतम्यवशादचला सूक्ष्मा शुद्धा च सती प्रमाण प्रमेयगतासम्भावनाविपरीतभावनादिब्रह्मसाक्षात्कारप्रतिबन्धकानि निराकृत्य दग्धेन्धनाग्निवत्स्वयमपि समूलप्रपञ्चमुच्छिद्य चिन्मात्रा सती नष्टा भवति। पञ्चीकरणम् (तत्त्वचन्द्रिकया), पृष्ठसङ्ख्या 217
2. कामाद्याश्चित्तगा दृश्याः तत्साक्षित्वेन चेतनम्।
ध्यायेद् दृश्यानुविद्धोऽयं समाधिः सविकल्पकः॥ दृग्दृश्यविवेकः 24
3. असङ्गः सच्चिदानन्दः स्वप्रभो द्वैतवर्जितः।
अस्मीति शब्दविद्धोऽयं समाधिः सविकल्पकः॥ दृग्दृश्यविवेकः 25
4. पञ्चीकरणम् (वार्तिके) 50-51

सत्त्वगुणवृत्तिप्राधान्यत्वम् उदेति। तस्मादेव अस्मिन् समाधौ अविद्यादिक्लेशानां प्रशमनेन क्रियमाणसञ्चितकर्मफलजन्यसंस्कारा: अपि नश्यन्ति। बुद्धौ च स्थितमज्ञानं नष्ट्वा ध्येयतत्त्वस्यापि प्रकाशनञ्च इहैव भवति।[1] अतश्चित्तस्य एकाग्रभूमौ सर्ववृत्तीनां निरोधो न भूत्वा सत्त्ववृत्तेरुदयो भवति यो हि ध्येयतत्त्वं प्रति प्रेरयति।

**असम्प्रज्ञातसमाधि:**

यद्यपि सविकल्पकसमाधौ ज्ञातृज्ञेयभेद: तिष्ठति यतोहि ज्ञातारं विना ज्ञेयसिद्धि: न सम्भवति। अपितु निर्विकल्पसमाधौ ज्ञातृज्ञानज्ञेयरूपत्रिपुटगतभेद: पूर्णत: लीनो भवति।[2] अयं समाधि: ज्ञातुरखण्डाकाराकारितचित्तवृत्ते: ध्येयतत्त्वेन सह आत्यन्तिकाभेदं कुरुते। एतस्यामवस्थायां चित्तस्य ब्रह्मणि विलीने चित्तवृत्तेरपि ब्रह्मणि एव लीनो भवति। चित्तवृत्तय: शब्दस्पर्शरूपरसगन्धनिष्ठसंस्कारान् गृह्णन्ति। चित्तवृत्तीनां निरोधे एव ज्ञातु: पृथग्भावं न भासते यतोहि ज्ञातुरभावे चित्तवृत्तेरस्तित्वाभावोऽपि लक्ष्यते। ब्रह्मप्रकाश: एव सर्वत्र प्रकाशते।[3] चित्तं स्वकारणभूतप्रकृतौ लीनो भूत्वा चौतन्यमयं भवति। यथा लवणमिश्रितसलिले तदाकाराकारितलवणस्यास्तित्त्वे सत्यपि जलमात्रमेव भासते, तथा ब्रह्माकाराकारितचित्तवृत्तेरस्तित्त्वे सत्यपि चित्तवृत्तिप्रतीतिर्न भवति, ब्रह्ममात्रमेव भासते। अस्मिन् समाधौ चित्तस्य निरुद्धभूम्या: बीजरूपसंस्कारा: सम्पूर्णतया प्रणश्यन्ति। एतदर्थं पञ्चीकरणटीकायां असम्प्रज्ञातसमाधिस्वरूपं प्रदर्शनाय श्लोक: प्राप्यते-

**मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थिति:।**
**योऽसम्प्रज्ञातनामाऽसौ समाधिरभिधीयते।।**[4]

**सुषुप्त्यवस्थासम्प्रज्ञातसमाधिगतभेद:**

असम्प्रज्ञातसमाधौ ब्रह्मैव प्रकाशते, ज्ञातृज्ञानज्ञेयगतभेदो न भासते। यदा अस्यामवस्थायां चित्तवृत्तय: (ज्ञातृ-ज्ञान-ज्ञेयगतविभागा:) सम्पूर्णतया निगृहीता: भवन्ति, तदा तस्यां

---

1. यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति, क्षिणोति च क्लेशान्, कर्मबन्धनानि श्लथयति, निरोधमभिमुखं करोति, स सम्प्रज्ञातो योग इत्याख्यायते। स च वितर्कानुगतो, विचारानुगत, आनन्दानुगतोऽस्मितानुगत इत्युपरिष्टात् प्रवेदयिष्याम:। योगसूत्रव्यासभाष्यम् 1.1
2. निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम्। वेदान्तसार: (समाधिनिरूपणम्)
3. वृत्तिमपि तन्मात्रत्वेनोपसंहृत्यवृत्तिमतश्चित्तस्य प्रयत्नपूर्वकं वस्तुमात्रत्वेनावस्थानमसम्प्रज्ञातसमाधि:। पञ्चीकरणम् (विवरणव्याख्यया), पृष्ठसङ्ख्या 169
4. पञ्चीकरणम्, पृष्ठसङ्ख्या 169

स्थितौ सुषुप्त्यवस्थायां निर्विकल्पसमाधौ च अभेदभानं भवति। एतत्कारणेन उभयोर्मध्येऽभेदस्य आशङ्का जायते यतोहि उभयो: स्थित्यो: चित्तवृत्ते अज्ञानं न तिष्ठति। सुषुप्त्यवस्थायां चित्तावस्थिति: कार्यकारणसम्बन्धेन स्वकारणभूताज्ञानरूपेण लीयते। तस्मात् सुषुप्तौ अज्ञानकारणेन चित्तवृत्तीनां बोधो न भवति। चित्तस्य स्वकार्यकारणसम्बन्धराहित्येन वस्तुमात्रत्वात् ब्रह्माकाराकारितसंस्कारत्वाद् असम्प्रज्ञातसमाधि: साधनरूपेण स्वीक्रियते। अस्मिन् समाधौ चित्तवृत्तिनिरोध: जायते, तासां वृत्तीनां प्रतीतिर्न भवति किन्तु वृत्तिबोधस्थितिज्ञानं तु तिष्ठत्येव।[1] विद्यारण्यस्वामिना एतत्तथ्यं परिपुष्टं यत् समाधिसमये तु ब्रह्माकाराकारितवृत्तीनां भानं न भवति परञ्च समाधे: व्युत्थानकाले 'अहं तावत्कालपर्यन्तं समाधौ स्थित:' इति स्मृत्या वृत्तीनाम् अस्तित्त्वम् अनुमीयते।[2] सम्प्रज्ञातासम्प्रज्ञातसमाध्यो: अखण्डब्रह्मसाक्षात्काराय असम्प्रज्ञातसमाधि: सुनिश्चित:। यतोहि समाधेरन्यास्ववस्थासु चित्तवृत्ते: चाञ्चल्यस्वभावेन अन्योन्यप्रतीतीनामपि मेलनं भवति।

**असम्प्रज्ञातसमाधेर्विघ्ना:**

न केवलं योगदर्शने अपितु वेदान्तदर्शनेऽपि उल्लेखं प्राप्यते यदात्मानुसन्धानं तु असम्प्रज्ञातसमाधौ भवति किन्तु अस्य समाधेरभ्यासकालेऽनेका आन्तरिकविघ्ना: उत्पद्यन्ते। यदा समाधिकाले साधक: चित्तेन प्रमादवशात् मध्ये मध्ये विषयास्वादनेन ब्रह्मावलम्बनं कर्तुं न शक्यते। तदा तस्य मार्गेऽविद्यास्मितारागादिक्लेशा: आयान्ति। ते क्लेशा एव विघ्ना: ये साधकचित्तमस्थिरं कुर्वन्ति। एतदर्थं सुरेश्वराचार्यैरप्युक्तम्-

**चिदात्मनि विलीनं चेच्चित्तं नैवं विचालयेत्।**
**पूर्णबोधात्मनाऽऽसीत् पूर्णाचलसमुद्रवत्।।**[3]

अर्थाच्चित्तवृत्तीनां ब्रह्मलीने जाते सति कामादिविषयाणामास्वादनेन चित्तमस्थैर्यं न कुर्यात्। अस्यामवस्थायां जलधिसदृशं चित्तं शान्तं, स्थिरं च स्थाप्येत। यतोहि चित्तवृत्तीनां ब्रह्मविलीने सति मनस: सूक्ष्मवृत्त्या शब्दस्पर्शरूपरसगन्धसूक्ष्मविषयाणामास्वादनेन अनेके विघ्ना उत्पद्यन्ते। एते विघ्ना: हठात् चित्तस्य स्वभावं हरन्ति। शङ्कराचार्यै: समाधेऽभ्यास-समये उत्पन्नविघ्नेषु अनुसन्धानराहित्यालस्य भोगवासनातमोलयविक्षेपकषायशून्यतेत्यादीनां

---

1. लीयते हि सुषुप्ते तन्निगृहीतं न लीयते।
   तदेव निर्भयं ब्रह्म ज्ञानालोकं समन्तत:।। माण्डूक्यकारिका 3.35
2. वृत्त्ययस्तु तदानीमज्ञाता अप्यात्मगोचरा:।
   स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थितात्।। पञ्चदशी 1.53
3. पञ्चीकरणम् (वार्तिके) 52

प्रमुखतया नामानि प्रदत्तानि।[1] वेदान्तसारे समाधिविघ्नाः चतुर्भागेषु विभक्ताः। तेषां नामानि लयविक्षेपकषायरसास्वादनानीति। एतेषु विघ्नेषु यदा चित्तं बाह्यर्थान् न गृह्णाति, न च ध्येयतत्त्वं प्रमादत्वात्गृह्णाति, तदा स लयनामकः विघ्नः बोध्यः। प्रमादरहितानासक्तचित्तं वस्तुतत्त्वग्रहणाय तत्परो भूत्वापि तत्त्वग्रहणेऽसमर्थं भवति विषयास्वादनात्, विक्षेपनामक-विघ्नोऽसौ कथ्यते। लयविक्षेपाभ्यामुन्मुक्तसाधकचित्तस्य जन्मजन्मान्तरसंस्कारकारणैः ब्रह्मालक्ष्यीकृत्य भोगप्रवृत्तिः कषायविघ्नः। कषायावस्थामुक्तचित्तेन निर्विकल्पसमाधौ सविकल्पसमाधेः रसास्वादनमेव रसास्वादननामकविघ्नः। विघ्नान् इमान् दूरीकरणाय अभ्यासवैराग्योपायः चित्तं च स्थिरीकरणाय प्रोक्तः। निवातस्थदीपवत् सर्वविकारशून्य-चित्तस्थितिः, ब्रह्माकारवृत्त्या पूर्णवृत्तिनिरोधज्ञानम् एव समाधिः।[2] ब्रह्माकारवृत्त्या विषया-काराकारितवृत्तीनां विनाशे सति अखण्डब्रह्मणः साक्षात्कारो भवति ततश्च ब्रह्मवृत्तीनामपि निरोधः इति। यथोक्तम् 'सर्ववृत्तिनिरोधे त्वसम्प्रज्ञातः समाधिः।'[3]

### समाधेरुपयोगिता

शाङ्करवेदान्ते समाधिः ब्रह्मबोधाय सर्वोत्कृष्टतमं साधनं वर्तते इति श्रुत्यनुसारं **'सन्धिं समाधावात्मन्याचरेत्।'**[4] तत्त्वसाक्षात्काराय समाधिकाले श्रद्धाभक्तिजितेन्द्रिय-क्रोधजितादिगुणानाम् आवश्यकता भवति। समाधौ चित्तैकाग्रकरणाय वृत्तिनिरोधाय च बुद्धिस्थविकाराणां शोधनं प्रथमेव करणीयम्। यतोहि द्वैतप्रतीतेः कारणं बुद्धिकार्यं विद्यते। यथाऽग्निसंयोगेन लौहस्वर्णादिधातुना विविधरूपाणि धार्यन्ते तथा आत्मना संयुज्य बुद्धिरपि शब्दस्पर्शरूपरसगन्धविषयसम्बन्धेन विविधेषु विषयेषु प्रकाशिता भवति अर्थात् सर्वत्र द्वैतमेव भासते। ध्येयतत्त्वं प्रति निश्चयात्मिका बुद्धिः आवश्यकी। अस्मिन् प्रसङ्गे नारायणाचार्यः तत्त्वाभिलाषिपक्षतः एकां शङ्कां प्रस्तुतवान्। यत् व्यवहारिकसत्तायां द्वैतं प्रतीयते। सर्वेः प्राणिनः लोकव्यवहारे द्वैतभावेन प्रेरितो भूत्वा आचरणं कुर्वन्ति तर्हि कथं लौकिकक्रियाकलापं परित्यज्य सर्वदा तत्त्वनिष्ठसमाधिः कर्तुं शक्यते? अस्य

---

1. समाधौ क्रियमाणे तु विघ्ना आयान्ति वै बलात्।
   अनुसन्धानराहित्यमालस्यं भोगलालसम्।
   लयस्तमश्च विक्षेपो रसास्वादश्च शून्यता।
   एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः॥ अपरोक्षानुभूतिः 127-128
2. निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः।
   वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसञ्ज्ञकः॥ अपरोक्षानुभूतिः 124
3. योगसूत्रव्यासभाष्यम् 1.1
4. आरूण्योपनिषद् 2

समाधानमपि सुरेश्वराचार्यकृतवार्तिकमाध्यमेन प्रस्तुतवान् असौ, यत् भोगपदार्थानां सम्पादनार्थं साधनभूतद्रव्यस्य सङ्ग्रहे दुःखं जायते, तेषां वस्तूनां संरक्षणेऽपि दुःखानि प्राप्यन्ते। भोग्यवस्तुलाभान्ते यदि तानि संरक्षितानि अपि कृतानि चेत् तेषां द्रव्याणां नष्टे सति नैकदुःखानि पुरतः आयान्ति। ब्रह्मलोकप्राप्त्यर्थं सकामभावनया निष्पादितकर्माण्यपि विपरीतफलप्राप्तौ सति मनसि दुःखानि एव भवन्ति। लोकपरलोकसिद्धये विहितकर्माण्यपि दुःखकारणान्येव।

सारं गच्छामश्चेत् प्राप्नुमो यत्योगसूत्रभिमतानि यमनियमासनप्राणायामप्रत्याहार-धारणाध्यानसमाधयोऽसम्प्रज्ञातसमाधेरङ्गानि अद्वैतवेदान्तेऽपि स्वीकृतानि। अद्वैतवेदान्ताचार्यैः योगदर्शनस्य साधनप्रक्रिया एकस्वरेण स्वीकृता। तत्त्वानुसन्धानाय वैराग्यभावं दृढीकरणाय च कर्मफलभावनां परित्यज्य नित्यनिरतिशयपुरुषार्थसिद्ध्यर्थं सर्वदा ध्येयतत्त्वं चिन्तयन् समाधिविधिः पञ्चीकरणग्रन्थेऽभीष्टः।[1] आचार्यशङ्करवचसा अपि तदेव परिपुष्यति-

**अज्ञानहृदयग्रन्थेर्निःशेषविलयस्तदा।**
**समाधिना विकल्पेन यदाद्वैतात्मदर्शनम्।।**[2]

समाध्यन्ताङ्गानुष्ठानेन सञ्जातात्मसाक्षात्कारे सत्यज्ञानतत्कार्यं पूर्णतः परिसमाप्यते। प्रारब्धकर्मणां क्षयः, कर्मविपाकक्षये च सद्यः मोक्षभावः सिद्ध्यति।[3] अत एव शङ्कराचार्यैः पञ्चीकरणग्रन्थे वर्णितं पञ्चीकरणप्रक्रिया लययोगस्य प्रतिपादिका अस्ति। पञ्चीकरण-सिद्धान्तस्यानुशीलेन स्पष्टं ज्ञायते यत् मुमुक्षुवः ब्रह्मबोधाय गुरूपदिष्टतत्त्वमसीत्यादि-महावाक्येषु ईश्वरत्वजीवत्वसर्वज्ञत्वाल्पज्ञत्वरूपवाच्यर्थान् परित्यज्य लक्ष्यार्थस्य चैतन्याशं गृह्णेयुः। मायोपहितब्रह्मणा पञ्चीकृतापंचीकृततत्त्वानामुत्पत्तिं ज्ञात्वा प्रलये च ब्रह्मणि एव क्रमेण भूतानां पूर्वं पूर्वं विलयं कृत्वा सर्वं खल्विदं ब्रह्मेति सिद्धान्तं परिपोषयन् ओङ्कारमात्रासु आत्मनः अवस्थां ब्रह्मणः च चतुष्पादेषु अभेदं ज्ञात्वा समाधौ आत्मसाक्षात्कारं कुर्यात्। यतोहि शाङ्करवेदान्ते अन्तःकरणवृत्तीनां लयेन मोक्षं न भवति अपितु ब्रह्मभाव एव मोक्षः। इमे भावाः एव समाधिसन्दर्भे पञ्चीकरणग्रन्थमनुस्मरता टीकाकारेण शान्त्यानन्दसरस्वतिना अप्युल्लिखिताः-

1. आदिमध्यावसानेषु दुःखंसर्वमिदं यतः।
   तस्मात्सर्वं परित्यज्य तत्त्वनिष्ठो भवेत्सदा॥ पञ्चीकरणम् (वार्तिके) 54
2. विवेकचूडामणिः 354
3. कृतकृत्यो भवेद्विद्वाञ्जीवन्मुक्तो भवेत्सदा।
   आत्मन्यारूढभावस्तु जगदेतन्न वीक्षते॥ पञ्चीकरणम् (वार्तिके) 56

**'इति पञ्चीकरणं पञ्चानां भूतानामेकीकरणं ब्रह्मसाक्षात्कारोपयोगित्वेन यत्र ग्रन्थे प्रतिपादितं स ग्रन्थः पञ्चीकरणाख्यः पञ्चीकरणमितिपदेन गृहीतो भवति।'**[1]

**सन्दर्भग्रन्थसूचिः**


1. सदानन्दयोगीन्द्रः, वेदान्तसारः (सुबोधिनीव्याख्योपेता) (व्याख्याकारः आद्याप्रसादमिश्रः), इलाहाबाद : अक्षयवटप्रकाशनम्, 2011।
2. श्रीमदाद्यशङ्कराचार्यः, पञ्चीकरणम् (षष्टीकालङ्कृतम्) (सङ्कलनकर्ता गजाननसाधले), नवदेहली : चौखम्बा ओरियन्टालिया, प्रथमसंस्करणम्, 2008।
3. श्रीमदाद्यशङ्कराचार्यः, दृग्दृश्यविवेकः (अनुवादकः स्वामी निखिलानन्दः), मैसूर : श्रीरामकृष्णआश्रमः 1931।
4. श्रीमदाद्यशङ्कराचार्यः, अपरोक्षानुभूतिः (अनुवादकः मुनिलालः), गोरखपुर : गीताप्रेसः, सम्वत् 2070।
5. श्रीमदाद्यशङ्कराचार्यः, विवेकचूडामणिः (अनुवादकः मुनिलालः), गोरखपुर : गीताप्रेसः, सम्वत् 2073।
6. महर्षिपतञ्जलिः, पातञ्जलयोगदर्शनम् (व्यासभाष्यसंवलितम्), व्याख्याकारः सुरेशचन्द्रश्रीवास्तवः, वाराणसी : चौखम्बासुरभारतीप्रकाशनम्, 2012।
7. श्रीविद्यारण्यमुनिः, पञ्चदशी (सम्पादकः करुणपतित्रिपाठीः), लखनऊ : उत्तरप्रदेशलखनऊसंस्थानम्, 1997।
8. श्रीमद्भगवद्गीता (शाङ्करभाष्यसमेता), नवदेहली : मोतीलालबनारसीदासः 2014।
9. माण्डूक्योपनिषद् (गौडपादकारिकाशाङ्करभाष्योपेता), गोरखपुर : गीताप्रेसः, सम्वत् 2069।
10. मुक्तिकोपनिषद्, (सम्पादकः जीवानन्दविद्यासागरः), कलकत्ता, 1972।
11. 108 उपनिषद् (ब्रह्मविद्याखण्डः) (सम्पादकः रामशर्माचार्यः), मथुरा : युगनिर्माणयोजना, 2005।


✦✦✦

1. पञ्चीकरणम् (अद्वैतागमहृदयटीकया), पृष्ठसङ्ख्या 183

# मञ्जूषानुसारेण अपभ्रंशानां शक्तत्वविचारः

**अभिजित् घोषः***

शोधसारः-अस्य शोधनिबन्धस्य प्रस्तावनायां मया के तावत् साधुशब्दाः, असाधुशब्दाश्चेति उल्लिख्य अपभ्रंशेषु शक्तिस्वीकारे नैयायिक-मीमांसक-वैयाकरणां च सिद्धान्तं प्रोक्तम्। ततश्च नैयायिकमते केयं शक्तिरिति चेत्, 'अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्याकाराऽर्थविशेष्यिका इदं पदमिममर्थं बोधयतु इत्याकारा पदविशेष्यिका वेश्वरेच्छा शक्तिरिति प्राचीनाः नैयायिकाः, नव्यास्तु ईच्छैव शक्तिर्न तु ईश्वरेच्छा। मीमांसकानां नये बोधजनकतावच्छेकशक्तिरिति। मञ्जूषाकारः नागेशभट्टः तार्किकमीमांसकयोः मतं प्रत्याख्याय स्वाभीष्टं "तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिर्वा वाच्यवाचक-भावापरपर्याया" इति शक्तिस्वरूपमाह। तन्मते सेयं शक्तिः साधुशब्देषु इव अपभ्रंशेष्वपि समानाः, किमर्थमिति चेत् शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात्। परन्तु नैयायिकैः अपभ्रंशेषु शक्तिः नाङ्गीक्रियते। तेषां मते तु असाधुशब्देन साधुस्मरणद्वाराऽर्थबोधः, किञ्च शक्तिभ्रमाद् असाधुशब्देषु बोधः वाच्यमिति'। एवं वैयाकरणाः साधुशब्देषु इव अपभ्रंशेषु साक्षात् वाचकत्वम् अङ्गीकुर्वन्तः तेषां पुण्यपापफलं प्रदर्शयन्ति। तत्र साधुशब्दप्रयोगे एव पुण्यलाभः, असाधुप्रयोगे पापयोनिरिति। इत्थं भगवतः भाष्यकारस्य "साधुशब्दैरेव भाषितव्यं नासाधुशब्दैरिति" इति वाचं संस्मृत्य अस्माभिः सर्वदा साधुशब्दाः एव प्रयोक्तव्याः इत्यस्ति निर्णयः।

**कुटशब्दाः**- अपभ्रंशः, साधुशब्दः, वैयाकरणः, नैयायिकः, नागेशभट्टः, शक्तिः, वाचकश्चेति।

**प्रस्तावना**- बोधजनकशब्दास्तावत् द्विविधा भवन्ति, संस्कृता, असंस्कृताश्चेति। यथा- गोः, घटाः इत्यादयः संस्कृतशब्दाः। असंस्कृतास्तु गावी, गोणी, गोता, गोपतलिकाः इत्यादयः शब्दाः। तेषां पर्यायवाचिनः भवन्ति अपभ्रंशाः, अशिष्टाः, असाधवः, भ्रष्टाश्चेति। अपभ्रंशानां वाचकत्वे शक्तिसद्भावविचारे च दार्शनिकाः विवदन्ते। तेषु नैयायिकैः

* शोध अध्येता (पी-एच.डी.), संस्कृतविभागः, पाण्डेचेरी विश्वविद्यालयः, पाण्डेचेरी

अपभ्रंशेषु शक्तिः नाङ्गीक्रियते, तेषां नये शक्तत्वमेव साधुत्वम्। मीमांसका अपि नैयायिकाभिमतम् अभिप्रयन्ति। तत्र शाब्दिकनये तु अपभ्रंशेष्वपि शक्तिरस्त्येव। अस्मिन् निबन्धे वैयाकरणशिरोमणेः मञ्जूषाकारस्य मतं सविस्तरेण प्रतिपाद्यते।

**नैयायिकमते शक्तिस्वरूपम्**- शक्तिर्लक्षणाव्यञ्जनाभेदेन शब्दवृत्तयः त्रिधा भवन्ति। बुधैः व्याकरणशास्त्रे शब्दार्थयोः नित्यसम्बन्धः समाम्नातः। अयमेव सम्बन्धः शक्तिपदेनोच्यते। 'अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्याकाराऽर्थविशेष्यिका इदं पदमिममर्थं बोधयतु इत्याकारा पदविशेष्यिका वेश्वरेच्छा शक्तिरिति प्राचीना: नैयायिकाः। नव्यनये तु इच्छैव शक्तिर्न तु ईश्वरेच्छा। मीमांसकैस्तु नैयायिकोक्तेः ईश्वरेच्छायाः स्थले बोधजनकतावच्छेकशक्तिरिति मन्यते। एवञ्च मीसांसकैः वैयाकरणभूषणसारकर्त्रा च मीमांसकमतम् अङ्गीक्रियते।

ईश्वरेच्छैव शक्तिः सैव सङ्केतः सम्बन्धश्चेति सिद्धान्तस्य असमीचीनत्वे कारणमाह नागेशभट्टः- इच्छायाः द्वयोः सम्बन्धिनोः आश्रयतानियामत्वाभावेन सम्बन्धत्वासम्भवात्। यतो हि सम्बन्धस्तु द्वयोः सम्बन्धिनोः भिन्नत्वे द्विष्ठत्वे च सत्येऽपि आधाररूपेण विशेष्यविशेषणसम्बन्धसम्बद्धा बुद्धिः नियामकः भवतीति विदुषामाशयः। यथा 'घटवत् भूतलमित्यस्योदाहरणम्। अत्र घट-भूतलयोः संसोगरूपः सम्बन्धः, स च सम्बन्धः घटभूतलाभ्यां भिन्नः। परन्तूभयसम्बन्धश्च घटनिरूपितसंयोगाश्रयो भूतलमिति विशेष्य-विशेषणोभयसम्बन्धसम्बद्धः बुद्धिनियामकश्चः भवतीति। न चायं घटशब्दः इच्छावान् न च तदर्थो एव इच्छावान्, प्रकृते नाऽयं व्यवहारः दृश्यते। सम्बन्धो हि सम्बन्धिभ्यां भिन्नः उभयसम्बन्धाश्रितश्चौकश्च, स च नेच्छायाम्। अतः ईश्वरेच्छा न सम्बन्धः इति मञ्जूषाकृदाशयः।

**नागेशमते शक्तिस्वरूपम्**- इत्थं शक्तिस्वरूपविषये नैयायिकमतं प्रत्याख्याय स्वाभीष्टमतं प्रस्तौति नागेशभट्टः। तत्र का नाम शक्तिरिति चेत् नागेशाऽह-"तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिर्वा वाच्यवाचकभावापरपर्याया"[1] इति। सोऽयं वाच्यवाचकभावः शब्दार्थोभयनिष्ठ एव। इह सम्बन्धान्तरमिति पदेन न केवलम् ईश्वरेच्छा शक्तिरिति तार्किकमतं निराक्रियते अपि तु मीमांसकानां बोधजनकतावच्छेदकशक्तिरिति मतं, प्राचीनवैयाकरणां बोधजनकत्वरूपशक्तिरिति मतं प्रत्याख्यायेते। अस्याः शक्तेः बोधकं भवति पदपदार्थयोः इतरेतराध्यासमूलकं तादात्म्यम्। तदेव तादात्म्यं सम्बन्धः इत्युच्यते, किमर्थमिति चेत् पदपदार्थोभयनिष्ठत्वेन विशिष्टबुद्धिनियामकत्वेन च सम्बन्धत्वम्। यथा दीपघटयोः संयोगसम्बन्धः, तथैव पदपदार्थोः तादात्म्यसम्बन्धः। स च सम्बन्धः अनुमानेन ज्ञातव्यः।

---

1. परमलघुमञ्जूषा, पृ.सं 28।

तदुक्तं च भर्तृहरिणा वाक्यपदीये-

**उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते।**
**शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः।।**[1] इति

**अपभ्रंशेषु शक्तिसाधकमिति नागेशसिद्धान्तः**- इत्थं शक्तिस्वरूपं निरूप्य शक्त्याश्रयः प्रतिपाद्यते।

पदपदार्थयोः मध्ये विद्यमानः वाच्यवाचकभावापरपर्यायः शक्त्याख्यः सम्बन्धविशेषः साधुशब्देषु इव अपभ्रंशेष्वपि समानः इति।तत्र हेतुमाह शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात्। तद्यथा पदानामर्थविषयकशक्तिग्रहे घटादीनां साधुशब्दानां व्यवहारो जायते तथैव असाधूशब्दानां गग्र्यादीनाम्। अतः अपभ्रंशेष्वपि शक्तिः स्वीकर्तव्या इति मञ्जूषाकारसिद्धान्तः। पदपदार्थरूपसम्बन्धस्य शक्तिग्राहकाणि भवन्ति-

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**[2] इति

एषु शक्तिग्राहकेषु व्यवहारः समेषामपेक्षया मुख्यः। अत एव शक्तिग्राहकशिरोमणिरिति तस्य व्यवहारः। वस्तुतः वृद्धानां व्यवहारेणैव सर्वप्रथमं शक्तिग्रहो जायते। तद्यथा लोके प्रयोजकवृद्धः प्रयोज्यवृद्धं प्रति घटमानय इत्युक्ते सति प्रयोज्यवृद्धः घटमानयति। तत्रैव विद्यमानः ग्रहणधारणपटुर्बालकः घटमानय इति व्यवहारमवलोक्य स्वबुद्धौ इदं घटानयनरूपं कर्म, घटमानय इति शब्दप्रयोज्यमित्यवधारयति। तदनन्तरं घटं नय, गामानय, गां नय, गां बधान, अश्वमानय, अश्वं बधानेति प्रयुक्ते सति आवापोद्वापाभ्यां तटस्थः घटशब्दस्य घटत्वावच्छिन्ने, गोशब्दस्य गोत्वावच्छन्ने च शक्तिं गृहणाति। अनया रीत्या शक्तिग्राहकेषु सर्वादौ व्यवहारस्य प्रामुख्यं बोद्धव्यम्।

अनेन व्यवहारेण अपभ्रंशे, प्रादेशिकभाषायां च समानार्थः अभिधीयते। तद्यथा घटमानय इत्यस्मिन् स्थाने गगरीमानय इति प्रयुज्यमाने प्रयोज्यवृद्धः गगरीशब्दात् घटत्वाच्छिन्ने शक्तिं गृह्णन् घटमानयति।

**अत्र शंका**- यदि व्यवहारदर्शनमेव शक्तिग्राहकं भवति तदा जन्मसमये उत्पत्तिकाले वा व्यवहारबोधकशब्दज्ञानाभावाद् शक्तिग्रहः न भवेत्। तर्हि कथं वा शक्तिग्राहकशिरोमणेः व्यवहारस्य अपभ्रंशेष्वपि तुल्यत्वमिति।

---

1. वाक्यपदीयम् 3।3।6।।
2. वैयाकरणभूषणसारः पृ.सं 278।

**समाधानम्**- एतादृशव्यवहारदर्शनेन प्रवृत्तिं च विलोक्य पूर्वस्मिन् जन्मनि अनुभूतायाः शक्तेः स्मरणं कल्पते, कारणभावात् कार्यभावः इति सिद्धान्तात्। तस्मादेव शिशूनां, जडानां पश्वादीनामपि अन्वयबोधः जायते। अतः अपभ्रंशेष्वपि शक्तिरस्तीति मञ्जूषाकारस्य मतम्। न केवलं मञ्जूषाकारस्य अपि तु समेषां वैयाकरणां मदमिदम्।

एवञ्च अपभ्रंशेष्वपि शक्तिरिति स्वमतं निरूप्य तार्किकमतनूद्य तन्मतं प्रत्याख्यायते। नैयायिकैः केवलं साधुशब्देषु शक्तिः स्वीक्रियते, न तु असाधुशब्देषु। तेषां नये असाधुशब्दानां बोधः द्विधाः जायते। यदा व्युत्पन्नैः असाधुशब्दाः श्रूयन्ते तदा तैः साधुशब्दान् संस्मृत्य असाधुशब्दानां बोधः क्रियते। अव्युत्पन्नैः यदा असाधुशब्दाः श्रूयन्ते तदा तेषां शक्तिभ्रमाद् बोधः जायते। भ्रमश्चायं परम्परया अभ्युपज्ञेयः।

**तार्किकमतखण्डनम्**- तार्किकाः असाधुशब्देन साधुस्मरणद्वाराऽर्थबोध इत्याहुः, तन्न युक्तमिति नागेशः। तत्र कारणमाह व्युत्पन्नामपि साधुशब्दस्मरणाभावेऽपि अपभ्रंशशब्दानाम् अर्थबोधःसुतरां जायते। तादृशेऽनुभवे किमस्ति प्रमाणमिति चेत् अपभ्रंशशब्दोपस्थापितार्थस्य बोधकः यः साधुशब्दस्तम् अजानतां बोधस्य अनापत्तेः। एवं हि साधुशब्दस्मरणेनैव अपभ्रंशशब्दानां बोधः चेत् कथं वा तद्वावाचकसाधुशब्दज्ञानहीनानां बोधः इत्यस्ति आशयः। अधुना तार्किकाणां 'शक्तिभ्रमाद् असाधुशब्देषु बोधः वाच्यमिति' द्वितीयपक्षं दूषयति। नैयायिकाः अभिप्रयन्ति यत् अव्युत्पन्नानाम् असाधुशब्दाजानतां शक्तिभ्रमात् शाब्दबोधः, तन्न युक्तिमिति। तस्य अयुक्तत्वे कारणमाह-बाधज्ञानं विना जायमानस्य संशयरहितबोधस्य भ्रमत्वस्याकल्पनाद् अर्थात् यस्मिन् ज्ञाने उत्तरकाले बाधो जायते तत्रैव भ्रमः स्वीक्रियते। यतो हि तद्वति तदभावप्रकारकं ज्ञानमेव भ्रमत्वम्। लोकेऽपि न हि कश्चिदपि गगरीशब्दान्तरम् इमे गगर्यादिशब्दाः वाचकत्वाभाववन्तः इति चिन्तयति। अत अपभ्रंशशब्दानामपि शक्तत्वम्। एवं स्त्रीशूद्रबालादीनाम् उच्चारिते साधुशब्दे अर्थविषयके सन्देहे सति साधुशब्दानामपभ्रंशशब्देन अर्थनिर्णयः जायते। अतएवअपभ्रंशानामपि वाचकत्वमिति।

**अपभ्रंशानां वाचकत्वे भाष्यादिवचनं प्रमाणम्**- शब्दिकनये साधुशब्दाः असाधुशब्दाश्च साक्षात् वाचकाः भवन्ति। अस्यां स्थितौ व्याकरणशास्त्रेण धर्मनियमः क्रियते। अपभ्रंशानां वाचकत्वे भाष्यवचनानि हरिकारिकाश्च प्रमाणानि भवन्ति। तथा च- "सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शास्त्रेण धर्मनियमः, यथा लौकिकवैदिकेषु"[1], "एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते-शब्देनैवार्थोऽभिधेयो

---

1. महाभाष्यम्, पस्पशाह्निकम्, वार्तिकम्- 1।

नापशब्देनेति"[1]। एवं क्रियमाणमभ्युदयकारि भवतीति। भर्तृहरिः "वाचकत्वाविशेषे वा नियमः पुण्यपापयोः"[2] इति कारिकां विरचयन् अपभ्रंशानां साक्षात् वाचकत्वम् अङ्गीकृतवान्।

तथा हि साधुशब्दानामपशब्दानां च समानेऽपि अर्थबोधे साधुशब्दप्रयोगे पुण्यम्, अपभ्रंशप्रयोगे पापयोनिरिति। उक्तञ्च भर्तृहरिणा–

**शिष्टेभ्यो आगमात्सिद्धाः साधवो धर्मसाधनम्।**
**अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः॥**[3] इति।

अत्र पापनियमश्चात्र पुण्याभाव एव न तु साक्षात्पापहेतुत्वमिति। अत एवार्यम्लेच्छाधिकरणं सङ्गच्छते।

**निष्कर्षः**– इत्थं च अपभ्रंशानां साधुत्वनिराकरणे बद्धपरिकराः शास्त्रकाराः, तेषां शक्तिनिरूपणे, वाचकत्वनिरूपणे, शाब्दबोधे च विवदन्ते। अपभ्रंशविषये नैयायिकाः मीमांसकमतमनुसरन्ति। तेऽपि अपभ्रंशेषु शक्तिं नैवाङ्गीकुर्वन्ति। अपभ्रंशाः साक्षात् वाचकाः इति वैयाकरणैः स्वीक्रियन्ते। तथापि नियमः क्रियते साधुशब्दप्रयोगेएव पुण्यलाभः। साधुत्वञ्च व्याकरणान्वाख्येयत्वं पुण्यजनकतावच्छेदकधर्मवत्त्वं वा, तद्भिन्नत्वमसाधुत्वमिति। तेन साधुशब्दाः एव प्रयोक्तव्याः इति निर्णयः। भगवता भाष्यकारेण भाषितम्– "साधुशब्दैरेव भाषितव्यं नासाधुशब्दैरिति"।

## सन्दर्भग्रन्थसूची

1. नागेशभट्टः, वैयाकरणसिद्धान्त-परमलघुमञ्जूषा (किरणावली- संस्कृतव्याख्योपेत-हिन्द्यनुवादसहिता), आचार्यलोकमणिदाहाल (व्याख्याकारः), चौखम्बासुरभारती-प्रकाशनम्, वाराणसी, 2018।
2. नागेशभट्टः, परमलघुमञ्जूषा (भावप्रकाशिका बालबोधिनी संस्कृत-हिन्दी-व्याख्योपेता), डॉ. जयशङ्करलालत्रिपाठी (व्याखाकारः सम्पादकश्च), चौखम्बाकृष्णदास अकादमी, वाराणसी, 2017।
3. भर्तृहरिः, वाक्यपदीयम् (ब्रह्मकाण्डम्), सूर्यनारायण शुक्ल, रामगोविन्द शुक्ल (सम्पादकौ), चौखम्बासंस्कृतसंस्थानम्, वाराणसी, 2016।
4. पतञ्जलिः, व्याकरणमहाभाष्यम् (मूलमात्रम्), आत्मदेवः मिश्रः(सम्पादकः), चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 2010।

---

1. महाभाष्यम्, पस्पशाह्निकम्, पृ. सं 99।
2. वाक्यपदीयम् 3।3।30।
3. वाक्यपदीयम् 1।27।

5. भर्तृहरिः, वाक्यपदीयम्, प्रथमो भागः, ब्रह्मकाण्डम्, व्याख्याद्वयोपेतम्, 'पद्मश्री' पण्डितश्रीरघुनाथशर्मा, (अम्बाकर्त्रीव्याख्याकारः सम्पा.), संपूर्णानन्दसंस्कृत–विश्वविद्यालय, वाराणसी, 2006।

6. Tatacharya N.S. Ramanuja, Sabdabodhamimamsa, (Part III - Case Terminations and Their Significance), Institute Francais De Pondicherry & Rashtriya Sanskrit Sansthan, 2008

7. कौण्डभट्टः, वैयाकरणभूषणसारः (श्रीहरिवल्लभकृत दर्पण–व्याखा संवलितः तथैव सुबोधिनी हिन्दीव्याख्योपेतश्च), डॉ. चन्द्रिकाप्रसाद द्विवेदी (हिन्दी–व्याख्याकारः), चौखाम्बा संस्कृत प्रतिष्टान, दिल्ली, 2.18।

8. कौण्डभट्टः, वैयाकरणभूषणसारः, डॉ आद्याप्रसाद मिश्र (सम्पा.), संपूर्णानन्द–संस्कृतविश्वविद्यालयः, वाराणसी, 1988।

9. पतञ्जलिः, व्याकरण–महाभाष्यम्, प्रो जयशङ्करलाल त्रिपाठी (व्याख्याकारः) चौखम्बाकृष्णदास–अकादमी, वाराणसी, 2.17।

10. व्याकरणसिद्धान्त–सुधानिधिमर्मप्रकाशः, डॉ.–पङ्कजकुमार–व्यासः (सम्पादकः), राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपतिः–आन्ध्रप्रदेशः, 2011।

11. युधिष्ठिरमीमांसकः, संस्कृत व्याकरणशास्त्र का इतिहास, भारतीय प्राच्यविद्या प्रतिष्ठान, काशी 2030।

12. रामकृष्णमाचार्यः कं. वे (रचयिता), भूषणसारतत्त्वप्रकाशिका, शतपथी हरेकृष्णः (सम्पादकः), राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपतिः (आन्ध्रप्रदेशः), 2010।

✦✦✦

# उपसर्गार्थचन्द्रिकादिशा अवोपसृष्टधाधातोरर्थनिर्णयः

**सुखदेवसाहू***

वाङ्मयेऽस्मिन् शब्दार्थयोर्नित्यसम्बन्धः स्वीक्रियते। कश्चित् शब्दः उच्चारितश्चेत् सः अवश्यं कमपि अर्थं प्रतिपादयत्येव। सर्वेऽपि शब्दाः धातुजन्याः भवन्ति इति वैय्याकरणानां राद्धान्तः। तत्रापि सोपसर्गधातुः सूक्ष्मस्य विशिष्टस्य च अर्थस्य प्रतिपादनाय सामर्थ्यं लभते। तथाह्युक्तम्- "सम्यक् प्रयुक्ताश्चोपसर्गाः यथोपस्कुर्वते वाक्यविन्यासस्य न तथेतरत्किञ्चित्"[1] इति। संस्कृतवाङ्मये यदुपसर्गप्राचुर्यं यच्चोपसर्गकृतनानात्वं दृश्यते न तदन्यत्र साहित्ये उपलभ्यते। अस्मत्पूर्वजाः ऋषयोऽपि उपसर्गप्रियाः एव आसन्। अतः ते तत्तदर्थविवक्षायां कमप्येकं धातुमाश्रित्य तेन सह नानोपसर्गान् संयुज्य प्रयुज्यन्ते स्म। उपसर्गासञ्जनेन धातोः अर्थवैचित्र्यं जायते इत्यत्र तत्सम्बन्धिनी कारिका सुप्रसिद्धा एव। तथाहि-

**उपसर्गेण धात्वर्थः बलादन्यत्र नीयते।**
**प्रहाराहारसंहारविहारपरिहारवत्॥ इति**

वचनानुसारं धातूनामुपसर्गभेदे सति अर्थपार्थक्यं जायत इति वयं सर्वे जानीमः परन्तु एकस्मादेव उपसर्गात् समानस्यैव धातोः प्रयोगेऽपि अर्थपार्थक्यं सम्भवति। अतः अमुमेव उपसर्गविषयकमर्थभेदमादाय महामहोपाध्यायेन श्रीमता चारुदेवशास्त्रिणा उपसर्गार्थचन्द्रिका इत्याख्यः पञ्चखण्डात्मकः ग्रन्थः रचितः। तत्र उपसर्गाणां योगे सति धातूनाम् अर्थपार्थक्यमादाय प्राचीनाः विद्वासः, कवयः, ग्रन्थकाराश्च कथं स्वस्वकृतौ तेषां व्यवहारं कृतवन्तः इति उदाहरणपुरःसरं उपसर्गार्थचन्द्रिकाग्रन्थे संकलितवान् शास्त्रिवर्यः। तेषु अवोपसर्गपूर्वकाद् धाधातोः के के अर्थाः सम्भवन्तीति तावद् अस्मिन् शोधप्रबन्धे प्रस्तूयते।

---

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्

1. उपसर्गार्थचन्द्रिकायां चारुदेवशास्त्री

**उपसर्गार्थचन्द्रिकायां प्रोक्ताः अवपूर्वकधातोः प्रयोगाः-**

महर्षियास्कः कस्य उपसर्गस्य कः अर्थः इति निरुक्ते प्रोक्तवान्। तत्र अव इत्युपसर्गस्य तावत् विनिग्रहार्थः इति प्रदत्तः। तथाहि "न्यवेति विनिग्रहार्थीयौ" इति। तत्र दुर्गाचार्यकृतव्याख्यायां विनिग्रहः इत्येव लिखितः। अन्यत्र हिन्दीव्याख्यानेषु अव इत्युपसर्गस्य नीचैः[1] इत्यर्थः कृतः। अत्र तावद् उपसर्गार्थचन्द्रिकानुसारं धाधातुना सह अव इत्युपसर्गस्य योगे सति के के अर्थाः सम्भवन्तीति विषये प्रोच्यते।

**अवाधुः**- अवाधुः इति प्रयोगः ऋग्वेदे स्थलद्वये दृश्यते। तथाहि "न मा गरन्नद्यो मातृतमा दासा यदीं सुसमुब्धमवाधुः" (1.158.5) इति मन्त्रे, "दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्वन्तः" (4.13.4) इति मन्त्रे च अवाधुः इति क्रियाप्रयोगः दृश्यते। अवाधुः इति क्रियारूपम् अव इत्युपसर्गपूर्वकाद् धा-धातोः लुङ्लकारस्य प्रथमपुरुषबहुवचनस्य अस्ति। यद्यपि उभयत्र मन्त्रे अवाधुः इति क्रियारूपं दृश्यते तथापि प्रथमे मन्त्रे अवाधुः इति तिङन्तस्य अर्थः अवाङ्मुखम् अपातयन् इति। द्वितीये मन्त्रे तु अन्तर्निमज्जयामासुः इत्यर्थः वर्तते।

**अवधेहि**- अवधेहि इति प्रयोगः अथर्ववेदे दृश्यते। तथाहि- "ऋ॒चा कु॒म्भीमध्य॒ग्नौ श्र॑या॒म्या सि॑ञ्चोद॒कमव॑ धेह्येनम्" (9.5.5) इति मन्त्रे अवधेहि इति क्रियाप्रयोगः दृश्यते। अवधेहि इति क्रियारूपम् अव इत्युपसर्गपूर्वकाद् धाधातोः लोट्लकारस्य मध्यमपुरुषैकवचनस्य अस्ति। अस्य अर्थः अधः श्रय अथवा अवतारय इति।

**अवदधौ**- अवदधौ इति प्रयोगः शतपथब्राह्मणस्य "सोऽवैवावरंसमुद्रं दधावव पूर्वम्" (1.6.3.11) इत्यत्र दृश्यते। अवदधौ इति रूपम् अवोपसर्गपूर्वकाद् धा-धातोः लिट्लकारस्य प्रथमपुरुषैकवचनस्य अस्ति। अत्र अवदधौ इति पदस्य स्वस्मिन्नन्तः अकरोद् इत्यर्थः।

**अवदधुः**- अवदधुः इति प्रयोगः अथर्ववेदस्य "यां तेकृत्यां कूपेऽवदधुः श्मशाने वा निचख्नुः" (5.31.8) इति मन्त्रे दृश्यते। अवदधुः इति रूपम् अवोपसर्गपूर्वकाद् धा-धातोः लिट्लकारस्य प्रथमपुरुषबहुवचनस्य अस्ति। अत्र अवदधुः इति पदस्य नीचौः पातयामासुः इत्यर्थः।

**अवदधाति**- शतपथब्राह्मणे स्थलद्वये अवदधाति इति क्रियाप्रयोगो दृश्यते। तथाहि "पचनमवधायमहावीरमवदधाति" (14.1.21) किञ्च "अथ मुसलमादत्ते।

---

1. प्रो. उमाशङ्करशर्मणा कृते हिन्दीव्याख्याने पृ. 6

बृहद्ग्रावासि वानस्पत्य इति बृहद्ग्रावा ह्येष वानस्पत्यो ह्येष तदवदधाति स इदं देवेभ्यो हविः.." (1.1.4.10) इत्यत्र अवदधाति इति प्रयोगः लभ्यते। अवदधाति इति रूपम् अवोपसर्गपूर्वकाद् धा-धातोः लट्लकारस्य प्रथमपुरुषैकवचनस्य अस्ति। अत्र प्रथमे उदाहरणे अवदधाति इति पदस्य अधः श्रयति अवतारयति वा इत्यर्थः। द्वितीये उदाहरणे तु अवदधाति इत्यस्य अन्तर्दधाति इत्यर्थः। आपस्तम्बश्रौतसूत्रे "मारुत्यां मेषीमवदधाति वारुण्यां मेषम्" (8.2.6.17) इति वाक्येऽपि अवदधाति इति क्रियाप्रयोगः दृश्यते। तथाहि तत्र अस्यार्थः प्रक्षिपति इति। भारद्वाजश्रौतसूत्रेऽपि अवदधाति इति प्रयोगः दृश्यते। तथाहि तत्र "इत्यवटेऽवदधाति" (7.8.9) इत्यत्र अवदधातीति रूपं दृश्यते। तत्रापि अवदधाति इत्यस्य प्रक्षिपति इत्यर्थः। महाभारते शान्तिपर्वण्यपि अवदधाति इति क्रियाप्रयोगः दृश्यते। तथाहि "त्रिलोककृद्ब्रह्माप्रभुरेकाकी तिष्ठति। ब्रह्मचारी न कामसुखेष्वात्मानमवदधाति" (190.10) इति प्रयोगः दृश्यते। अत्र अवदधाति इत्यस्य अर्थः निमज्जयति इति।

**अवधीयताम्**- बृहच्छ्लोकसंग्रहे "यच्चोक्तं धर्मशास्त्रेण तत्तावदवधीयताम्" (7.77) इत्यत्र अवधीयताम् इति क्रियाप्रयोगः लभ्यते। अवधीयताम् इति अवपूर्वकाद् धा-धातोः लोट्लकारस्य कर्मणि रूपम् अस्ति। अत्र अवधीयताम् इति पदस्य मनः धीयताम् इति अर्थः।

**अवधत्से**- महाभारते कर्णपर्वणि "स वीरकिं मुह्यसि नावधत्से" (89.43) इत्यत्र अवधत्से इति प्रयोगः दृश्यते। अवधत्से इति रूपम् अवपूर्वकात्मनेपदिनः धाधातोः मध्यमपुरुषैकवचनस्य अस्ति। तत्र नावधत्से इति पदस्य न अवेक्षसे, न चेतयसेवा इत्यर्थः।

**अवाधाः**- छान्दोग्योपनिषदि "यद्दोषा लवणमुदकेऽवाधा अङ्ग तदाहरेति" (8. 13.1) इति मन्त्रे अवाधाः इति प्रयोगः दृश्यते। अवाधाः इति रूपम् अवोपसर्गपूर्वकात् परस्मैपदिनः धाधातोः लुङ्लकारस्य मध्यमपुरुषैकवचनस्य रूपमस्ति। अस्य अर्थः न्यधाः अर्थात् निहितवान् असि इति।

**अवधत्ते**- तैत्तरीयारण्यके "दक्षिणंबाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतम्" (2.1) इत्यत्र अवधत्ते इति क्रियाप्रयोगः दृश्यते। अवधत्ते इति रूपं अवोपसर्गपूर्वकाद् आत्मनेपदिनः धाधातोः लट्लकारस्य प्रथमपुरुषैकवचनस्य अस्ति। अस्यार्थः न्युब्जीकरोति अर्थात् नीचैः करोतीति।

**अवदध्युः**- आश्वलायनगृह्यसूत्रे "कर्तेऽवदध्युरुपसर्पमातरं भूमिमेतामिति" (4. 6.8) इत्यत्र अवदध्युः इति क्रियाप्रयोगः दृश्यते। अवदध्युः इति प्रयोगः अवपूर्वकात्

परस्मैपदिनः धाधातोः विधिलिङि प्रथमपुरुषैकवचनस्य अस्ति। अत्र अवदध्युः इति पदस्य नीचौः दध्युः इति अर्थः।

**अवदध्यात्**- शतपथब्राह्मणे "न वैतदवकल्पते यदश्वस्य पादमवदध्याद् वा गोः पादमवदध्याद्" (4.3.4.7) इत्यत्र अवदध्यात् इति क्रियाप्रयोगः दृश्यते। तथाहि अवदध्यात् इति रूपम् अवपूर्वकात् परस्मैपदिनः धा-धातोः विधिलिङि प्रथमपुरुषैकवचनस्य अस्ति। अत्र अवदध्याद् इत्यस्य अर्थः अधो निक्षेपयेत्।

**अवदधे**- अवदधे इति प्रयोगः महाभारतस्य आदिपर्वणि "ततस्तांस्तेषु कुण्डेषु गर्भानवदधे तदा" (महा० आदि-115.22) इत्यस्मिन् श्लोके दृश्यते। अवदधे इति अवपूर्वकाद् आत्मनेपदिनः धाधातोः लिटि प्रथमपुरुषैकवचनस्य रूपमस्ति। अवदधे इत्यस्य अर्थः धृतवती[1] इति।

**अवहितः**- बृहदारण्यकोपनिषदः प्रथमाध्याये चतुर्थब्राह्मणे "यथाक्षुरः क्षुरधानेऽवहितः" (1.4.7) इति मन्त्रे अवहितः इति प्रयोगः दृश्यते। अवहितः इति अवपूर्वकाद् धा-धातोः क्तप्रत्ययस्य रूपमस्ति। अत्र अवहितः इत्यस्य अर्थः न्यस्तः, प्रवेशितः[2] इति। पुनः निरुक्ते "त्रितं कूपेऽवहितमेतत् सूक्तं प्रतिबभौ" (6.27) इत्यत्र अवहितम् इति प्रयोगः दृश्यते। अत्र कूपे अवहितम् इत्यस्य कूपे अन्तः पतितम् इत्यर्थः। ऋग्वेदे अपि "त्रितः कूपेऽवहितो देवान् हवत ऊतये" (1.105.17) इति मन्त्रे अवहितः इति प्रयोगः दृश्यते। अत्रापि अवहित इति पदस्य पतितः इत्यर्थः। ऋग्वेदस्य "उत देवाअवहितं देवा उन्नयथा पुनः" (10.137.1) इति मन्त्रे अपि अवहितमिति प्रयोगः दृश्यते। अत्रापि अवहितमित्यस्य पतितम् अधोगतं वा इत्यर्थः। आपस्तम्बधर्मसूत्रे "ससोपानाद् वेष्टितशिरा अवहितपाणिर्वाऽऽसीदेत्" (1.2.5.10) इत्यत्र अवहित इति शब्दः वर्तते। अत्र अवहितपाणिः इति पदस्य न्युब्जीकृतहस्तः इत्यर्थः। रामायणे

**कौशल्यां पुत्रशोकार्त्तामिदं वचनमब्रवीत्।**
**यदि जागर्षि कौशल्ये शृणुमेऽवहिता वचः॥**" (2.63.4)

इति श्लोकेऽपि अवहिताः इति क्रियाप्रयोगः अस्ति। अस्य अर्थः दत्तावधानः अथवा एकाग्रमनाः इति। प्रबोधचन्द्रोदये अपि "कर्तव्येष्ववहितेनभवता भवितव्यम्" इति वाक्ये अवहितेन इति क्रियाप्रयोगः दृश्यते। अत्रापि अवहितेन इति पदस्य दत्तावधानेन अथवा एकाग्रमनसा इत्यर्थः।

---

1. टीका- भारतभवदीप of नीलकण्ठ चतुर्धर
2. बृहदारण्यकोपनिषदः शाङ्करभाष्यम्।

**अवधाय**- छान्दोग्योपनिषदि अवधाय इति प्रयोगः दृश्यते। तथाहि "लवणमेतदुदकेऽवधाय" (6.13.1) इति। अवधाय इत्यत्र अवोपसर्गपूर्वकाद् धाधातोः ल्यप्प्रत्ययो विद्यते। अत्र अवधाय इत्यस्य न्यस्य, प्रक्षिप्य[1] इत्यर्थः। गोभिलगृह्यसूत्रे अपि अवधाय इति प्रयोगः दृश्यते। तथाहि "दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय" (1.2.2) इति। अत्र अवधाय इत्यस्य वेष्टयित्वा इत्यर्थः। कात्यायनश्रौतसूत्रे अपि "प्रबद्धं हिरण्यं हवन्यामवधाय" (10.2.4) इत्यत्र अवधाय इति प्रयोगः दृश्यते। अत्र अवधाय इत्यस्य निधाय इत्यर्थः। गोभिलगृह्यसूत्रे "कंसमपां पूरयित्वा सर्वौषधीः कृत्वा हस्ताववधाय" (3.2.35) इत्यत्रापि अवधाय इत्यस्य प्रयोगः लभ्यते। अत्र हस्तौ अवधाय इत्यस्य हस्तौ निमग्नौ कारयित्वा इत्यर्थः। आश्वलायनगृह्यसूत्रे तावत् "हिरण्यमवधाय" (2.9.6) इति प्रयोगः दृश्यते। अत्र अवधाय इत्यस्य निक्षिप्य इत्यर्थः। मुद्राराक्षसे "पादाग्रे दृशमवधाय निश्चलाङ्गीम्" (5.13) इति वाक्ये अवधाय इति प्रयोगः दृश्यते। अत्र दृशम् अवधाय इत्यस्य नयनम् निपात्य इत्यर्थः। महाभारते आदिपर्वणि "सोऽज्ञायमानः (धृष्टद्युम्नः) पुरुषानवधाय समन्ततः" (192.2) इति श्लोके अवधाय इति प्रयोगः दृश्यते। अत्र अवधाय इत्यस्य अवस्थाप्य इत्यर्थः।

**अवधानम्**- महाभारते शान्तिपर्वणि "गच्छावधानं नृपते ततो दुःखं प्रहास्यसि" (29.16) इति श्लोके अवधानम् इति प्रयोगः दृश्यते। अवधानम् इति रूपम् अवपूर्वकाद् धाधातोः ल्युट्प्रत्यये निष्पन्नम्। अत्र अवधानम् इत्यस्य समाहितो भव इत्यर्थः। महाभारते वनपर्वणि

**वयं तुतमृते वीरं वनेस्मिन्द्विपदां वर।**
**अवधानं न गच्छामः काम्यके सह कृष्णया॥** (86.17)

इति श्लोके अपि अवधानम् इति क्रियाप्रयोगः दृश्यते। अस्य अर्थः मनसः स्वास्थ्यम् इति।

तथाहि उपसर्गार्थचन्द्रिकायाम् अवपूर्वकधाधातोः अवाधुः, अवधेहि, अवदधौ, अवदधुः, अवदधाति, अवधीयताम्, अवधत्से, अवधाः, अवधत्ते, अवदध्युः, अवदध्यात्, अवदधे इत्येतानि तिङन्तरूपाणि संकलितानि। पुनश्च अवहितः इति क्तप्रत्ययान्तः, अवधाय इति ल्यप्प्रत्ययान्तः, अवधानम् इति ल्युट्प्रत्ययान्तश्च इत्येतेषां प्रयोगाः लभ्यन्ते। एवञ्च अवपूर्वकधाधातोः तत्तद्ग्रन्थेषु बहवः अर्थाः प्राप्ताः। तथाहि- अवाधुः इत्यस्य अवाङ्मुखम् अपातयन्, अन्तर्निमज्जयामासुः इति अर्थौ। अवधेहि इत्यस्य अधःश्रयणम् अर्थाद् अवतारणम्, अवदधौ इत्यस्य स्वस्मिन्नन्तः अकरोद्, अवदधुः

1. छान्दोग्योपनिषदः शाङ्करभाष्यम्।

इत्यस्य नीचैः पातयामासुः, अवदधाति इत्यस्य अवतारयति, प्रक्षिपति, अन्तर्दधाति, निमज्जयति इत्येते अर्थाः। अवधीयताम् इत्यस्य मनो धीयताम् इत्यर्थः। अवधत्से इत्यस्य चेतयसे इत्यर्थः। अवाधाः इत्यस्य निहितवान् असि इत्यर्थः। अवधत्ते इत्यस्य नीचैः करोतीत्यर्थः। अवदध्युः इत्यस्य नीचैः दध्युः इत्यर्थः। अवदध्याद् इत्यस्य अधः निक्षेपयेद् इत्यर्थः। अवदधे इत्यस्य धृतवती इत्यर्थः। अवहितः इति क्तप्रत्ययान्तस्य न्यस्तः अथवा पतितः इत्यर्थः। अवधाय इत्यस्य वेष्टयित्वा, निधाय, निमग्नौ कृत्वा, निक्षिप्य इत्येते अर्थाः सम्भवन्ति। पुनश्च अवधानम् इत्यस्य मनसः स्वास्थ्यम् अवहितो भव इत्यर्थो वा अस्ति।

## ॥ परिशीलितग्रन्थसूची॥


1. चारुदेवशास्त्री। 1997। उपसर्गार्थचन्द्रिका (प्रथमखण्डः)। भारतीय-विद्या-प्रकाशनम्। दिल्ली।
2. चारुदेवशास्त्री। 1978। उपसर्गार्थचन्द्रिका (द्वितीयखण्डः)। भारतीय-विद्या-प्रकाशनम्। दिल्ली।
3. वेदव्यासः। 1929। महाभारतम्। नीलकण्ठकृतभारतभावदीपाख्यया टीकया समेतम्। शंकरनरहर जोशी (प्रकाशकः)। चित्रशालानाम्नि मुद्रणयन्त्रालये प्रकाशितम्। पुण्यपत्तनम्।
4. यास्कः। 2014। निरुक्तम्। शर्मा, उमाशङ्करः। चौखम्बाविद्याभवनम्। वाराणसी।
5. 2006। संस्कृतवाङ्मय का बृहद् इतिहास (पुराणखण्ड)। पण्डा गङ्गाधर (सम्पा.)। उत्तरप्रदेशसंस्कृतसंस्थानम्। लखनऊ।
6. यास्कः। 1969। निरुक्तम्। ऋग्वार्थाख्यायाव्याख्यया, पण्डितशिवदत्तशर्मकृत-टिप्पण्यादिभिश्च समलङ्कृतम्। क्षेमराज-श्रीकृष्णदासश्रेष्ठी (प्रका.)। श्रीवेङ्कटेश्वरस्टीम् मुद्रणयन्त्रालयः। मुम्बई।
7. 1998। मन्त्रपुष्पम्। स्वामी देवरूपानन्दः (परिष्कर्ता)। रामकृष्ण मठ। खार। मुम्बई।
8. विशाखादत्तः। 2018। मुद्राराक्षसम्। डा. उदयचन्द्र बन्द्योपाध्यायः, डा. अनीत बन्द्योपाध्यायश्च (सम्पादकौ)। संस्कृत बुक् डिपो। कोलकाता।

9. 1976। ऋग्वेदसंहिता (प्रथमखण्डः)। रमेशचन्द्रदत्तः (अनुवादकः)। हरफ प्रकाशनी। कलकाता।

10. 1976। ऋग्वेदसंहिता (द्वितीयखण्डः)। रमेशचन्द्रदत्तः(अनुवादकः)।हरफ प्रकाशनी। कलकाता।

11. https://advaitasharada.sringeri.net/display/bhashya/Brha

12. https://advaitasharada.sringeri.net/display/bhashya/Chandogya

✦✦✦

# कारकद्वितीयाविभक्त्यर्थविमर्शः

**पङ्कजराउलः** *

**उपोद्घातः**

वैयाकरणभूषणसारे सुबर्थनिर्णये कौण्डभट्टः सुप्प्रत्ययानामर्थनिरूपणाय तत्रादौ वैयाकरणसिद्धान्तकारिकाम् उद्धरति-

**आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा।**
**यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः।।**[1]

अस्यां कारिकायां भट्टोजिदीक्षितेन विभक्तिनाम् अर्थाः उक्ताः। द्वितीया-तृतीयासप्तमीविभक्तिनाम् आश्रयोऽर्थो भवति। पञ्चमीविभक्तेः अवधिः चतुर्थीविभक्तेः उद्देश्यः शेषषष्ठ्याश्च सम्बन्धोऽर्था भवति। इत्येवमर्थनिर्धारणं भाष्यप्रामाण्येन कृतमाचार्येण। तद्यथा भाष्ये उक्तम्-

**सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङाम्।**
**प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा।।**[2]

संङ्ख्या तथा कर्माद्यर्थाः सुप्तिङ्विभक्त्योः अर्थाः भवन्तीति भाष्ये स्पष्टमुक्तम्। उक्तभाष्यमाधारीकृत्य एव कारिकायां आश्रयाद्यर्थाः द्वितीयादिनामर्थाः इति प्रोक्तवान्। तत्र द्वितीयाविभक्त्यर्थविषयकविचारः प्रबन्धेऽस्मिन् आलोच्यते।

**द्वितीयाविभक्त्यर्थविमर्शः**

द्वितीयाविभक्तेः आश्रयार्थो भवतीति दीक्षितेनोक्तम्। ननु कर्मणि द्वितीया इति सूत्रेण कर्मणि अर्थे द्वितीया विधीयते इति आश्रयार्थः तस्याः कथं सम्भवति इति चेत्

---

* शोधच्छात्रः रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्, वेलडमठः, हावडा-711202, पश्चिमबङ्गः

1. वैयाकरणसिद्धान्तकारिका, 24।
2. व्याकरणमहाभाष्यम्, 1.4.21।

उच्यते। द्वितीयाविधायकं सूत्रमस्ति कर्मणि द्वितीया इति। किं नाम कर्म इति चेत् सूत्रमुक्तं पाणिनिना कर्तुरीप्सिततमं कर्म (अ. 1/4/49) इति। कर्तुः क्रियया ईप्सिततमं कारकं कर्मसंज्ञं स्यादिति सूत्रार्थः अस्य। कर्तुः ईप्सिततममित्यस्य क्रियाजन्यफलाश्रयः इत्यर्थः। तथा हि कर्तुरीप्सिततमं कर्म इति सूत्रे ईप्सिततमशब्दः आप्-धातोः इच्छार्थे सन्प्रत्यये पुनः वर्तमानकालिककर्मार्थे मतिबुद्धिपूजार्थेभ्यश्च (अ. 3/2/18) इति सूत्रेण क्तप्रत्यये कृते निष्पन्नात् ईप्सितशब्दात् अतिशयार्थे तमप्-प्रत्ययविधानेन सिद्ध्यति। तस्य ईप्सिततमशब्दस्य योगे क्तस्य च वर्तमाने (अ. 2/3/67) इति सूत्रेण कर्तुरिति पदे कर्त्रथे षष्ठी विहिता। अतः कर्त्रा स्वव्यापारेण सम्बन्धुमिष्यमाणम् ईप्सिततमं कारकं कर्मसंज्ञं भवतीत्यर्थः आयाति। तत्र कर्तुः सम्बन्धः कर्तृविशेषणव्यापारेण एव ग्राह्यः। फलतं क्रियाजन्यफलाश्रयस्य कर्मसंज्ञा सिद्ध्यति। एवं लक्षणकरणेन तथायुक्तं चाऽनीप्सितम् (अ. 1/4/50) इति सूत्रेण विहितस्य अनीप्सितकर्मणः अपि संग्रहो भवति यतो हि उक्तलक्षणेन समेषामपि कर्मणां कर्मसंज्ञा सिद्ध्यति। ईप्सितत्वानीप्सितत्वयोः केवलं कर्मसंज्ञाविधाने एव उपयोगो भवति, शाब्दबोधे तयोः प्रतीतिर्नजायते। अतः वाच्यार्थकोटौ तयोः न प्रवेशः। इत्थं क्रियायाः फलस्य च धातुनैव लाभाद् आश्रय एव द्वितीयार्थः। आश्रयतायाः निरूपकाः कर्तृकर्मफलव्यापारादयः नैके भवन्ति। निरूपकणाम् अनेकत्वात् आश्रयत्वानि अपि अनेकानि भवन्ति। येन शक्तिनामपि अनेकत्वात् आश्रयत्वं शक्यतावच्छेदकं न स्यात्, अनुगतस्य एकस्यैव धर्मस्य शक्यतावच्छेदकत्वात्। अतः आश्रयत्वस्य स्वरूपमुच्यते कौण्डभट्टेन- 'तत्त्वञ्चाखण्डशक्तिरूपमवच्छेदकम्'[1] इति। तत्त्वम् अर्थात् आश्रयत्वम् अखण्डोपाधिरूपेण अवच्छेदकं भवति। तस्यार्थः फलाश्रयत्वेन, व्यापाराश्रयत्वेन इत्यादिरूपेण यदा आश्रयत्वं तिष्ठति तदा सखण्डोपाधिः भवति। किन्तु यदा केवलनम् आश्रयः इत्युच्यते, तदा आश्रय इत्युनगतव्यवहारात् इतरपदार्थघटित-धर्मेभ्यः भिन्नत्वात् अखण्डोपाधिः भवति। एवम् आश्रयत्वस्य अखण्डोपाधित्वात् यथा बहुषु घटेषु विद्यमानं घटत्वमेकमेव, तद्वद् बहुषु आश्रयेषु वर्तमानम् आश्रयत्वमेकमेव अस्ति। तस्माद् आश्रयत्वं शक्यतावच्छेदकं भवति।

ओदनं पचति इत्यत्र कर्तृनिष्ठपाकक्रियाजन्यविक्लित्तिरूपफलाश्रयत्वात् ओदनस्य कर्मत्वं सिद्धम्। घटं करोति इत्यत्र च उत्पत्तिरूपफलाश्रयत्वात् घटस्य कर्मत्वम्। अतः कर्मणि द्वितीया इति सूत्रेण तयोः द्वितीयाविभक्तिः विहिता। घटं जानाति इत्यत्र आवरणभङ्गरूपधात्वर्थफलाश्रयत्वात् घटस्य कर्मत्वम्। ज्ञाधातोः ज्ञानजन्यम् आवरण-भङ्गरूपफलमित्यर्थस्वीकारे भूतकालिकभविष्यत्कालिकघटयोश्च सत्ताभावात् कस्यापि

1. वैयाकरणभूषणसारः, पृ.- 149।

आश्रयत्वं भवितुं नार्हति। फलतः अतीतं घटं जानामि, भविष्यतं घटं जानामि इत्यादिप्रयोगः अनुपपन्नः स्यात्। तस्मादेव अतीतानागतादिपरोक्षस्थलेऽपि ज्ञानजन्यावरणभङ्ग- रूपफलमेव ज्ञाधात्वर्थ इति स्वीकार्यम्। ननु फलाश्रयस्य कर्मत्वस्वीकारे अतीत-अनागतादिपरोक्षस्थले घटादीनां अविद्यमानत्वात् फलाश्रयत्वं तेषां न सिद्ध्यति, अतः कर्मसंज्ञापि न प्राप्नोतीति शङ्का क्रियते। अस्याः समाधानमुच्यते। नैयायिकैः यथा अतीतानागतादिस्थले घटादीनाम् अविद्यमानत्वेऽपि विषयतासम्बन्धेन ज्ञानाश्रयतया कर्मत्वं स्वीक्रियते, इह व्याकरणशास्त्रेऽपि तथैव स्वीक्रियते। अथवा सांख्यशास्त्रोक्तसत्कार्यवादस्य आधारेणापि कर्मत्वमुपपद्यते। तथा हि- सर्वेऽपि पदार्थाः उत्पत्तेः प्राक् सूक्ष्मरूपेण स्वकारणे एव वर्तन्ते। यथा मृत्तिकायां सूक्ष्मरूपेण घटो वर्तते एव, दण्डचक्रादिना तस्य स्थूलरूपेण अभिव्यक्तिर्भवति। उक्तसच भर्तृहरिणा-

**तिरोभावाऽभ्युपगमे भावानां सैव नास्तिता।**
**लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते।।**[1]

अर्थात् स्थूलवस्तुनः स्वस्य सूक्ष्मकारणे तिरोभाव एव नाश इत्युच्यते। तिरोभावसमये एव नश्यतीति प्रयोगः क्रियते। अत एव घटस्य तिरोधाने सत्यपि सूक्ष्मरूपेण स्वकारणे विद्यमानत्वाद् आवरणभङ्गरूपफलस्य आश्रयो भवत्येव। तेन कर्मसंज्ञायां द्वितीया-विभक्तिरुत्पद्यते।

क्रियाजन्यफलाश्रयस्य कर्मसंज्ञा भवतीति स्वीकारे चैत्रो ग्रामं गच्छति इत्यत्र पूर्वपक्षिभिः दोषः प्रदर्श्यते। तद्यथाः चैत्रो ग्रामं गच्छति इत्यत्र क्रियाजन्यसंयोगरूपफलस्य आश्रयो यथा ग्रामः, तथैव चैत्रोऽपि वर्तते, संयोगस्य द्विष्ठत्वात्। अतः फलाश्रयत्वात् चैत्रस्यापि कर्मसंज्ञाया 'चैत्रश्वचैत्र गच्छति' इत्येवं प्रयोगापत्तिः स्यात्। एवं प्रयागतः काशीं गच्छति इत्यत्र प्रयागं गच्छति इति प्रयोगापत्तिः स्यात्। यतो हि गम्-धात्वर्थफलं यथा उत्तरदेशसंयोगो वर्तते, तद्वत् पूर्वदेशविभागोऽपि भवति। अतः क्रियाजन्यसंयोगरूप-फलाश्रयो यथा काशी वर्तते, तथैव विभागरूपफलाश्रयः प्रयागो वर्तते इत्यतः तस्यापि कर्मसंज्ञा प्राप्नोति। अस्य समाधानमुच्यते। चैत्रो ग्रामं गच्छति इत्यत्र यद्यपि फलाश्रयत्वेन ग्रामस्येव चैत्रस्यापि कर्मसंज्ञा प्राप्नोति तथापि गम्-धात्वर्थव्यापाराश्रयत्वेन तस्य कर्तृसंज्ञापि प्राप्नोति। कर्तृसंज्ञया च कर्मसंज्ञा बाध्यते, कर्तृसंज्ञायाः परत्वात्। अतः कर्मसंज्ञाया अभावात् चैत्रपदे द्वितीयाविभक्तिरपि न प्राप्नोति। यतो हि कर्मणि द्वितीया इति सूत्रेण कर्मसंज्ञायामेव द्वितीया उत्पद्यते। अन्यथा कर्मसंज्ञाया अभावेऽपि यदि कर्मत्वलक्षणमात्रेण द्वितीया स्यात् तदा गमयति कृष्णं गोकुलम् इतिवद् पाचयति कृष्णेन इत्यत्रापि

1. वाक्यपदीयम्, 3.1.38।

कृष्णपदात् द्वितीयापत्तिर्भवति, णिच्प्रत्ययार्थे विशेषणभूतस्य विक्लित्त्यनुकूलव्यापाररूपफलस्य आश्रय कृष्णः अस्ति इति हेतोः अतः कर्मसंज्ञाभावात् चैत्रो ग्रामं गच्छति इत्यत्र चैत्रपदे न द्वितीयापत्तिः।

नैयायिकैः उच्यते यद् कर्तृसंज्ञया कर्मसंज्ञाबाधात् चैत्रश्चैत्रं गच्छति इति प्रयोगो न स्यात्, किन्तु धात्वर्थव्यापारस्य संयोगरूपफलस्य च आश्रयत्वेन चैत्रकर्तृक-चैत्रकर्मकगमनमिति शाब्दबोधस्तत्र स्यादिति। तत्र कौण्डभट्टानां मतमस्ति यद्- यस्य तु धात्वर्थफलविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधं प्रति आश्रयस्य उपस्थितिः कारणं भवतीति व्युत्पत्तिः वर्तते तस्य तु चैत्रकर्मकगमनमिति शाब्दबोधे न कापि आपत्तिः। अथवा तथा अनिष्टबोधस्य वारणार्थं एवं कार्यकारणभावः स्वीकर्तव्यः-प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणऽश्रयोपस्थितिः हेतुः इति। एतेन चैत्रो ग्रामं गच्छति इत्यत्र गम्-धात्वर्थव्यापारस्य अधिकरणमेव चैत्रो वर्तते न तु अनधिकरणम्। तस्मात् तादृशकारणाभावात् चैत्रकर्मकगमनमिति शाब्दबोधस्तत्र न भवति। प्रयागतः काशीं गच्छति इत्यत्र तु प्रयोगस्य कर्मत्वं सम्भावितमपि नास्ति। यतो हि क्रियाजन्यफलाश्रयः कर्म इति लक्षणस्य समभिव्याहृतधात्वर्थक्रियाजन्यफलाश्रयस्यैव कर्मत्वमिति विवक्षितम्। प्रकृते समभिव्याहृतधातुः वर्तते गम्-धातुः, तस्य फलमस्ति उत्तरदेशसंयोगः, अतः उत्तरदेशसंयोगाश्रयस्यैव कर्मसंज्ञा भवति। परन्तु प्रयागः नात्र उत्तरदेशसंयोगस्य आश्रयः, अपि तु पूर्वदेशविभागाश्रय एव। पूर्वदेशविभागरूपफलञ्च न गम्-धात्वर्थः अतः प्रयागतः काशीं गच्छति इत्यत्रापि प्रयागपदे द्वितीयापत्तिरूपदोषो नास्तीति। नैयायिकैस्तु चैत्रं गच्छति इति प्रयोगवारणाय धात्वर्थक्रियायां परसमवेतत्वम् इति विशेषणं प्रदीयते। तेन लक्षणस्वरूपं भवति-द्वितीयाप्रकृतित्वेन विवक्षितार्थ-भिन्नसमवेतव्यापारजन्यं यत्फलं तादृशफलाश्रयस्यैव कर्मत्वमिति। अर्थात् द्वितीयाविभक्तेः प्रकृतित्वेन विवक्षितो योऽर्थः तस्माद्भिन्ने समवायसम्बन्धेन विद्यमान यो व्यापारः तादृशव्यापारजन्यफलाश्रय एव कर्मसंज्ञो भवतीति। प्रकृते द्वितीयाप्रकृतित्वेन विवक्षितोऽर्थः अस्ति चैत्रः, तस्य भेदो न सम्भवति। अतः तत्र समवायसम्बन्धेन विद्यमानो यो व्यापारः, तज्जन्यफलाश्रयस्य कर्मसंज्ञा न भवति। तस्मात् चैत्रं गच्छति इति प्रयोगापत्तिर्नास्ति। प्रयागतः काशीं गच्छति इत्यत्र च उक्तदोषवारणाय नैयायिकैः फले धात्वर्थतावच्छेदकम् इति विशेषणं प्रदीयते। तेन कार्यकारणभावस्वरूपं भवति-द्वितीयाप्रकृतित्वेन विवक्षितार्थ-भिन्नसमवेतव्यापारजन्यं यद्धात्वर्थतावच्छेदकं फलं तादृशफलाश्रयस्यैव कर्मत्वमिति। एवञ्च प्रयागतः काशीं गच्छति इत्यत्र द्वितीयाप्रकृतित्वेन विवक्षितार्थोऽस्ति प्रयागः, तस्माद् भिन्नः चैत्रः, तत्र समवायसम्बन्धेन विद्यमानो यो व्यापारः, तादृशव्यापारजन्य-धात्वर्थतावच्छेदकं फलमस्ति उत्तदेशसंयोगः, अतः तस्य अनाश्रयत्वात् प्रयागे न

कर्मत्वापत्तिः। गम्–धात्वर्थतावच्छेदकं फलम् उत्तरदेशसंयोगः, न तु पूर्वदेशविभागः। यतो हि गम्–धातोः अर्थः अस्ति–उत्तरदेशसंयोगानुकूलव्यापारः। तस्य च आश्रयः प्रयागो नास्तीति हेतोः तत्र द्वितीयापत्तिर्नास्ति।

नैयायिकानामिदं मतं खण्ड्यते वैयाकरणैः– लक्षणे परसमवेतत्वपदोपादानेन तस्यापि द्वितीयावाच्यार्थतया गौरवं भवतीति हेतोः तथा लक्षणं न स्वीकार्यम्। ननु व्यापारजन्यफलाश्रयत्वं कर्मत्वमिति लक्षणे कः दोषः, चैत्रश्चैत्रं गच्छति इति प्रयोगापत्तिः, उत चैत्रकर्तृकं चैत्रकर्मकं गमनमिति शब्दबोध इति प्रश्नः क्रियते वैयाकरणैः नैयायिकान् प्रति। कारणं नैयायिकानां परसमवेतत्वनिवेशेऽपि चैत्र गच्छति इति दोषवारणसम्भवेऽपि अन्य दोषः तदवस्थैव वर्तते। यथा गमयति कृष्णं गोकुलम् इत्यत्र द्वितीयाप्रकृतित्वेन विवक्षितोऽर्थः अस्ति कृष्णः, तद्भिन्ने उद्धवादौ समवेतो यो प्रेरणरूपव्यापारः, तज्जन्यफलाश्रयस्य कृष्णस्य कर्मसंज्ञा यथा भवति एवं पाचयति कृष्णेन गोपः इत्यत्रापि कृष्णपदे प्राप्नोति। तथा हि पाचयति कृष्णेन गोपः इत्यत्र द्वितीयाप्रकृतित्वेन विवक्षितः अर्थः अस्ति कृष्णः, तद्भिन्ने गोपे समवेतो व्यापारो विक्लित्त्यनुकूलव्यापारानुकूलव्यापारः, तज्जन्यफलमस्ति विक्लित्त्यनुकूलव्यापारानुकूलव्यापारः, तस्य आश्रयत्वात् कृष्णस्य कर्मसंज्ञायां द्वितीयापत्तिरूपदोषः तदवस्थैव वर्तते। तथा चैत्रः तण्डुलं पचति इतिवद् तण्डुलः पच्यते स्वयमेव इत्यत्रापि तण्डुलपदे द्वितीयाविभक्तेः अतिप्रसङ्गो भवति। यतो हि तण्डुलः पच्यते स्वयमेव इत्यत्रापि तण्डुलाद् भिन्ने काष्ठे समवेतो यः अग्निसंयोगरूपव्यापारः, तज्जन्यविक्लित्तिरूपफलाश्रयत्वात् तण्डुलस्य कर्मसंज्ञा प्राप्नोति। वैयाकरणमते तु कर्तृसंज्ञया कर्मसंज्ञाबाधात् उक्तप्रयोगे तण्डुलस्य कर्मसंज्ञाभावात् न द्वितीयापत्तिः। अतः लक्षणे परसमवेतत्वपदोपादानेपि पाचयति कृष्णेन गोपः, तण्डुलः पच्यते स्वयमेव इत्यादौ अतिप्रसङ्गात् तन्मतं न स्वीक्रियते। शाब्दबोधस्य च वारणं तथा व्युत्पन्नानामिति कथनेन अर्थात् बोधः व्युत्पत्त्यनुसारी वर्तते इत्यनेन पूर्वमेव उक्तम्। अर्थात् यस्य सामान्यतः व्यापारजन्यफलाश्रयस्य कर्मसंज्ञा भवतीति व्युत्पत्तिरस्ति तस्य तण्डुलकर्मकविक्लित्तिः इति बोधः भवति। यस्य तु व्यापारानधिकरणफलाश्रयस्य कर्मसंज्ञा भवतीति व्युत्पत्तिः तस्य सर्वत्र तण्डुलकर्मकविक्लित्तिरिति बोधो न स्यादित्याशयः।

**कर्मणः सप्तविधत्वम्–**

कर्मकारकं सप्तविधं भवति। प्रथमतः कर्म द्विविधं भवति–ईप्सितकर्म, अनीप्सितकर्म इति। तत्र ईप्सितकर्मणः त्रयो भेदाः– निर्वर्त्यं विकार्यं प्राप्यञ्चेति। अनीप्सिकर्मणश्च चत्वारो भेदाः– उदासीनम् अनीप्सितं अकथितम् अन्यपूर्वकञ्चेति। क्रमेण एतेषां सप्तविधकर्मणां स्वरूपम् उदाहरणञ्च प्रस्तूयते–

### 1. निर्वत्यकर्म–

निर्वर्त्यते निष्पाद्यते यत् तन्निर्वत्यम्। निर्वत्यं कर्म तदेव उच्यते यस्य नूतनतया उत्पत्तिर्जायते अथवा पूर्वतः विद्यमानस्य यस्य कार्यकारणभावेन प्रकाशो जायते। यथा– घटं करोति इत्यत्र घटस्य निष्पाद्यतया निर्वत्यं कर्म भवति।

### 2. विकार्यकर्म–

यस्य कर्मणः परिणामित्वेन विवक्षा क्रियते तत् विकार्यकर्म इत्युच्यते। एतच्च द्विविधं भवति– प्रकृत्युच्छेदसम्भूतं, प्रकृतिगुणान्तरोत्पन्नम्। प्रकृतेः नाशेन उत्पन्नस्य उदाहरणं भवति– काष्ठं भस्म करोति। अत्र भस्मनः प्रकृतेः काष्ठस्य नाशेन भस्म उत्पन्नम् अतः भस्म विकार्यकर्म। द्वितीयस्य उदाहरणं भवति– सुवर्णं कुण्डलं करोति। कुण्डलस्य प्रकृतिः वर्तते सुवर्णं, तस्यैव रूपपरिवर्तनेन कुण्डलम् उत्पन्नम्। अतः कुण्डलं विकार्यकर्म भवति।

### 3. प्राप्यकर्म–

यत्र दर्शनाद् अनुमानाद्वा क्रियाकृतविशेषो न जायते तत् प्राप्यकर्म इत्युच्यते। यथा– देवदत्तः घटं पश्यति। देवदत्तः ग्रामं गच्छति। अत्र देवदत्तस्य दर्शनक्रियया गमनक्रियया वा घटे अथवा ग्रामे किमपि परिवर्तनं न जायते।

### 4. उदासीनकर्म–

अनिच्छया प्राप्तकर्म उदासीनकर्म इत्युच्यते। यथा– ग्रामं गच्छन् तृणं स्पृशति। अत्र तृणम् उदासीनकर्म भवति।

### 5. अनीप्सितकर्म–

कर्तुः यद् अत्यन्तमनिष्टं द्वेष्यं वा भवति तदेव अनीप्सितकर्म इत्युच्यते। यथा– विषं भुङ्क्ते।

### 6. अकथितकर्म–

अपादानादिभिः अविवक्षितं कारकम् अकथितकर्म इत्चुच्यते। यथा– गां दोग्धिपयः। गोः अपादानत्वेन अविवक्षायां कर्मसंज्ञा अत्र सिद्धा।

### 7 अन्यपूर्वककर्म–

यत्र अधिकरणादिसंज्ञान्तरप्राप्तिरस्ति किन्तु अध्यादिपूर्वकशीङादिधातोः आधारेण

सूत्रविशेषेण कर्मसंज्ञा विधीयते तत् अन्यपूर्वककर्म इत्युच्यते। यथा– अधिशेते वैकुण्ठं हरिः।

**सहायकग्रन्थसूची–**

1. कौण्डभट्टः। 1998। वैयाकरणभूषणसारः (सावित्रीहिन्दीव्याख्यापेतः)। मिश्रः, आद्याप्रसादः (सम्पा०)। वाराणसीः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

2. दीक्षितः, पुष्पा। 2010। अष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः)। नवदेहलीः संस्कृतभारती।

3. भट्टोजिदीक्षितः। 2010। वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीसहिता)। शर्मा, परमेश्वरानन्दः (सम्पा०)। वाराणसीः मोतिलालबनारसीदासः।

4. कौण्डभट्टः। 2006। वैयाकरणभूषणसारः (प्रभादर्पणव्याख्याद्वयोपेतः)। पञ्चोली, बालकृष्णः (सम्पा०)। वाराणसीः चौखम्बासंस्कृतसंस्थानम्।

5. पतञ्जलिः। 2013 व्याकरणमहाभाष्यम् (प्रदीपोद्योतभावबोधिनीहिन्दीव्याख्या–समुल्लसितम्)। त्रिपाठी, जयशङ्करलालः (सम्पा०)। वाराणसीः कृष्णदास–अकादेमी।

6. भर्तृहरिः। 2015। वाक्यपदीयम्। मिश्रः, सुधाकरः (सम्पा०)। कलकाताः बनारस मार्केन्टाइल कम्पनी।

✦✦✦

# काश्मीरस्थ-काव्यशास्त्रीयाचार्याणां सिद्धान्तेषु नवाचारः (ध्वनिवाद्याचार्याणामालोके)

**रमेशचन्द्रेनैलवालः***

संस्कृतकाव्यशास्त्रस्य विविधकेन्द्राणि सन्ति येषु शारदादेशः मुख्यः यतोहि काश्मीराचार्यैः प्रतिपादिताः सिद्धान्ताः सर्वथा नवाचारयुक्तास्सन्ति। शब्दार्थचिन्तन-विषयस्यावधारणा वैयाकरणेभ्योऽपि अनुकरणीयः वर्तते, काव्यस्य सौन्दर्यप्रतिपादनाय अभिज्ञानाय च व्यञ्जनाशक्तिः सर्वथा अनिवार्या, अतः तस्यैव स्थापने नवीनस्वरूपप्रतिपादने च ध्वनिवाद्याचार्याः प्रयत्नरताः दृश्यन्ते। व्यञ्जनाशक्त्या विना वाक्यार्थज्ञानन्तु सम्भवति, परं न काव्यार्थज्ञानम्। काव्यार्थज्ञानाय, रसास्वादनाय, कान्तासम्मितकाव्यस्योत्पत्तये, सहृदयहृदयाह्लादाय, शास्त्रान्तरेभ्यः काव्यस्य वैशिष्ट्यावबोधाय च व्यञ्जनाशक्तिः सर्वथा अनिवार्या। व्यञ्जनाशक्तेः स्थापना काश्मीरस्थपरम्परायामतीव महत्त्वपूर्णा, अत एव न्याय-मीमांसा-साङ्ख्यदर्शनैः प्रभाविताः नैकाः आचार्याः ध्वनिसिद्धान्तस्य खण्डने प्रयत्नरताः दृश्यन्ते एषु भट्टनायक-मुकुलभट्ट-महिमभट्टादयः प्रमुखाः। ध्वनितत्त्वस्य चिन्तनं यावदुत्कृष्टं सूक्ष्मञ्च वर्तते यत् एते आचार्याः अपि व्यङ्ग्यार्थस्य ध्वनितत्त्वस्य च खण्डनं न, अपितु व्यञ्जनाशक्तेः एव खण्डनं कुर्वन्ति। ध्वनिसिद्धान्तस्य स्थापनानन्तरमात्मत्त्वदृशा काव्यस्वरूपचिन्तनं, नवीनदृष्ट्या सुस्थितकाव्यभेदानां वर्गीकरणं, गुण-अलङ्कार-सङ्घटनादीनां काव्यतत्त्वानां नियमनं, काव्यदृशा दोषाणां स्वरूपनिर्णयं, कविप्रतिभाया विशेषचिन्तनञ्चेत्यादीनि नैकानि नवीनपरिवर्तनानि काव्यशास्त्रीयपरम्परायां जातानि।

**सहृदत्वविषये काश्मीराचार्याणामवधारणा**- काव्यस्य पूर्णतायां कवि-पाठक-काव्यानां समं वैशिष्ट्यमिति काव्यशास्त्रपरम्परायां नवमशताब्द्याः परिदृश्यते। अतः पक्षत्रयाणां चर्चा एतैराचार्यैः विहिता। ध्वन्यालोकस्य प्रथमोद्योते ध्वनिसिद्धान्तस्य स्थापना तथा ध्वनिविरोधिमतानां खण्डनं सहृदयमभिलक्ष्य विहितम्, तथा चतुर्थे उद्योते कविमभिलक्ष्य

* शोधच्छात्रः, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली

प्रतिभायाः निरूपणं, शेषे काव्यनिरूपणविषयाः आचार्येण वर्णिताः। ध्वनिसिद्धान्तस्य स्थापना सहृदयं परिलक्ष्य एव जाता। आनन्दवर्धनस्य सिद्धान्तवाक्यमेव[1] सहृदयसिद्धान्तस्य काव्यसन्दर्भे महत्तां प्रकटयति। सहृदयस्यानुसारेण काव्यं सिध्यति अर्थात् सहृदय-हृदयाह्लादकत्वमेव काव्यपदवीं भजते[2]। सः सहृदयः काव्यतत्त्वार्थविज्ञोऽपि स्यात्, तदा एव सः काव्यं ज्ञातुं पठितुं वा समर्थः भवति, काव्यतत्त्वार्थविमुखानान्तु न काव्यपठनलाभः। ध्वन्यालोकस्य रचना तु सहृदयान्नाधारीकृत्य एवाभवत्, यतोहि सर्वाणि काव्यसिद्धान्तानि तु सहृदयमभिलक्ष्यैव चिन्तिताः वर्तन्ते। स्वयं लोचनकारः अभिनवगुप्तः सहृदयलोचनमिति नाम्ना ध्वन्यालोकग्रन्थस्योल्लेखः पुष्पिकायां करोति[3]। अस्यः प्रभावः काश्मीराचार्येषु अभिनवगुप्त-कुन्तक-मम्मट-रुय्यकादिषु दृश्यते, तैरपि काव्यसिद्धान्तानि सहृदयमभिलक्ष्य प्रतिपादितानि। सहृदयस्य विस्तृतं वर्णनं चतुर्थेऽध्याये क्रियते।

**व्यञ्जनावृत्तेः प्रवेशः** - भारतीयकाव्यशास्त्रीयपरम्परायां समये-समये अनेकाः नवीनसम्प्रदायाः उदिताः। ध्वनिसिद्धान्तः व्यञ्जनावृत्त्याश्रितः एव, नवमशताब्द्यानन्तरमेव काव्यसौन्दर्यं कलान्तरेभ्यः विशिष्टमिति सर्वैरङ्गीकृतम्। यैः काव्यशास्त्रे नवीनाः सिद्धान्ताः प्रचलितास्स्थापिताश्च, तेष्वेव ध्वनिसम्प्रदाय अप्रतिमः, सम्प्रदायस्यास्य उद्भवः नवमशताब्द्यामभवत्। सम्प्रदायस्य प्रवर्तकः आचार्यानन्दवर्धनाचार्योऽस्ति। ध्वनिशब्दस्य यदि व्युत्पत्ति क्रियते चेत् तदा विविधार्थाः प्राप्यन्ते। पञ्चधा निर्वचनेन ध्वनिसम्बद्धा अर्थाः गृह्यन्ते। ध्वनिशब्देन व्यञ्जकशब्दस्य, व्यञ्जकार्थस्य, व्यङ्ग्यार्थस्य, व्यञ्जना-व्यापारस्य, व्यङ्ग्यप्रधानकाव्यस्य व ग्रहणं क्रियते। ध्वनिलक्षणे एव आचार्येण उक्तं यत्र शब्दः स्वार्थम्, अर्थोऽपि स्वरूपं गौणीकृत्य व्यङ्ग्यनमर्थं परिस्फुरति स एव काव्यविशेषः ध्वनिः कथ्यते। ध्वनिलक्षणे आचार्येण आनन्दवर्धनेन उक्तम् - यत्र शब्दार्थौ स्वार्थं गौणरूपेणोपस्थाप्य व्यङ्ग्यमर्थम् अभिव्यङ्क्तः, तदा ध्वनिः। तथाविधं काव्यं ध्वनिः ध्वनिकाव्यं वा निगद्यते[4]। एतानि निर्वचनानि केवलं व्याकरणाधारितानि निरुक्ताधारितानि वा न वर्तन्ते अपितु प्रायः विविधस्थलेषु एतेषां प्रयोगः प्राप्यते।

**काव्यस्वरूपचिन्तनम्** - भारतीयवाङ्मयमतिप्राचीनं सनातनञ्च, तथापि काव्य-शास्त्राचार्यैः समये समये स्वप्रतिभया विविधकवीनां रचानानामनुशीलनेन च काव्यस्वरूपस्य

---

1. तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्। ध्व.लो. 1
2. .........सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्। ध्व.लो. 1, वृत्तिः, पृ. 22
3. इति श्रीमहामाहेश्वराचार्यवर्याभिनवगुप्तोन्मीलिते सहृदयालोकलोचने ध्वनिसङ्केते प्रथम उद्योतः। ध्व.लो.लो., पुष्पिका
4. यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थो। व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥ ध्व.लो. 1-13

नैकाः सिद्धान्ताः निरूपिताः। काश्मीराचार्याणामनुशीलनेन विज्ञायते यत् तैः पूर्वं काव्यस्य बाह्यपक्षेऽधिकं महत्त्वं प्रदत्तम्, तदालङ्काराणां विकासः शब्दार्थयोः काव्यत्वञ्चैतैराचार्यैः स्वीकृतम्। प्रायः काश्मीरस्थपरम्परायां नवमशताब्द्यां यावत् अलङ्काराणां निर्माणे तेषां विनियोजने चिन्तनं प्राप्यते, अलङ्कारचिन्तनस्य विकासक्रमे रीतिसिद्धान्तस्य वक्रोक्तेश्च सूक्ष्ममीमांसया एते नवीनप्रस्थानाः जाताः। रामायणमहाभारतप्रभृतीनां महाकाव्यानामनुशीलनेन व्यङ्ग्यनिष्ठालङ्काराणां विवेचनेन भर्तृहरिप्रभृतीनां वैयाकरणानां शब्दार्थविषयकचिन्तनेन च ध्वनिनामकं प्रस्थानं काश्मीराचार्यैः काव्यानुरूपतया सुदृढीकृतम्। एतत्काश्मीराचार्याणां वैशिष्ट्यमस्ति यत् तै विविधशास्त्रेभ्यः सिद्धान्तान्स्वीकृत्य काव्यानुरूपतया स्थापिताः। काव्यस्वरूपनिर्णयेऽपि काश्मीराचार्याः नैकानि तत्त्वानि काव्यसिद्धान्ततया स्थापितवन्तः। येषु रस-अलङ्कार-रीति-ध्वनि-वक्रोक्ति-औचित्यतत्त्वाधारेण काव्यस्वरूपं विचिन्ततम्। रीति-अलङ्कार-वक्रोक्तिप्रस्थाने च केवलं रीत्यलङ्कारवक्रोक्तितत्त्वानामेव प्रामुख्यमस्ति, तत्त्वान्तराणि तु न विशिष्टतया अत्र प्रतिपादितानि सन्ति। रसध्वनिसिद्धान्तौ तु प्रायः समौ, परवर्तिकाले द्वावेव सिद्धान्तौ पर्यायतया दृश्येते। रसविषयस्तु सर्वदा व्यङ्ग्य एव, वस्त्वलङ्कारादिषु रसव्यतिरिक्तविषयेऽपि ध्वनिः सम्भवतीति काश्मीराचार्याणां मतम् तथा च ध्वनेः सम्यग्विवेचनाय औचित्यस्य वक्रोक्तेश्चावश्यकतापि ध्वनिवाद्याचार्यैः चिन्तिता। ध्वनिसिद्धान्तः ध्वनिनिष्ठः नास्ति, अपितु सम्पूर्णस्य संस्कृतकाव्यशास्त्रस्य विविधसिद्धान्तानाञ्च समन्वयानुरूपमेतैराचार्यैः स्थापितः।

यद्यपि सम्पूर्णस्य काव्यचिन्तनस्य मूलं शब्दार्थावेव, शब्दार्थमधिकृत्यैव विविधसिद्धान्ताः परिस्फुरिताः, शब्दार्थयोः वैचित्त्यमेव ध्वनिं व्यङ्ग्यं वा प्रकटीकरोति। शब्दार्थयोः चमत्कारस्तु सर्वेषु काव्यग्रन्थेष्वुपलभ्यते एव, परं काव्यानां विशदालोचना नवमशताब्द्याः सुव्यवस्थितं जातम्, यत्र सहृदय-कवि-काव्यानामाधारेण चिन्तनमभवत्। अत्रापि मुख्यतः सहृदयस्यैव प्रामुख्यमासीत्, यतोहि सहृदयस्य परीक्षया एव काव्यमुत्तमतां प्राप्नोति। नवमशताब्द्यानन्तरं भारतीयकाव्यस्वरूपचिन्तनमान्तरिकतत्त्वमभिलक्ष्य सुचिन्तितं वर्तते, यतोहि अत्र काव्यस्य मूले ध्वनितत्त्वमस्ति, तथा मूलमभिलक्ष्यैव बाह्यपक्षाः स्थापिताः। अत्र सर्वेषां काव्यतत्त्वानां समानं महत्त्वं वर्तते, अलङ्कार-वृत्ति-सङ्घटना-औचित्यादीनि सर्वाणि तत्त्वान्तराणि काव्यात्मभूतस्य ध्वनेः उपस्कारभूतानि। नवमशताब्द्याः षोडशशताब्दीं यावत्काश्मीराचार्याः समन्वयदृशा काव्यस्य सुस्थितस्वरूपाय प्रयत्नरताः दृश्यन्ते। मम्मटस्य काव्यलक्षणमप्येतत्प्रकटीकरोति। मम्मटः काश्मीरस्थपराम्परायाः सम्यगनुशीलनेनैव स्वलक्षणं तथा सर्वेषां काव्यतत्त्वानां स्वरूपं प्रददाति। काव्यस्वरूप-चिन्तनानुक्रमे कथं काव्यं करणीयं, कथं काव्यतत्त्वानि विनियोजनानि इत्यादीनि विविधविषयाण्यपि आचार्यैः चर्चितानि। काव्यतत्त्वस्य काव्यशैल्या च विषये भेदं

स्थापयित्वा आनन्दवर्धनाभिनवगुप्तादिभिः वृत्ति-रीति-अनुप्रासभेदानामेकत्वं स्थापितम्[1]। एवमेव काव्यस्वरूपचिन्तने नवमशताब्द्याः दृश्यश्रव्यकाव्ययोः भेदोऽपि समाप्तो जातमः, पूर्वं नाट्यश्रव्ययोः पृथक्-पृथग्परम्परा परिदृश्यते। परं सर्वप्रथममभिनवेन अयं भेदः न स्वीकृतः इति ज्ञायते। अभिनवस्य रसव्याख्या काव्यसन्दर्भे नाट्यसन्दर्भे समाना एव।

**रसचिन्तनेऽभिव्यक्तिवादस्य प्रवेशः** - काश्मीराचार्याणां सिद्धान्तेषु अभिव्यक्तिवादः प्रमुखः। काश्मीरस्थपरम्परायां रससूत्रस्य नैकाः व्याख्याः जाताः, तेषु अद्यावधि अभिनवगुप्तस्यैव व्याख्या सर्वासु मुख्या या अद्यावधि यावत् सर्वविद्वद्ग्राह्या च वर्तते। सिद्धान्तस्यास्य वैशिष्ट्यमस्ति यदत्र सहृदयान्नभिलक्ष्य रससूत्रं व्याख्यायितं वर्तते, अन्यासु व्याख्यासु दर्शकः श्रोता वा गौणो विद्यते। अस्याः व्याख्यायाः अपरो हेतुः शैवदर्शनाधारिता पृष्ठभूमिः अस्ति। यद्यपि व्याख्यान्तराण्यपि विविधदर्शनपृष्ठभूमिपराणि वर्तन्ते, परं एते दार्शनिकविधाः व्यवहारिकजगति न तथा सामान्यमानवैः प्रत्यक्षीक्रियते। शैवदर्शनस्य विविधसिद्धान्तस्तु व्यवहारिकजगत्यपि सत्यतयावभासते। न्याय-मीमांसा-साङ्ख्यदर्शनाधारितव्याख्याः तर्कपूर्णाः वर्तन्ते, परं सहृदयाय नास्ति विशिष्टोऽवकाशः। भट्टनायकस्य व्याख्या सहृदयाधारिता तु वर्तते, परं तत्र परम्पराविरुद्धं द्वयोः नवीनव्यापारयोः सङ्कल्पना क्रियते। अभिनवगुप्तः रसास्वादनाय रसविषयारम्भः सहृदयानुभवाधारेण करोति, यः कल्पनाशक्तिसम्पन्नः रसानुभवानन्दप्रापकः भवति एष एव शास्त्रेऽधिकारी कथ्यते[2]। सहृदयपरिभाषायां गुणत्रयाणामुल्लेखं (विशदीभूते मनोमुकुरे, वर्णनीयतन्मयीभवन- योग्यता, स्वहृदयसंवादभाजः) अभिनवगुप्तः करोति। अर्थात् सहृदयस्य हृदयः पवित्रो भवेत् यः रङ्गमञ्चे प्रदर्शितनाट्यं दर्पणवत् नैर्मल्येन प्रतिबिम्बीकरोति, सः नाट्यवस्तुना सह एकाकारकरणयोग्यतार्हः स्यात्, तथा च कविमनसः तादृग्भावस्यानुभवं कुर्यात् यः नाटकेन काव्येन च सम्प्रेष्यते। सहृदयस्य अधिकारिणो वा नैर्मलत्वमभिनवगुप्तः तन्त्रालोके स्पष्टयति[3]।

अभिव्यक्तिवादे साधारणीकरणं महत्त्वपूर्णम्, तदा रसानुभवेन साधारणीभूतेन सहृदयेन तस्यानुभवः क्रियते। आभासवादस्य शैवदर्शनस्य चतुर्थतत्त्ववदस्यामवस्थायामपि वस्तुनिष्ठांशस्य प्राधान्यं भवति। अभिनवमते अस्मिन्स्थाने तदेव प्राप्तुं शक्यते यद्विघ्नाभावः

1. तस्माद्वृत्तयोऽनुप्रासादिभ्योऽनतिरिक्तवृत्तयो नाभ्यधिकव्यापाराः। अत व्यापारभेदाभावान्न पृथगनुमेयस्वरूपा अपीति वृत्तिशब्दस्य व्यापारवाचिनोऽभिप्रायः। अनतिरिक्तत्वादेव वृत्तिव्यवहारो भामहादिभिर्न कृतः। ध्व.लो.लो., पृ. 19
2. अधिकारी चात्र विमलप्रतिभानशाली सहृदयः। ध्व.लो.लो., पृ. 47
3. नैर्मल्यं चातिनिबिडसजातीयैकसङ्गतिः। स्वस्मिन्नभेदाद्भिन्नस्य दर्शनक्षमतैव या अव्यक्त-प्रकारशस्य नैर्मल्यं तद्गुरूदितान्॥ अभि.गु., (गणेश त्र्यं. देशपाण्डे) पृ. 70, उद्धृतः

भवति। अत्र रसास्वादे सप्तविघ्नाः कथिताः - सम्भावनाविरहः (प्रदर्शितवस्तुनः असम्भाव्यता), स्वगतपरगतत्वनियमेन देशकालविशेषावेशः (प्रमातुः प्रमेयश्च वा देशकाले बन्धनम्), निजसुखदुःखादिविवशीभावः (व्यक्तिगतं हर्षदुःखयोः प्रभावः), प्रतीत्युपाय-वैकल्यम् (पूर्णप्रेरणाभावात् प्रतीतौ स्पष्टतायाः अभावः), स्फुटत्वाभावः (अभिव्यक्तेः अस्पष्टता), अप्रधानता (प्रधानकथ्यस्य गौणे सति) संशययोगश्च (प्रदर्शने स्पष्टताऽभावः)। कारणान्यिमानि रसचर्वणे व्यवधानमुत्पादयन्ति। रसानुभवे स्थायिभावस्य नापितु रसस्यानुभवः भवति, यः स्थायिभावेन सर्वथा विलक्षणः भवति[1]। अस्य स्थितिः तावदेव सिद्ध्यति यावद्विभावादयः तिष्ठन्ति। अतः भरतेन रससूत्रे स्थायिभावानामुल्लेखः न कृतः, यतो हि स्थायिभावानामनुभवः विषयरूपे न भवति। यत्र कुत्रापि स्थायिशब्दस्य प्रयोगः प्राप्यते तदौचित्यकारणादेव। अर्थात् रसविधायकतत्त्वेषु स्थायिभावः प्राधान्यं भजते। नाट्यं काव्यस्य सर्वोत्कृष्टं वस्तु, यतोहि विविधाभिनभयैः नाट्यं साक्षात्क्रियते। काव्यस्यान्यविधासु भाषा एव रसानुभवस्य साधिका, तथापि श्रव्यकाव्यमपि रसानुभावकः स्यात्। यदा काव्यं पठन् वयं नाट्याभिनयस्य मानससाक्षात्कारं कुर्मः[2], केवल सर्गबन्धेषु काव्येषु एव नापितु मुक्तककाव्येषु सहृदयः रसास्वादं प्राप्नोति, यदि सः सौन्दर्यात्मक-संवेदनया साक्षात्कारशक्त्या च युक्तो भवति चेत्।[3] भट्टनायकः कथयति यत् कविनायकदर्शकनां रसानुभवः सम एव। एतादृशोऽनुभवः समप्रकृतिकभ्य, एतदेव हृदयसंवादः वासनासंवादश्च कथ्यते। कवेः अनुभवः नाट्यप्रदर्शनमाध्यमेन दर्शकेभ्यः प्राप्यते। अभिनयः, स्थितयः, चरित्रञ्च माध्यमं तस्य, अत एव पात्रशब्देनोच्यन्ते। अत एव कवेः साधारणीकृतभावः साधारणीकरणावस्थायां दर्शकस्य हृदये प्रतिबिम्बितो भवति। कवेः साधारणीकृतभावः बीजरूपः, यः तादृशं वृक्षमुत्पादयति यस्य फलं दर्शकैरा स्वाद्यते।[4] अत्र एतत्सिध्यति यत् अभिव्यक्तिवादः सहृदयमधिकृत्याभिनवगुप्तः चतुर्थरसव्याख्याने प्रवृत्तो जातः। अपरं कारणं ध्वनिसिद्धान्तस्योद्भावना, अनेन काव्यविवेचनेन नैकाः नवीनपरिष्काराः जाताः।

---

1. स्थायिविलक्षणो रसः। अभि.भा., अभिनवगुप्तः, (गणेश त्र्यं. देशपाण्डे) पृ. 77, उद्धृतः
2. काव्येऽपि नाट्यायमान एव रसः। अभि.भा., अभिनवगुप्तः, (गणेश त्र्यं. देशपाण्डे) पृ. 77, उद्धृतः
3. वाक्यार्थप्रतिपत्तेरनन्तरं मानसी साक्षात्कारात्मिका प्रतीतिरुपजायते। अभि.गु., (गणेश त्र्यं. देशपाण्डे) पृ.77, उद्धृतः
4. एवं मूलबीजस्थानीयः कविगतो रसः। ततो वृक्षस्थानीयं काव्यम्। तत्र पुष्पस्थानीयः अभिनयादिव्यापारः। तत्र फलस्थानीयः सामाजिकरसास्वादः। तेन रसमयमेव विश्वम्॥ अभि.भा., अभिनवगुप्तः, (गणेश त्र्यं. देशपाण्डे) पृ. 77, उद्धृतः

**काव्यवर्गीकरणे नवीनं चिन्तनम्** - ध्वनिसिद्धान्तात्प्राक् काव्यस्य वर्गीकरणं रूपगतमासीत्, तत्काव्यकृतीनां बाह्यसंरचनानिष्ठः आसीत्। पूर्वं काव्यं दृश्यश्रव्याधारेण विभज्यते, नाट्यं दृश्यम् अवशिष्टञ्च सर्वं काव्यं श्रव्यं स्वीक्रियते स्म। पुनः श्रव्यं गद्यपद्यभेदेन विभज्यते, पद्यस्य सर्गबन्धः मुक्तकश्च द्वे भेदे। ध्वनिवादानन्तरं ध्वनेः काव्यात्मत्वे स्वीकृते सति काव्यवर्गीकरणं तार्किकं रसावधारणाधारितञ्च जातम्। रसप्राधान्ययुक्तं काव्यं ध्वनिकाव्यनाम्ना कथ्यते। यत्र रसः गौणतया वर्तते सः 'गुणीभूतव्यङ्ग्यकाव्यम्', अत्र ध्वन्यर्थयुक्ताः अलङ्काराः अपि समाविष्टाः आसन्। अवशिष्टं सर्वं काव्यं यत् रसभावेन रहितं किञ्चिद्युक्तञ्च वर्तते, तच्चित्रकाव्यनाम्ना 'अधमकाव्यं' कथ्यते। अभिनवगुप्तस्तु इमां चित्रकाव्यविधां नाङ्गीकरोति, परं ध्वनिकारः अत्र कथयति यत् तादृशाः अपि केचन कवयस्सन्ति। तेऽपि कवयः कथ्यन्ते, तेभ्योऽपि अत्र अवकाशः स्यादिति। एवं आनन्दवर्धनः तृतीयं काव्यभेदमपि स्वीकरोति, परवर्त्याचार्यैः मम्मट-रुय्यकादिभिरपि आनन्दवर्धनस्य एतन्मतं अनुसृतम्। इति ध्वनिसिद्धान्तस्य प्रथमं वैशिष्ट्यम्।

**गुण-अलङ्कार-सङ्घटनादीनां नियमनम्**- स्पष्टस्वरूपं अपरं वैशिष्ट्यं काव्यशास्त्रीयचिन्तने ध्वनिसिद्धान्तस्य, येन गुण-अलङ्कार-सङ्घटनादीनां स्थितिः तार्किकरूपेण स्थापिता जाता। तथा एतेषां स्थितिः पृथक्पृथग्रूपेण स्पष्टा दृश्यते। प्रायः सर्वे काव्यशास्त्रीयाचार्याः काव्यशोभाकरधर्मस्यान्वेषणे प्रवृत्ताः दृश्यन्ते। भामहः दण्डी च शोभाधायकतत्त्वमलङ्कारं स्वीकुरुतः। दण्डी अलङ्कारं साधारणासाधारणतया विभक्तवान्, असाधारणालङ्कारे सः गुणान् स्वीकरोति। वामनः इदं चिन्तनं संवर्द्धितवान्, तेन गुणानां विश्लेषणेनोक्तं यत् गुणेषु कान्तिगुणः प्रधानः। तेन रसः कान्तिगुणे समावेशितः, परं वामनेन गुणरीत्योः भेदः न स्पष्टीकृतः। उद्भटः रीतिं सङ्घटनाश्रितं तथा रसं रसवदलङ्कारे स्वीकरोति। रुद्रटः रसं काव्यस्य सहजगुणमङ्गीकरोति, आनन्दवर्धनः ध्वन्यालोकस्य तृतीयोद्योते एतेषां मतानि उक्त्वा निकर्षं प्रददाति यत् सर्वे आचार्याः ध्वनितत्त्वं रसतत्त्वं वा तु जानन्ति स्म, किञ्च ते व्यञ्जनायाः रसस्य वा विषये न स्पष्टतया विज्ञाः आसन। अत एव ते काव्यस्य एतेषां तत्त्वानां पारस्परिकसम्बन्धं स्पष्टतया न प्रतिपादितवन्तः[1]। अतः निष्कर्षतया रसध्वनिः आत्मा वर्तते। गुणाः आत्मनः गुणः, रीतिः सङ्घटना वा गुणाश्रिता वर्तते, गुणाः रसमुत्पादयन्ति, तेऽस्य अभिव्यञ्जकाः कथ्यन्ते। एवं काव्ये रीति-गुण-अलङ्काराः रसव्यञ्जकाः। अत एव अभिनवगुप्तः रीतेः स्थितिं प्रस्तौति यत्

---

1. अस्फुटस्फुरितं काव्यतत्त्वमेतद्यथोदितम्। अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः॥ अभि. भा., अभिनवगुप्तः, (गणेश त्र्यं. देशपाण्डे) पृ. 92, उद्धृतः

माधुर्यादिगुणाः उपयुक्तवृत्तिप्रदर्शनेन सम्बद्धा भूत्वा रीतौ एकीकृतसमग्रतां प्राप्नुवन्ति। अत्र अभिनवः अभिनवपानकरसमुपमानतया प्रस्तौति, रसावधारणाप्रसङ्गेऽपि एतदुपमानं प्रददाति।[1] एवमभिनवगुप्तः ध्वनिसिद्धान्तं परिपूरितवान्, काव्यस्य विविधतत्त्वानां सन्दर्भे समग्रतया निश्चिताकारं प्रदत्तवान्। अभिनवस्य नूतनदृष्टिं प्रायः सर्वे परवर्त्याचार्याः अनुसरन्ति, केचन एव नवीनविषयान् ते योजितवन्तः।

**काव्यदोषाणामवधारणा** - ध्वनिवादे काव्यदोषाणामवधारणा युक्तियुक्ता वर्तते, अस्याधारः अस्त्यौचित्यभावः। ध्वनिसिद्धान्तात्प्राक्काव्यदोषाः दोषमात्रमेवासन्। ध्वनिसिद्धान्तस्योद्भावनानन्तरं रसविशिष्टध्वनितत्त्वस्य काव्यात्मतया स्थिते सति काव्यदोषाणामवधारणा संशोधिता जाता, दोष-गुण-अलङ्काराणां संशोधितस्वरूपं मम्मटस्य चिन्तने दृश्यते[2]। रसशब्दार्थयोः सम्बन्धः शरीरस्य आत्मनश्च सम्बन्धवद्वर्तते, रसः काव्यस्यात्मा शब्दार्थौ तस्य शरीरम्। द्रुति-विकास-विस्तारस्वरूपाः गुणाः रसेन सह गुणरूपसम्बन्धेन प्रत्यक्षसम्बद्धाः भवन्ति। अलङ्काराः न साक्षादपितु शब्दार्थमाध्यमेन रसमुपकुर्वन्ति। दोषाः रसाभिव्यक्तौ बाधकाः कथ्यन्ते, यतोहि दोषाणां सामान्यस्वरूपं रससन्दर्भे औचित्याभावं वर्तते य आनन्दवर्धनेनौचित्यं रसभङ्गस्य परमकारणमुक्तम्[3]। अभिनवमते रसदोषयोः विवेचनं रससन्दर्भे औचित्यानौचित्याधारेण एव करणीयम्। काश्मीराचार्यः क्षेमेन्द्रस्तु औचित्यविचाराय स्वतन्त्रग्रन्थमेव रचितवान्, तथा गुणदोषयोः स्थितिं औचित्याधारेण उल्लिखितवान्। एवं काश्मीराचार्यैः आन्तरिकतत्त्वानुसारेण दोषाणां स्वरूपं प्रतिष्ठापितम्।

**कविप्रतिभा काव्योत्पादिका**- अभिनवगुप्तमते काव्यस्य मूलं कविप्रेरणा अर्थात् तस्य कविप्रतिभा एव। यद्यपि सर्वैः अलङ्कारिकैः प्रतिभा काव्यहेतुत्वेन स्वीकृता, तथापि प्रतिभायाः स्पष्टावधारणा विस्तृतव्याख्यानञ्च सर्वप्रथमं आनन्दवर्धनेन अभिनवगुप्तेन च प्रदत्तम्। आनन्दवर्धनमते प्रतिभावशात् ध्वन्यर्थस्पन्दितकाव्यकृतिः उत्पद्यते, एतच्छक्तिसम्पन्नः कविः महाकवित्वेन गण्यते। प्रतिभा न केवलं काव्यरचनायै आवश्यकतत्त्वमस्ति अपितु काव्यस्य व्यङ्ग्यार्थप्रतीतये सहृदयेऽपि तस्य स्थितिः स्यात्, प्रतिभायुतमेव व्यङ्ग्यार्थं भजते। एषा प्रतिभा नानुमानमात्रविज्ञा, अपितु

---

1. तेन माधुर्यदयो गुणास्तेषां च समुचितवृत्त्यर्पणे यदन्योन्यमेलनक्षमत्वेन पानल इव गुडमरीचादीनां सङ्घातरूपतागमनं दीप्तललितमध्यमवर्णनीयविषयं तदेव रीतितियुक्तम्। अभि.भा., अभिनवगुप्तः, (गणेश र्त्यं. देशपाण्डे) पृ. 93, उद्धृतः
2. तमर्थमवलम्बन्ते येङ्गिनं ते गुणाः स्मृताः।
   अङ्गाश्रितास्त्वलङ्कारा मन्तव्या कटकादिवत्॥ का.प्र. 7-1
3. अनौचित्यादन्यद्रसभङ्गस्य कारणम्। ध्व.लो., तृतीयोद्योतः, पृ. 185

प्रत्यक्षानुभवयोग्या प्रमातृनिष्ठा च विज्ञायते। अभिनवमते प्रतिभा व्यक्तिगतभावान् परित्यज्य सद्विद्यादशां मनुष्यं नयति, तदा सा शक्तितत्त्वेन विज्ञायते। यदि मनुष्यः सद्विद्यातत्त्वेन अधः नावतरति चेत् शिवमयः विज्ञायते[1]। आध्यात्मिकदृशा प्रतिभासम्पन्नः मनुष्यः सर्वोच्चप्रकाशे तिष्ठति, तदा सः सम्पूर्णविषयान् शिवाभिन्नतया पश्यति। एषा गुरूपदेश-दीक्षा-यज्ञ-जप-योगादिभिः क्रमशः वर्द्धते। एममभिनवगुप्तः काव्यपक्षे प्रतिभातत्त्वं मुख्याङ्गतया प्रस्तुवन् काव्यविधायाः वेदादिसम्मतं महत्त्वं प्रदर्शयति।

**कान्तासम्मितकाव्यम्** - काश्मीरस्थकाव्यशास्त्रीयपरम्परायां भामहादारभ्य काव्यं चतुष्टयपुरुषार्थसाधकप्रयोजनत्वेन सर्वैः प्रस्तुतम्। नाट्यशास्त्रमपि त्रिविधवर्गसाधकं भरतेन कथितम्, तत्रापि नाट्यं लोकोपदेशजनकत्वेन महत्त्वपूर्णं तत्रापि काव्यं कथं विधान्तरेभ्यः विशिष्टम्? किमर्थं जनैः काव्यं पठनीयम्? काव्यं केवलमाध्यात्मिकप्रयोजनसाधकं वा इत्यादयः विषयाः भामहादिभिः अलङ्कारवादिभिः नैव प्रस्तुताः। सर्वप्रथमं ध्वनिवादिभिराचार्यैः काव्यस्य विधान्तरेभ्यः वैशिष्ट्यं दत्तम्। काव्यं केवल चतुर्वगसाधकं न, अपितु कान्तासम्मितोपदेशेन मनुष्यान् व्यवहारिकजगति सत्कार्येषु नियोजयति। अभिनवगुप्तः विष्णुपुराणमुद्धरन्कथयति यत् काव्यं चतुर्वगसाधकं, विविधकलाबोधकं, कीर्ति-प्रीतिकरञ्च वर्तते एव, तत्रापि मुख्यं प्रीतिः आनन्दो वा। वेदादिशास्त्रन्तु प्रभुसम्मितोपदेशकाः इतिहासपुराणादयश्च मित्रवदुपदेशप्रदायकास्सन्ति, तत्र काव्यरूपस्य किं वैशिष्ट्यमिति प्रस्तुवन् अभिनवगुप्तः कथयति यत् काव्यं जायासम्मितत्वलक्षणसमन्वितो भवति अर्थाद् यथा कान्ता भर्तुः लाभाय स्वमधुरवाण्या तं सत्कार्येषु प्रेरयति, केवलं तल्लाभाय एव मधुरोपदेशान्कथयति तथैव काव्यमपि मधुरवाक्यैः कान्तासममुपदेशप्रदायकं भवति[2]। यद्यपि चतुर्वर्गाणां पार्यन्तिकं मुख्यफलमानन्द एव, तथापि काव्यस्य मुख्यप्रयोजनमेतदेव। अभिनवगुप्तस्यैतत्काव्यविशिष्टत्वं काव्यप्रकाशकारेण मम्मटेन काव्यस्य मुख्यप्रयोजनेषु गणितम्। मम्मटस्तु षड्विधप्रयोजनेषु 'कान्तासम्मिततयोपदेशयुजे'इति प्रयोजनमनन्यतमं स्वीकरोति। तन्मते वेदादिशास्त्रं प्रभुसम्मितं शब्दप्रधानञ्च कथ्यते, पुराणेतिहासादयश्च मित्रसम्मितार्थतात्पर्ययुक्ताः भवन्ति, परं काव्ये तु शब्दार्थयोरमुख्यता तथा रसादीनां प्राधान्येन लोकोत्तरवर्णनानिपुणं कान्तावत्सरसोपदेशेन सन्मार्गे अभिमुखीकरणयोग्यता

---

1. स एव प्रतिभायुक्तः शक्तितत्त्वं निगद्यते,
   तत्पातावेशतो मुक्तः शिव एव भवार्णवात्॥ त.लो. 13-118
2. तत्रापि तत्र प्रीतिरेव प्रधानम्। अन्यथा प्रभुसम्मितेभ्यो वेदादिभ्यो मित्रसम्मितेभ्यश्चेतिहासादिभ्यो व्युत्पत्तिहेतुभ्यः कोऽस्य काव्यरूपस्य व्युत्पत्तिहेतोर्जायासम्मितत्वलक्षणो विशेष इति प्राधान्येनानन्द एवोक्तः। चतुर्वर्गव्युत्पत्तेरपिचानन्द एव पार्यन्तिकं मुख्यं फलम्। ध्व.लो.लो. 1-2, पृ. 41

भवति[1]। अत्र मम्मटः कथयति यत् काव्यं शब्दार्थयोर्गुणीभावेन रामादिवत्सत्कार्येषु प्रवर्तितव्यं न तु रावणादिवदसत्कार्येष्विति[2]। अर्थात् काव्यस्येयं शैली वेदपुराणेतिहासेभ्यः भिन्ना, अत्र न तु शब्दप्रधानं, नार्थः, अपितु शब्दार्थयोः गुणीभावेन केवलं रसप्राधान्यमवतिष्ठते। अत एव एषा शैली कान्तासम्मितोपदेशाभिधानेनाभिधीयते। यदा स्त्री पुरुषं कस्मिन्नपि कार्ये प्रवर्तयति निवर्तयति च, तदा सा स्वसम्पूर्णसामर्थ्येन सरसवाक्यैः प्रेरणां प्रददाति अत एव शैल्यामस्यां रसः मुख्यं भवति तथा काव्यं सर्वथा अन्यविधाभ्यः विशिष्टं वेदपुराणादिसमं महत्त्वपूर्णमुपयोगि च इति निदिशन्ति काश्मीराचार्याः। समेषां मानवानां हृदि काव्यमहत्त्वं स्थापनायाचार्यैः कान्तासम्मितोपदेशविशेषणं प्रदत्तम्।

अभिनवगुप्तमते व्यञ्जनाव्यापारं, रसाभिव्यक्तिः, समस्तकाव्यव्यापारं, काव्यनिर्माणतः रसास्वादपर्यन्तमेका सततप्रक्रिया वर्तते। अस्मिन् व्यापारे एकत्र शब्दाभिव्यक्तये उत्साहयुक्तः रसयुक्तपरिपूर्णश्च कविमानसः वर्तते, अपरत्र काव्यस्य रसात्मकविषयमास्वादयितुं तत्परः सहृदयः। अभिनवः एनं कविसहृदयाख्यसरस्वतीतत्त्वं अर्थात् कविसहृदयनाम्ना अभिव्यक्तवाचः आस्वादितवाचश्च तत्त्वं कथयति[3] य यतोहि द्वयोः स्थितयोः प्रतिभा महत्त्वपूर्णा, प्रतिभां विना कविः रसं नोत्पादयति तथा प्रतिभारहितः सहृदयः रसास्वादनं कर्तुं न क्षमः। एवमभिनवगुप्तमते कविसहृदययोः समवैशिष्ट्यम्।

**निष्कर्षः** - काश्मीराचार्यैः काव्यशास्त्रीयपरम्परायां ये सिद्धान्ताः प्रतिपादिताः, ते सर्वे अद्यावधि सर्वसम्मताः वर्तन्ते। एते आचार्याः बहुधा स्वपरम्परामनुसरन्ति तथा नवीनकाव्यतत्त्वानां सृजनमपि कुर्वन्ति। एतैः विविधशास्त्रेभ्यः सिद्धान्ताः स्वीकृत्य तेषां काव्यानुरूपेणानुशीलनं कृतम्। शब्दार्थचिन्तनं, काव्यात्मविचारः, प्रतिभायाः अवधारणा, सहृदयसिद्धान्तः इत्यादयः विविधविचाराः नूतनस्वरूपेऽत्र प्राप्यन्ते।

**सन्दर्भग्रन्थसूची-**

1. अभिनगुप्त. हिन्दी अभिनवभारती (अभिनवभारती 1, और अध्याय की व्याख्या सं./भा. आचार्य विश्वेश्वर सिद्धान्तशिरोमणि, सं., दिल्ली : हिन्दी विभाग, दिल्ली विश्वविद्यालय, 1973

---

1. प्रभुसम्मितशब्दप्रधानवेदातिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थ-योर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणं कविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य.......। का.प्र. 1-2, वृत्तिः, पृ. 10
2. रामादिवर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्। का.प्र. 1-2, वृत्तिः, पृ. 11
3. ध्व.लो.लो., मङ्गलाचरणम्

2. आनन्दवर्धनः, ध्वन्यालोकः (लोचनसहितः) (व्या.-जगन्नाथ पाठकः) वाराणसीः चौखम्बा विद्या भवन, 2011

3. कुन्तकः. वक्रोक्तिजीवितम् (व्या.- परमेश्वरदीनपाण्डेयः). वाराणसी : चौखम्बा सुरभारती, 2013

4. क्षेमेन्द्रः. औचित्यविचारचर्चा. (व्या. - मनोहरलाल गौङ). अलीगढ़ : भारत प्रकाशन मन्दिर, 2003

5. जगन्नाथः. रसगंगाधरः (व्या.- मदन मोहन पाठक). दिल्ली : चौखम्भा विद्या भवन, 21011

6. भरतः. नाट्यशास्त्रम् (व्या. - पारसनाथद्विवेदी) वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय, 2001

7. मम्मठः. काव्य प्रकाशः (व्या. - आचार्यः विश्वेश्वरः). वाराणसी : चौखम्बा सुरभारती प्रकाशन, 2003

8. रुद्रट. काव्यालङ्कार (व्या. - सत्यदेव चौधरी). दिल्ली : परिमल पब्लिकेशन्स, 1990

9. विश्वनाथः, साहित्यदर्पणः (व्या. - शालिग्रामशास्त्री). दिल्ली : मोती लाल बनारसीदास, 2005

10. कल्हणः. राजतरङ्गिणी (व्या. - रामतेजशास्त्री पाण्डेयः). दिल्ली : चौखम्बा संस्कृत प्रकाशनम्, 2015

11. काणे पी.वी., संस्कृत काव्यशास्त्र का इतिहास (अनु. - शास्त्री ईश्वर चन्द्र). दिल्ली : मोतीलाल बनारसीदास, 1966

✦✦✦

# संस्कृते बालसाहित्यम्

**डॉ. कुलदीपसिंहः ***

जीवनस्य कला बालकः सर्वप्रथमं स्वगृहे अपि शिक्षते। बालकस्य शारीरिक-मानसिक-भावनात्मकपरिष्कारे परिजनानां समाजस्य च महती भूमिका भवति। बालकस्य व्यक्तित्वे सौन्दर्यभावना, अहिंसाभावना अभयभावना इत्येतासां सम्पादनार्थं संस्कृतसाहित्ये बहुधा आचारसंहिता उक्ता अस्ति। यथा चरकसंहितायाम् उक्तम् -

**''क्रीडनकानि खलु कुमारस्य अभिरामाणि अप्राणहराणि अवित्रासनानि स्युः। न हि अस्य वित्रासनं साधु। तस्मात् तस्मिन् रोदति अभुञ्जाने वा अन्यत्र विधेयताम् अगच्छत् राक्षसपिशाचपूतनाद्यानां नामानि आह्वयता कुमारस्य वित्रासनार्थं नामग्रहणं न कुर्यात्।''**[१]

अर्थात् क्रीडनकानि चित्ताकर्षकाणि, विविधवर्णयुतानि, मधुरध्वनिकारकाणि, निर्भयदायकानि, अप्राणघातकानि च स्युः। बालकस्य उदरपूर्तये अथवा तस्य रोदनोपशमनाय भूत-प्रेतादीनां व्याजेन भयोत्पादनपुरस्सरं तैः सह व्यवहारः न स्यात्। अनेन ते कुण्ठिताः भवितुमर्हन्ति। बालकस्य मनसः व्यवहारस्य च यादृशं सूक्ष्मम् अवलोकनं संस्कृते अस्ति तादृशम् अन्यत्र दुर्लभम् अस्ति। यथोक्तं मन्वाचार्येण -

**आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च।**
**नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः।।**[२]

अर्थात् आकारः, सङ्केतः, चलनम्, चेष्टनम्, भाषणम्, नेत्र-चपलता, मुख-भङ्गिमाः इत्यादीनां परिवर्तनेन बालकस्य मनोगतः भावः ज्ञातुं शक्यते।

अद्यत्वे मातापिता आत्मनः उद्योगव्यवसायादीनां कारणतः जन्मनः कतिचन दिनेभ्यः परम् एव Creche अथवा शिशुगृहेषु आत्मनः शिशूनां प्रवेशं कारयन्ति। अनेन बालकानां

---

* सहायकाचार्यः, शिक्षाशास्त्रविभागः, जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्।

१. चरकसंहिता, ८.६३

२. मनुस्मृतिः, ८/२६

स्वपरिजनैः सह भावानात्मकः सम्बन्धः शिथिलः जायते। अपि च प्रतिस्पर्धायाः युगे बालकस्य विजयार्थं ते परिजनाः उच्चप्रतिष्ठितविद्यालयेषु अतिशीघ्रमेव प्रवेशं कारयन्ति किन्तु संस्कृतवाङ्मयं तु वदति यत् पञ्चवर्षपर्यन्तं बालकः बाह्यप्रभावात् मुक्तः भवेत्। गृहस्य निश्चिन्तवातावरणे तस्य स्वाभाविकः विकासः स्यात्। यथा हि –

**अवधूतवेशधारी दुग्धाहारी मुदा विहारी च।**
**रागद्वेषवशित्वं तावन्नाप्तः शिशुः सतां गेहे।।**

अर्थात् सत्पुरुषाणां गृहे बालकः यावत् पर्यन्तं अवधूतसाधुवत् नग्नावस्थायां परिभ्रमति, अपि च केवलं दुग्धाहारं कुर्वन् सानन्दं बालोचितक्रीडाविहारे मग्नः भवति, तावत् सः रागद्वैषवशीभूतः न भवति। अन्यत्रापि बालकं लक्ष्यीकृत्य उक्तमस्ति –

**शुद्धोऽसि बुद्धोऽसि निरञ्जनोऽसि**
**संसारमायापरिवर्जितोऽसि**
**संसारस्वप्नं त्यज मोहनिद्रां**
**हे तात! त्वं रोदिषि कस्य हेतोः।।**[१]

अर्थात् हे बालक! त्वं कमर्थं रोदिषि। त्वं तु शुद्धोऽसि, बुद्धोऽसि, निरञ्जनोऽसि, संसारमायाबन्धनेभ्यो मुक्तोऽसि। त्वं मोहनिद्रां त्यक्त्वा सांसारिकस्वप्नैः कष्टसहमानो मा भव। बालकस्य शक्तयः अकुण्ठिताः भवन्ति। प्रत्येकं बालकः परमात्मनः अंशभूतः भवति इति भगवान् श्रीकृष्णः श्रीमद्भगवद्गीतायां प्रतिज्ञापितवान् यथा –

**ममैवांशो जीवलोके जीवभूतः सनातनः।।**

श्रीमद्भागवत्–महापुराणे दशमस्कन्धे, नवमेऽध्याये वर्णिताः भगवतः बालकृष्णस्य लीलासु मातुः यशोदायाः कृत्रिमक्रोधप्रसङ्गः अत्यन्तं मनोहरोऽस्ति। कृष्णस्य बालस्वरूपस्य वर्णनं यथा –

**करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम्।**
**वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि।।**

बालकशब्दस्य विषये सुश्रुतसंहितायाम् उक्तमस्ति यत् –

**वयस्तु त्रिविधं बाल्यं मध्यमं वार्धकं तथा।**
**ऊनषोडशवर्षस्तु नरो बालो निगद्यते।।**
**त्रिविधः सोऽपि दुग्धाशी, दुग्धालाशी तथान्नभुक्।**
**दुग्धाशी वर्षपर्यन्तं, दुग्धान्नाशी शरदद्वयम्,**

---

१. मदालसोपाख्यानम्, मार्कण्डेयपुराणम्, २५/१

तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधा मतः।

अर्थात् 15 वर्षपर्यन्तं बाल्यावस्था भवति। अस्यामवस्थायां प्रथमे वर्षे बालकः केवलं दुग्धजीवी भवति। द्वितीये वर्षे दुग्धेन अन्नेन च जीवति तथैव च तृतीये वर्षे मुख्यतया अन्नेन जीवतीति।

यदि संस्कृते बालसाहित्यम् इति विषये चर्चा स्यात् चेत् प्रथमतया पञ्चतन्त्रं हितोपदेशः इति ग्रन्थद्वयस्य नाम बुद्धौ आगच्छति। ग्रन्थद्वये अस्मिन् पशुपक्षिणां कथा माध्यमेन नीतिशिक्षा प्रदत्ता अस्ति। हितोपदेशे कथितं यत् –

**यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्।**
**कथाच्छलेन बालानां नीतिस्तदिह कथ्यते।।**[१]

बालकस्य विचारप्रकटनस्य अधिकारस्य विषये हितोपदेशे कथितमस्ति यत् यथा सूर्यस्य अभावे दीपकस्य प्रकाशेन जनाः कार्यं कुर्वन्ति, तथैव ज्येष्ठानां दुर्बुद्धौ बालकानां बुद्धिबलेन कार्यं करणीयम् इति यथा हि –

**बालादपिग्रहीतव्यं युक्तियुक्तं मनीषिभिः।**
**स्वेरविषये किं न प्रदीपस्य प्रकाशनम्।।**[२]

आधुनिकबालसाहित्यस्य पृष्ठभूमौ संस्कृतक्षेत्रे अपि शैक्षिकबालसाहित्यस्य कार्यं क्रियमाणम् अस्ति। संस्कृतभारती, संस्कृतसंवर्धनप्रतिष्ठानम्, लोकभाषापरिषद्, संस्कृतबाल-साहित्यपरिषद् इत्यादीनि बहूनि सङ्घटनानि बालसाहित्यस्य सर्जनं कुर्वन्ति। बाला विहग-धर्मिणः इति ध्येयवाक्यम् आदाय संस्कृतबालसाहित्यपरिषद् महत् कार्यं करोति। एषा संस्था अनेकेषां संस्कृतगीतानां प्रकाशनं कृतवती। यथा उदाहरणार्थं गोल गोल घूमे इति क्रियाधारितगीतं संस्कृतभाषया प्रस्तूयते –

**चलाम सर्वे चलाम सर्वे चलाम सर्वे नर्दन्तः**
**सिंहसमानं गर्जन्तः स्वैरं स्वैरं सेलाम**
**स्वैरं स्वैरं खेलाम स्वैरं स्वैरं वेलाम स्वैरं स्वैरं सेलाम**

एषा परिषद् सप्तवर्णः चित्रपतङ्गः, सरलश्लोकाः, निशिगन्धा, हास्यमञ्जरी, शनैः शनैः, कथामाधुरी, बालनन्दिनी चेत्यादीनि बहूनि पुस्तकानि अपि प्रकाशितवती। बाल-साहित्यस्य लेखकानां प्रोत्साहनं कर्तुं प्रतिवर्षं 'बालविभूषणसम्मानम्' अपि प्रददाति। अद्यत्वे इमोजिरूपेण सामाजिकसञ्चारमाध्यमेषु यासां मुखाकृतीनां वयं प्रयोगं कुर्मः, तासां

---

१. हितोपदेशः, १/८
२. हितोपदेशः, सुहृदभेदः, ७८

संस्कृतानुवादमपि एषा परिषद् प्रकाशितवती।

बालकेभ्यः अन्त्याक्षरी रोचते। अकारादिक्रमेण श्लोकानां बहवः सङ्ग्रहग्रन्थाः प्रकाशिताः सन्ति, यथा श्लोक-अन्त्याक्षरी, संस्कृत-श्लोक-अन्त्याक्षरी, मञ्जुल-मञ्जूषा, नैतिक-मञ्जूषा, शिक्षा-मञ्जूषा, महासुभाषितसंग्रहः इत्यादयः अनेके ग्रन्थाः सन्ति। यत्र स्तरानुसारम् अनेके सरससंस्कृतश्लोकाः सन्ति। एवमेव बालकेभ्यः प्रहेलिका अपि रोचते। प्रहेलिका कमपि विशिष्टमर्थं गोपयित्वा अन्यमेव अर्थं प्रकटयति। शब्दप्रहेलिकाः, गणितप्रहेलिकाः, वर्गप्रहेलिकाः, मार्गान्वेषणप्रहेलिकाः, चित्र-प्रहेलिकाः इत्येवंरूपेण प्रहेलिकानां बहवः प्रकाराः भवन्ति। प्रहेलिकाभिः बालानां ज्ञानात्मक-भावात्मक-चिन्तनात्मकपक्षाणाम् एकस्मिन् एव पयार्ये मूल्याङ्कनं सम्भवति।

प्रहेलिकानां सङ्ग्रहदृष्ट्या केचन ग्रन्थाः सन्ति यथा प्रहेलिकाशतकम्, सचित्रं प्रहेलिकाशतकम्, सुभाषितरत्नभाण्डागारम्, सार्थ-संस्कृतप्रहेलिका इत्यादयः। बालस्तावत् क्रीडासक्तः इति प्रसिद्धमेव। भाषाक्रीडाणाम् आयोजने संस्कृतशिक्षकाणां सौविध्यार्थं शतस्य भाषाक्रीडानां वर्णनं शान्तलाविश्वासमहोदयायाः क्रीडावल्ली इति ग्रन्थे प्राप्यते।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य जालपुटे बालकानां कृते अनेकानि लघुबाल-चलच्चित्राणि (Sanskrit Shortfilms for kids) उपलब्धानि सन्ति। बालकानां कृते रचितस्य सरससाहित्यस्य उदाहरणार्थम् आचार्यहरिरामस्य गणना-गणेशः इति कविता पठनीया -

**पूज्यः देवगणेशः गौरीसुतः सुरेशः**
**एकः दन्तः राजते, भार्याद्वयं विराजते।**

**त्रिषु लोकेषु विश्रुतः, हस्तचतुष्टयसंयुतः।**
**पिता तस्य पञ्चाननः, भ्राता तस्य षडाननः।**

**सप्तर्षयः स्मरन्ति तम्, अष्ट दिग्गजाः नमन्ति तम्।**
**नवदुर्गाभिः पोषितः, दशावतारैः पूजितः।**
**तस्मै विद्या समर्पिता एवं गणना कण्ठगता।।**

गणनया सह उत्तमानां सदाचाराणां शिक्षणाय आचार्यसुभाषवेदालङ्कारस्य कविता अपि उदाहरणरूपेण प्रस्तूयते -

**एको द्वौ सेव्यताम् गौः, द्वौ त्रयः पीयतां पयः।**
**चत्वारः भव सुकुमारः, पञ्च षट् वृथा न अट।।**

**षट् सप्त न भव तप्तः, सप्ताष्ट न भव रुष्टः।**
**अष्ट नव सुवीरो भव, नव च दश वद ज ब ग ड द श।।**

एवं प्रकारेण संस्कृतभाषायां विरचय्यमाने बालसाहित्ये बालसुलभकल्पना-शीलतायाः, सर्जनात्मकतायाः, नवीनवस्तु प्रति उत्सुकतायाः, स्वाभाविक-उल्लासभावस्य च भावनानां समावेशः अस्ति। तत्र वासुदेवद्विवेदिमहोदयस्य वर्णमालागीतावलिः अपि एकम् उदाहरणमस्ति येन संस्कृतकवीनां बालसुलभतादृष्ट्या रचनायाः परिचयः प्राप्यते। बालगीतम्, संस्कृतशिशुगीतम्, संस्कृतदेशभक्तिगीतम्, गीतमञ्जरी, गेयसंस्कृतम् इत्यादयः अनेके सरलसंस्कृतगीतग्रन्थाः प्रकाशिताः सन्ति।

एवमेव प्रसिद्धभाषापत्रिका चन्दामामा इत्यस्य चन्दमामा इति नाम्ना अपि प्रकाशनं जातम्। सम्भाषणसन्देशः इति पत्रिकायाम् अपि बालानां कृते कुतुककुटी बालमोदिनी इत्यादिनामभिः नियमितस्तम्भानां प्रकाशनं क्रियते। संस्कृतभारतीपक्षतः बालचित्रपदकोशस्य अपि प्रकाशनं कृतमस्ति। पाठ्यपुस्तकेषु अपि रुचिकरं संस्कृतसाहित्यम् अस्ति। उदाहरणार्थं अंगूर खट्टे हैं इति हिन्दीकथायाः अपि गीतमाध्यमेन 'एका शृगालः वनं गच्छति, सः वनं गच्छति, पिपासया बुभुक्षया वनं गच्छति' इत्यादिरूपेण संस्कृतगीतं पाठ्यपुस्तकेषु प्राप्यते। एवमेव अन्यत् एकम् उदाहरणं पठनीयम्-

**एकः काकः तृषापीडितः, जलं न लब्धं दूरे दूरे।**
**वृक्षाद् वृक्षं गतः वराकः, ग्रामे ग्रामे नगरे नगरे।।**

**एकं सहसा घटम् अपश्यत्, घटे जलं दृष्टं बहुदूरे।**
**खण्डं खण्डं पाषाणानाम्, क्षिप्तवान् काकः जलमध्ये।।**

**घटकण्ठे सम्प्राप्तं नीरम्, पीत्वा सन्तुष्टः काकः।**
**बुद्धिपूर्वकं यत्नं कुरुते, वद न सफलतां लभते का ? कः ?** (काकः)

गीतस्य अन्तिमचरणे कीदृशः सुन्दरः चमत्कारः कविना समुत्पादितः। सफलतां लभते का ? कः ? इति प्रश्नस्य उत्तरमपि सफलतां लभते काकः इति एकेन एव वाक्येन दत्तम्। एतादृशैः बालमनोरमगीतैः छात्राणां संस्कृतभाषायां रुचिः उत्पद्यते।

इदानीं मोबाइल एप माध्यमेन अपि संस्कृतेन बालसाहित्यस्य रचनाकार्यं प्रकाशनं च क्रियमाणम् अस्ति। वेदिका संस्कृत राइम्स इति नाम्ना यूट्यूब चैनल अस्ति, तत्रापि बालरोचकानि संस्कृतगीतानि सन्ति। बलदेवानन्दसागरमहोदयस्य अनेकाः चलच्चित्रकथाः (एनिमेटेड स्टोरीज्) यूट्यूब माध्यमेन द्रष्टुं शक्यन्ते।

हास्यविनोदवार्ता कस्मै न रोचते। हास्यरसस्य विषये अपि संस्कृतसाहित्ये अनेकानि पद्यानि प्राप्यन्ते। यथा -

**सदा वक्रः सदा क्रूरः सदा पूजामपेक्षते।**
**कन्याराशिस्थितो नित्यं जामाता दशमो ग्रहः।।**

**असारे खलु संसारे सारं श्वसुरमन्दिरम्।**
**हरः हिमालये शेते, हरिः शेते पयोनिधौ।।**

सम्पूर्णग्रन्थरूपेण अपि हास्यसाहित्यस्य सर्जनं संस्कृतज्ञैः कृतम्। यथा **संस्कृत-प्रहसनम्, हास्यविनोदकथासङ्ग्रहः, हास्यमञ्जरी, एहि हसाम, स्मारं स्मारं सुखिनः स्याम** संस्कृतविनोदः चेत्यादयः ग्रन्थाः विनोदान्वित-साहित्यस्य पठनाय उदाहर्तुं शक्यन्ते। हास्यकारकं स्वस्थमनोरञ्जनदायकं च रोचकसाहित्यं पठित्वा बालकाः आनन्दस्य अनुभूतिं करिष्यन्ति। एनाम् अनुभूतिं कर्तुं बालकाः अन्यविध-संस्कृतसाहित्यं प्रति अपि आकृष्टाः भविष्यन्ति।

बालानां कृते रचिताः कथाः ज्येष्ठानाम् अपि मनोहरणं कुर्वन्ति। बालकथासाहित्यरूपेण संस्कृतसाहित्ये प्राचीनपरम्परायां पञ्चतन्त्रम्, हितोपदेशः, सिंहासनद्वात्रिंशतिका इत्यादिग्रन्थानाम् उद्धरणं दातुं शक्यते। आधुनिककाले तु बालकथा, बालनैतिककथाः, एकदा, शृण्वन्तु कथाम् एकाम्, बालकथासप्ततिः इत्यादयः अनेके ग्रन्थाः बालकथासाहित्यदृष्ट्या रचिताः। अन्यभाषासु रचितस्य कथासाहित्यस्य रचना अपि संस्कृतेन क्रियमाणा अस्ति। यथा तेलुगुकथानाम् अनुवादरूपेण स्पन्दना, ठाकुररवीन्द्रनाथस्य कथानाम् अनुवादरूपेण लिपिका, अन्तर्जालस्थानकेषु अपि संस्कृतकथाः चलच्चित्रप्रदर्शनेन वर्तन्ते यथा www.bookbox.com; Sonic octaves kids sanskrit इत्यादिजालपुटेषु संस्कृतकथाः सन्ति। कथायाः श्रवणेन दर्शनेन च कथालेखनस्य कथाकथनस्य च प्रवृत्तिः जागर्ति। प्रश्नानां सङ्ग्रहदृष्ट्या केषुचित् ग्रन्थेषु सङ्कलनं विद्यते यथा रसप्रश्नाः, रामायणप्रश्नोत्तरी, महाभारतप्रश्नोत्तरी, भारतीयसंस्कृतिप्रश्नोत्तरी, संस्कृतसामान्यज्ञानम् इत्यादयः अनेके बालोपयोगिनः ग्रन्थाः सन्ति।

विज्ञानदृष्ट्या अपि रोचकं साहित्य बालचित्ताकर्षणदृष्ट्या रचितमस्ति। संस्कृत-विज्ञानप्रदर्शनी इत्यस्याः आयोजनेन बहुभिः संस्कृतसेवासंस्थाभिश्च संस्कृते निहितं विज्ञानं परिचाययितुं विज्ञानप्रदर्शन्याः आयोजनं यथासमयं क्रियते। यथा संस्कृतभारती इत्यनया संस्थया संस्कृते विज्ञान-अन्वितप्रमाणानां भित्तिपत्रकरूपेण (Wall poster) निर्माणं कृत्वा स्थूलपत्रेषु तनुपत्रेषु च मुद्रण कृतवती। एतेषु भित्तिपत्रकेषु खगोलशास्त्रम्, भूगोलशास्त्रम्, रसायनशास्त्रम्, वनस्पतिशास्त्रम्, योगशास्त्रम्, आयुर्वेदशास्त्रम्, गणितम्, शिल्पशास्त्रम्, ज्यामितिशास्त्रम्, वैमानिकविद्या, राजनीतिविज्ञानम्, कृषिः, पर्यावरणम् इत्यादिविषयेषु आङ्ग्लविवरणेन सह संस्कृतग्रन्थानाम् उद्धरणानि सचित्रं मुद्रितानि सन्ति। एतेषां भित्तिपत्रकाणां पुस्तकरूपेण संस्कृतभारती द्वारा Science in Samskrit इति नाम्ना प्रकाशनम् अपि जातम्। भाषायाः दैनन्दिनरूपं प्रदर्शयितुं विशेषावसरेषु संस्कृतभाषाप्रदर्शन्याः आयोजनं क्रियते। यत्र अनेके विभागाः वर्गाः वा भवन्ति यथा आभूषणवर्गः, वस्त्रवर्गः, फलवर्गः,

शाकवर्गः, पुष्पवर्गः, यातायातसाधनवर्गः, कर्मकारवर्गः, खाद्यान्नवर्गः, पशु-वर्गः, खग-वर्गः, नित्योपयोगिवस्तुवर्गः, कार्यालयवस्तुवर्गः इत्यादयः। प्रत्येकस्मिन् वर्गे तद्वर्गसम्बद्ध-वस्तूनां नामोल्लेखपूर्वकं सङ्ग्रहः भवति। अस्य सङ्ग्रहस्य दर्शनेन छात्राणां शब्दभाण्डारे अभिवृद्धिः भवति। भाषाप्रदर्शिन्यां छात्राः वस्तु, चित्रम्, प्रतिकृतिं वा दृष्ट्वा तस्य संस्कृतनाम अपि जानन्ति। अनेन साहचर्येण छात्रस्य वस्तुविषयकज्ञानं चिरस्मृतं जायते।

आधुनिककाले प्राथमिकस्तरतः सरसं संस्कृतसाहित्यं बहुधा उदाहर्तुं शक्यते। अनेन बालकेषु पठने रुचिः जागर्ति। ते अध्ययनाय स्वतः प्रवृत्ताः भवन्ति। गीतव्याजेन अन्येषां पाठ्यांशानामपि शिक्षणं क्रियते। काल्पनिकवृत्तान्तमाध्यमेन पशुपक्षिणां स्वरस्य परिचयं कारयितुं गीतविधेः प्रयोगाय अधोलिखितं गीतम् उदाहरणं भवितुम् अर्हति, तद्यथा –

**राजीवस्य अद्भुतस्वप्नः, सिंहो वदति म्याऊँ-म्याऊँ।**
**हस्ति धावति यथा चित्रकः, सर्पः वदति भों भों भऊँ।।**

**भल्लुकः दुर्बलः तथा यत्, यथा चमरपुच्छा सञ्जातः।**
**मूषकभीता धावति मार्जरी, शशकः धावति शृङ्गयुतः।।**

गीतगापनेन बालकाः सक्रियाः भवन्ति। यदि शिक्षकः अभिनयपूर्वकं गीतं गापयति, तर्हि बालकाः आनन्दिताः भूत्वा अध्ययनप्रक्रियायां प्रतिभागं कुर्वन्ति। अतः एतदावश्यकम् अस्ति, यत् शिक्षकः किञ्चित् अभिनयकौशलमपि जानीयात्।

सारतः वक्तुं शक्यते यत् संस्कृते बालसाहित्यस्य अल्पता नास्ति। बालसाहित्यदृष्ट्या संस्कृते परम्परागतरूपेण तु भर्तृहरिविरचितशतकत्रयम्, विदुरनीतिः, पञ्चतन्त्रम्, हितोपदेशः इत्यादिग्रन्थेषु विद्यमानाः श्लोकाः सुभाषितकण्ठपाठाय आदर्शभूताः सन्ति। किन्तु आधुनिककालखण्डे अपि उल्लेखनीयमात्रायां बालसाहित्यस्य रचना क्रियमाणा अस्ति। तत्र प्रशस्यमित्रशास्त्री, पण्डितवासुदेवद्विवेदी, हरिदत्तशर्मा, सुभाषवेदालङ्कारः, आचार्यः हरिरामाचार्यः, सम्पदानन्दमिश्रः इत्यादयः अनेके विद्वांसः अपि बालसाहित्यरचनासु अग्रगण्याः सन्ति। संस्कृत-अकादमीपक्षतः प्रतिवर्षम् उत्तमानां बालसाहित्यकाराणां कृते पुरस्कारः प्रदीयते। तत्र अरविन्दकुमारतिवारीमहोदयस्य **बालगुञ्जनम्,** सञ्जयचौबेमहोदयस्य **चित्वा तृणं तृणम्,** सम्पदानन्दमिश्रमहोदयस्य शनैः शनैः, राजकुमारमिश्रस्य डयते कथमाकाशे, ऋषिराजजानीमहोदयस्य चमत्कारिकः चलदूरभाषः, जनार्दनहेगडे महोदयस्य **बालकथा-सप्ततिः** अभिराजराजेन्द्रमिश्रमहोदयस्य **कौमारम्** इत्यादयः रचनाः राष्ट्रियस्तरे पुरस्कृताः सन्ति।

**सहायकग्रन्थाः**

१. वेदालङ्कारः, सुभाषः (१९८६); संस्कृतशिशुगीतम्, अलङ्कारप्रकाशनम्, जयपुरम्।

२. शर्मा, कुलदीपः (२०१९); सचित्रं प्रहेलिकाशतकम्, आइडियल पब्लिकेशन, जयपुरम्।

३. पी.रमेशः (२०११); बालकथा, गंगा बुक्स, कोझिकोड।

४. सम्पदानन्दमिश्रः (२००१); हास्यमञ्जरी, श्रीअरविन्दसोसायटी, पुदुचेरी।

✦✦✦

 ISSN : 7552-2779

# संस्कृत और फारसी की अन्तर्भाषिक पृष्ठभूमि और हिन्दी-उर्दू

**प्रो. मनोज कुमार मिश्र***

संस्कृत संसार की प्राचीनतम भाषा है। आधुनिक भाषाशास्त्रवेत्ताओं की सम्मति में भी संसार की प्रचीनतम भाषाओं में संस्कृत अन्यतम है। यह भाषा संरचना, शब्दराशि आदि दृष्टियों से ग्रीक, लैटिन आदि प्राचीन भाषाओं की अपेक्षा अधिक वैज्ञानिक एवं समृद्ध है। वस्तुतः, यदि संस्कृत भाषा का विशाल व्यूह न होता, तो हम आधुनिक भाषाशास्त्र की कल्पना भी नहीं कर सकते थे। आधुनिक भाषाविज्ञान के उदय का परिवेश अधिकांशेन संस्कृतकेन्द्रित रहा है। यद्यपि अनेक औपनिवेशिक-विचारधारापरायण भाषावैज्ञानिकों ने नितान्त काल्पनिक, मनगढ़न्त एवं वैज्ञानिकविचार-बिन्दुशून्य मूल भारोपीय भाषा को प्रस्तुत कर संस्कृत की पश्चात्कालिकता को सिद्ध करने का प्रयत्न किया, तथापि उनका यह कपोलकल्पित सिद्धान्त प्रमाण एवं तर्क के निकष पर एकदम खोटा सिद्ध हुआ।

जगतीतल की प्राचीनतम साहित्यिक अभिव्यक्ति-वेद में वाग्देवी को देवों द्वारा उत्पन्न किया गया (वस्तुतः अभिव्यक्त) बतलाया गया है। इस वाणी को नाना प्रकार के प्राणी बोलते हैं-

**देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।**
**सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मान् उपसुष्टुतैतु॥**

-ऋग्वेद. 08.100.11

निरुक्तकार यास्क का कथन है कि जिस प्रकार मनुष्य लोग प्रयोजन होने पर शब्दप्रयोग करते हैं, वैसे ही देव लोग भी शब्द प्रयोग करते हैं-

---

* वेदविभागाध्यक्ष, केन्द्रीय संस्कृत विश्वविद्यालय, श्री रणवीर परिसर, कोट-भलवाल, जम्मू

**तेषां मनुष्यवद्देवताभिधानम्** -निरु.1.2

आचार्य यास्क एवं महाभाष्यकार पतञ्जलि ने भाषा के क्षेत्रीय अथवा भौगोलिक वैविध्य को इङ्गित किया है-

**अथापि प्रकृतय एवैकेषु भाष्यन्ते, विकृतय एकेषु। शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते।-विकारमस्यार्येषु भाषन्ते शव इति। दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु** (निरु.2.2)

**सर्वे देशान्तरे**

शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति विकार एवैनमार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यतमध्येषु गमिमेव त्वार्या प्रयुञ्जते। दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु। (महाभाष्यं, पस्परशा.)

आचार्य पतञ्जलि का कथन है कि एक-एक साधु शब्द के अनेक अपभ्रंश होते हैं। जैसे 'गौ:' इस शब्द के गावी, गोणी, गोता एवं गोपोतलिका इत्यादि अनेक अपभ्रंश हैं-

**एकैकस्य शब्दस्य बहवोऽपभ्रंशाः। गौरित्यस्य शब्दस्य**
**गावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः।**

(महाभाष्य, पस्पशा.)

भर्तृहरि का मन्तव्य है शब्द का उच्चारण करने वाले लोगों के दोष के कारण दैवी वाक् व्यवकीर्ण हुई और परम्परा- प्राप्त साधु शब्द से अपभ्रंश का विकास हुआ-

**दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृषु।**
**पारम्पार्यादपभ्रंशा विगुणेष्वभिधातृषु।** (वा.प.1.155)
**प्रसिद्धिमागता येषु तेषां साधुरवाचकः।।** (वा.प.1.154)

आधुनिक भाषाशास्त्रियों ने शब्द एवं तद्गत ध्वनियों के विकृत होने एवं संरचनात्मक परिवर्तन को ध्वनिपरिवर्तन के नाम से अभिहित किया है। ध्वनिपरिवर्तन की दिशाओं को आगम, लोप, विकार, विपर्यय, समीकरण, विषमीकरण, दीर्घीकरण, ह्रस्वीकरण, महाप्राणीकरण आदि रूप में परिगणित किया है। इस ध्वनिपरिवर्तन के प्रयत्नलाघव, अशिक्षा आदि अनेक आभ्यन्तर एवं भौगोलिक आदि बाह्य कारण हैं।

इन सभी परिस्थितियों का उल्लेख अति प्राचीन काल से भारतीय परम्परा में मिलता है[1]।

प्राकृतभाषा के वैय्याकरणों ने भी ध्वनिपरिवर्तन की प्रवृत्तियों का सूक्ष्मता से पर्यवेक्षण किया है।

फारसी भाषा एक आर्यभाषा है। फारसी भाषा का एक भी शब्द ऐसा नहीं है, जिसका मूल संस्कृत में उपलब्ध न हो। यह एक ऐतिहासिक तथ्य है कि फारसी भाषा का विकास मध्यकालीन फारसी (पह्लवी) से हुआ है। पह्लवीभाषा का विकास अवेस्ता एवं प्राचीन फारसी से हुआ था। अवेस्ता की भाषा वैदिक भाषा से अत्यन्त साम्य रखती है। उदाहरण के लिए अवेस्ता की कुछ पङ्क्तियां वैदिक संस्कृतच्छाया के साथ यहाँ प्रस्तुत की जा रही हैं-

**अशॅम् वोहू वहिश्तॅम् अस्ती**
**उश्ता अस्ती उश्ता अह्माइ**
**ह्यत् अशाउ वहिश्ताउ अशॅम्।**
**संस्कृतच्छाया-ऋत वसु वसिष्ठम् अस्ति।**
**उष्टा अस्ति उष्टा अस्मै**
**ह्यत् ऋताय वसिष्ठाय ऋतम्।**

यह ध्यातव्य है कि अवेस्ता जरथुस्त्रमतावलम्बी जनों का पवित्र धर्मग्रन्थ है। अतिविशालकाय अवेस्ता का अधिकांश भाग विदेशी आक्रान्ताओं द्वारा नष्ट कर दिया गया। तथापि जो स्वल्पांश बचा हुआ है, वह भी पर्याप्त मात्रा में विस्तृत है।

प्राचीन फारसी भाषा का परिचय हमें हखामनिश् वंश के शासकों द्वारा उत्कीर्ण कराए गए शिलालेखों के माध्यम से मिलता है। यह भाषा भी संस्कृत के अति निकट है। उदाहरणस्वरूप एक शिलालेख का एक वाक्यांश संस्कृतच्छाया के साथ प्रस्तुत किया जा रहा है-

---

1. क. द्रष्टव्य - निरु 2.1-2
   ख. वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।। (निरुक्तदुर्गवृत्ति)
   ग. भवेद् वर्णागमाद्धंसो सिंहो वर्णविपर्ययात्। गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्।
   घ. लोपागमर्वार्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यतीति (महाभाष्य, पस्पशा.)
   ड. संस्कारो लोपागमवर्णविकारप्रकृतिभावलक्षण: (उवट-वा.प्रा.1.2 पर)

**प्रा.फा.मू.- अदम् दारयउश् ख्शायथिय वज्रक ख्शायथिय ख्शायथियानाम् ख्शायथिय पार्सइय् ख्शायथिय दह्यूनाम् विस्तारस्पाह्यया पुस्स अर्शामह्या नपा। संस्कृतच्छाया- अहं धारयद्वसुः क्षायथ्यः वज्रकः क्षायथ्यः क्षायथ्यानां क्षायथ्यः पार्से क्षायथ्यः दस्यूनां विष्टाश्वस्य पुत्रः ऋषामस्य नपात्।**

भाषाशास्त्रियों ने भाषाविशेष के सन्दर्भ में अनेक ध्वनिनियमों की उद्भावना की है, जैसे-ग्रीक-नियम, लैटिन-नियम, फारसी-नियम आदि। फारसी-नियम के अन्तर्गत संस्कृत को मूल में रखकर फारसी भाषा के ध्वनिपरिवर्तन की मीमांसा की गई है।

उर्दू भाषा में फारसी के शब्दों की भरमार है। उर्दू का जन्म हमारे इसी आर्यावर्त में अनेक भाषाओं के संस्कारों को आत्मसात् करके हुआ है। हमारी सामान्य बोलचाल की हिन्दी के साथ इसके साहित्यिक एवं अन्य रूपों में उर्दू के शब्दों का बहुलता से प्रयोग होता है। इसके व्याज से संस्कृत मूलक अनेक फारसी शब्द हमारी भाषा में आ जाते हैं।

हिन्दी भाषा का पार्यन्तिक मूल संस्कृत ही है। इसका विकास शौरसेनी प्राकृत अपभ्रंश से हुआ है (खड़ी बोली के रूप में)। अतः हिन्दी भी पारम्परिक रूप से संस्कृत का ही अपभ्रष्ट रूप है।

हिन्दी की बोलियों का विकास विभिन्न अपभ्रंशों से हुआ है। फारसी मूल से उर्दू में आने वाले अनेक शब्दों की हिन्दी में प्रयुक्ति हिन्दी भाषा को समृद्ध बनाती है। ऐसे शब्द भी उसी प्रकार से संस्कृत मूल से घिसपिटकर सत्ता में आए जैसे हिन्दी के शब्द। इस प्रकार संस्कृत से फूटी एक और धारा हिन्दी में समाहित हो जाती है। अब हम यहाँ हिन्दी में प्रायः व्यवहृत उर्दू भाषा में समाविष्ट कतिपय फारसी शब्दों के मूल उत्स की छानबीन प्रस्तुत करते हैं-

मर्द - इसका संस्कृत मूल 'मर्त्य' है। यह शब्द अवेस्ता में 'मश्य' इस रूप में उपलब्ध है। इसका प्राचीन फारसी रूप 'मर्तिय' है- मर्तिय ह्य आगरिय आह (धा. बहिस्तन-1) मर्तिय>मर्त>मर्द (तकार का घोषीकरण होकर दकार)। वेद में 'मर्त' शब्द भी उपलब्ध होता है।[1] इस स्थिति में 'मर्त' से सीधे 'मर्द' की निष्पत्ति की जा सकती है।

---

1. प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन॥ ऋ.वे. 3.59.2.

दीनार-इसके मूल में संस्कृत शब्द 'हिरण्य' है। 'हिरण्य' शब्द का अवेस्तीय रूप 'जरन्य' है। जरन्यर का प्रा.फा. रूपान्तरण 'दरनिय' है। 'दरनिय' का ही आ. फा. में दीनार हो गया।

रोज, रोजा - इसका संस्कृत मूल रोचस् है। रोचस् - रओचङ्.ह् (अवे) >रउच (प्रा.फा, रउचपतिवा अव अकुनवयता, धा ब-1) >रोज (चकार का घोषीकरण) यहाँ 'ओ' ध्वनि, जो प्रा.फा. में 'अउ' हो गई थी, वह पुनः 'ओ' इस प्रकृत रूप में दृष्टिगत होती है।

बिरादर- संस्कृतमूल 'भ्रातृ'- ब्रातर, ब्राता (अवे., प्रा.फा.) बिरादर। 'भ्' का अल्पप्राण होकर 'ब्' हुआ। और 'र' के मध्यर 'इ' का आगम तथा तकार का घोषीकरण होकर दकार हो गया।

पिदर- संस्कृतमूल 'पितृ' (पिता) पितर् पिता (अवे. प्रा. फा.) - पिदर। 'त' का घोषीकरण होकर दकार एवं अन्त में अकारागम।

मादर- संस्कृतमूल मातृ (माता) मातर् माता (अवे., प्रा. फा.) - मादर। ध्वनिपरिवर्तन की प्रक्रिया पिदर के समान।

पस- संस्कृतमूल 'पश्चात्', पश्चा या पश्च (पश्च पश्चा च्छन्दसि, पा. 5.3. 33)- पसा (प्रा. फा., पसाव कार अरिक अबव, धा.ब.।)-पस। शकार की दन्त्यापत्ति होकर सकार हुआ।

खोर - संस्कृत धातु 'स्वर्द आस्वादने' ख्वर् (अवे.) - खोर। इस प्रकार मूलधातु के 'दकार' का लोप हो गया। 'स्वं' का अवेस्ता। 'ख्व'। आधुनिक फारसी में 'वकार' का सम्प्रसारण[1] 'उ' तदनन्तकर गुण 'ओ' की प्रवृत्ति'। आदमखोर, घूसखोर जैसे समस्त शब्दों में यह दृष्टिगत।

सवार- मूलसंस्कृत -'अश्ववार'- अवसार (प्रा.फा. असवरिइबिश्, धा.ब.1, वेदवत् 'भिस्' को 'ऐस्' नहीं हुआ)- सवार। प्रथम वकार का लोप। इसे भाषाविज्ञान की शब्दावली में सवर्णलोप (Haplology) कहते है। संस्कृत शकार का ईरानी (प्रा. फा, फा. आदि) में प्रायः सकार हो जाता है।

अंजुमन- संस्कृतमूल 'सङ्गमन' हङ्गमन (अवेस्तो) यहाँ 'स' का 'ह' हुआ है। 'ह' इस आदिव्यञ्जन का लोप। ङ्ग्ञ्ज के रूप में परिवर्तन अर्थात् कण्ठ्य ध्वनियों का तालव्यीकरण एवं 'उ' का आगम।

---

1. इग्यणः सम्प्रसारणम्, पा. सू. 1.1.45.

दोस्त– संस्कृत धातु 'जुषी प्रीतिसेवनयोः से 'तृच्' प्रत्यय के संयोग से 'जोष्टृ' प्रातिपदिक निष्पन्न होता है। (प्रथमैकवचनान्त रूप जोष्टा) का अवेस्तीय रूप 'जओश्तर्' है। यह ध्यातव्य है कि अवेस्ता में षकार को छोड़कर कोई मूर्धन्य ध्वनि नहीं है। इसके स्थान पर तालव्य ध्वनियाँ ही प्राप्त होती हैं। टकार के स्थान पर तकार हुआ एवं टकार का पूर्ववर्ती षकार समीकरणोपरान्त शकार हो जाता है। इस प्रकार 'जओश्तर्' का प्राचीन फारसी रूप 'दउश्तर्' है। दउश्तर्– दोस्त (शकार समीकृत होकर सकार)।

आला– इसके मूल में संस्कृत अव्ययपद अरम्[1] या अलम् है (रलयोरभेदः)। 'अलम्' शब्द के तीन अर्थ हैं– पर्याप्ति, वारण एवं भूषण। फारसी 'आला शब्द में प्रथम दो अर्थ अभिव्यक्ति पाते हैं। दोनों स्वरों का दीर्घीकरण भी स्पष्ट है।

गिरिफ़्त, गिरिफ़्तार गिरिफ़्तारी– यह सभी शब्द संस्कृत धातु 'ग्रह' (ग्रह उपादाने) से निष्पन्न हैं। वेद में कभी-कभी 'ग्रह्' धातु 'ह्' 'भ' में परिवर्तित हो जाती है।[2] वेद-संस्कृत का भकार अवेस्ती में कहीं-कहीं- वकार में परिणत हो जाता है। 'ऋ' ध्वनि अवेस्ता एवं प्रा. फा. में 'अर्' इस रूप में उपलब्ध होती है। स्वयं संस्कृत में यह ध्वनि गुण एवं वृद्धि की दशा में क्रमशः 'अर्' एवं 'आर्' में परिणत हो जाती है[3]। इसके अतिरिक्त 'भ' अवेस्ता में 'ब' एवं 'फ' के रूप में भी दिखाई देता है। 'गृभ्' का अवेस्तीय रूप 'गॅरव्' है। गृभ् का क्त्वान्तरूप 'गृभीत' है। इसी 'गृभीत' से 'भ्' का 'फ' होकर भकारोत्तरवर्ती ईकार लोप एवं 'ऋ' का 'इर्' होकर गिरफ्त शब्द निष्पन्न होता है।

मुर्ग़– इसका संस्कृतमूल 'मृग' है। 'मृग' का मूल अर्थ 'विचरणशील पशु' है। निरुक्तकार ने इस शब्द को गत्यर्थक 'मृज्' धातु से निष्पन्न माना है।[4] वेद में यह शब्द अनेकत्र सिंह या व्याघ्र[5] के अर्थ में प्रयुक्त हुआ है। मृग का अवेस्तीय रूप 'मॅरॅघ'[6] है। अवेस्ता में यह शब्द पक्षी के लिए प्रयुक्त है। यहाँ भी इसका उड्डयन रूप गत्यर्थ समाहित है। फारसी में यह 'मुर्ग' के रूप में परिचय होकर (एक पक्षिविशेष) का

---

1. तस्मा अरं गमाम वः। ऋ.वे. 10.09.03.
2. हृग्रहोर्भश्छन्दसि, पा. 3.1.84 पर वार्तिक, गृभ्णामि ते सौभगत्वाय हस्तम्, ऋ.वे. 10.85. 36
3. उरण् रपरः, पा.1.1.5।
4. मृगो मार्ष्टेर्गतिकर्मणः, निरु 1.20
5. मृगो न भीमः कुचरो गिरिष्ठाः, ऋ.वे. 1.154.2
6. आअत् थ्वा स्पन्त फ्रदक्षता मॅरॅघ, अवेस्ता, हओमयश्त् 11.13

वाचक है। इस प्रकार यहाँ अर्थसङ्कोच दृष्टिगत होता है।

दस्त – इसका संस्कृत रूप हस्त है। संस्कृत 'हस्त' अवेस्ता में 'जस्त' इस रूप में मिलता है। अवेस्तीय जकार का प्राचीन फारसी में दकार हो जाता है। वहाँ और आधुनिक फारसी में यह 'दस्त' इस रूप में मिलता है। हिंदी में दस्तकारी आदि में इसकी प्रयुक्ति बहुधा दृष्टिगत होती है।

आवारा– इसका संस्कृत मूल 'अभृत'– (जिसका पालन–पोषण न हुआ हो) है। इसका अवेस्तीय रूप अवॅरॅत है। अवार–उश्त्र आदि समस्त शब्दों में भी इसका प्रयोग मिलता है। 'अवार' से ही 'आवारा' शब्द विकसित हुआ है।

हज़ार– इस शब्द का संस्कृत मूल 'सहस्र' है। अवेस्ता में यह 'हजङ्र'[1] इस रूप में मिलता है। हजङ्र हज़ार (ङ् का लोप एवं 'ज' का दीर्घीकरण)।

सद– इस शब्द का संस्कृत मूल 'शत' है। 'शत' यह शब्द अवेस्ता में 'सत' इस रूप में मिलता है। फारसी में भी अवेस्तावत् 'सत' (शकार की दन्त्यापत्ति)

नमाज– इस शब्द का संस्कृत मूल 'नमस्' है। अवेस्ता में यह 'नमङ्ह्' इस रूप में मिलता है। 'नमस्' का पह्लवी में 'नमाच्' एवं आ. फा. में 'नमाज्' हो गया। ईश्वरनमस्कार रूपी 'नमाज' में 'नमः' का अर्थ काफी सीमा तक सुरक्षित है।

सुर्ख़– इसका संस्कृत रूप 'शुक्र' (चमकीला, 'शुची दीप्तौ' धातु से निष्पन्न) है। शकार की दन्त्यापत्ति से सकार हुआ। 'क्' एवं रेफ का विपर्यय होकर एवं ककार महाप्राण होकर 'सुर्ख' शब्द निष्पन्न हुआ। 'सुर्ख' का अवेस्तीय पूर्व रूप 'सुख्र' है।

दीन– इसका वैदिकसंस्कृत रूप धेना[2] है। अवेस्ता में 'ध' का अल्पप्राण होकर 'द' हुआ। 'ए' अवेस्ता में प्रायः 'अए' इस रूप में मिलता है। धेना का अवेस्तीय रूप 'दएना' है जो, धर्मनियमों का स्त्रीविग्रह है। इसी 'दएना' से 'दीन' शब्द विकसित है।

बुलन्द अथवा बलन्द– इसका संस्कृत समरूप 'बृहत्' है (प्रथमाबहुवचन में 'बृहन्तः')। इसी बृहत् अथवा बृहन्त से अवेस्तीय शब्द 'वॅरॅज़न्त्' विकसित है। 'ज' का लोप, रेफ का लकार, तकार का घोषीकरण के बाद दकार। संस्कृत की मूल

---

1. हज़ङ्र–यओक्ष्तीम् अवे. हओम यश्त्, 9.8
2. वायो तव पपृच्चती धेना जिगाति दाशुषे। ऋ.वे. 1.2.3, सायण ने 'धेना' शब्द का अर्थ 'वाक्' किया है। इसका अर्थ स्तुतिवाक् अथवा धर्मवाक् है।

ध्वनि 'ब' फारसी में सुरक्षित रही। इस प्रकार 'बुलन्द' अथवा 'बलन्द' शब्द की निष्पत्ति हुई।

बीं- इसका अर्थ है 'देखने वाला'। वेद में 'वेन'[1] शब्द ज्ञानी, विचारशील, द्रष्टाद इत्यादि अर्थों में प्रयुक्त हुआ है। अवेस्ता में 'वएन्' धातु देखने के अर्थ में प्रयुक्त है। इसी से फारसी 'बीं' विकसित हुआ है। इसका प्रयोग 'बारीकबीं', 'हकबी' आदि समस्त। पदों के उत्तरपद के रूप में हिंदी में बहुधा होता है।

चर्ख़- इसका संस्कृत समरूप 'चक्र' है। 'चक्र' शब्द' अवेस्ता में 'चख्र' इस रूप में मिलता है। 'क्' का घोषीकरण होकर खकार हुआ। अवेस्तीय 'चख्र' के खकार एवं रेफ का विपर्यय होकर फारसी में चर्ख़ हुआ।

बू- इसका संस्कृतमूल बोध (बुध् धातु से निष्पन्न) है। इसका अर्थ 'ज्ञान' है। इसका अवेस्तीय रूप 'बओध' है, जहाँ इसका अर्थ 'गन्ध' (घ्राणज ज्ञान विशेष) है। इसी से 'बू' शब्द का विकास हुआ है। इस शब्द का हिन्दी में स्वतंत्र रूप से एवं खुशबू एवं बदबू इत्यादि समस्तपदों के उत्तरपद के रूप में होता है।

दराज़- इसका संस्कृत समरूप दीर्घ है। निरुक्तकार यास्क इस शब्द को 'द्राघ' धातु से निष्पन्न मानते है।[2] द्राघ से ही अवेस्तीय 'द्राज' शब्द निष्पन्न है। दकार एवं रेफ के मध्य अकारगम के साथ 'दराज़' विकसित है।

सितार-इसका संस्कृत समानान्तर 'स्तृ[3]' है। ध्यातव्य है कि संस्कृत 'ऋ' ध्वनि अवेस्ता में 'अर्' इस रूप में परिवर्तित हो जाती है। अवेस्ता में 'स्तर्' इस रूप में यह शब्द प्रयुक्त। इसी 'स्तर्' से सितार शब्द विकसित है।

निशाँ, निशान - इस शब्द के मूल में 'ज्ञा' धातु है। 'ज्ञा' का अवेस्तीय रूप 'ज्ना' एवं प्राचीन फारसी रूप 'ख्श्ना' है। ऋग्वेदप्रातिशाख्य 'क्शा' धातु की सत्ता मानता है।[4] लगता है कि 'ख्श्ना' धातु का विकास ज्ञा औ क्शा के सम्पृक्त रूप से हुआ है। भाषाविज्ञान की भाषा में इस प्रक्रिया को सम्पृक्तिदोष (Contamination) कहते है। प्रा.फा. 'ख्ना' से ही 'निशाँ' एवं 'निशान' शब्द का विकास हुआ है।

---

1. वेनस्तत्पश्यन् निहितं गुहा सत्, वा.सं. 32.8
2. दीर्घं द्राघतेः, निरु. 2.16
3. पश्यन्तो द्यामिव स्तृभिः, ऋ.वे. 4.7.3
4. क्शातौ खकारयकारा उ एके ऋ.वे. 4.7.3., तावेव ख्यातिसदृशेषु नामसु। ऋ.प्रा 6.55-56, इसका संकेत वार्तिककार ने भी किया है - क्शाोदिरप्युयमादेश इष्यते, पा.2.4.54 पर वार्तिक

दाँ, दानिश– इन शब्दों के मूल में 'ज्ञा' धातु है। 'ज्' का 'द्' में परिवर्तन प्रा. फा.भाषा की प्रवृत्ति है। कुछ वैदिक आज भी 'ज्ञ' (ज् औ ञ) के संयोग को 'द्न' जैसा उच्चारित करते हैं। संस्कृत में इससे निष्पन्न कृदन्त पद 'ज्ञ[1]' इसी से फारसी दाँ निष्पन्न है और हिंदी में 'कद्रदाँ' इत्यादि शब्दों में दृष्टिगत होता है। 'दानिश' शब्द भी 'ज्ञा' धातु से ही निष्पन्न है। इसी 'ज्ञा' धातु के पूर्व 'वि' उपसर्ग पूर्वक विभिन्न प्रक्रियाओं से गुज़र कर 'बेगाना' शब्दा भी निष्पन्न है।

खुदा– यह शब्द संस्कृत 'स्वधा' से निष्पन्न है। इसका अवेस्तीय रूप 'ख्वधा'[2] है एवं प्रा. फा. में यह 'उवादा' इस रूप में उपलब्ध है। वकार का सम्प्रसारण एवं धकार का अल्पप्राण होकर 'खुदा' शब्द निष्पन्न होता है।

